
तमसो मा ज्योतिर्गमय
SANTINIKETAN
VISWA BHARATI
LIBRARY
21·511
B 461
NV 1418

C S S No 81

THE

CHOWKHAMBÂ SANSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 433. 455 & 479

अग्निष्टोमपद्धतिः ।

वामनाचार्यविरचिता कर्कानुसारिणी

आध्वर्यवपद्धतिः ।

नानाभाई इत्युपनामक रामकृष्णत्रिपाठिकृता

औद्गात्रपद्धतिः ।

तथा

रघुनाथद्विवेदिनिर्मिता शाङ्खायनसूत्रानुसारिणी

हौत्रपद्धतिः ।

Agnistoma Paddhati

Consisting of (i) ĀDHVARYAVA PADDHATI by Vāmanācharya, (ii) AUDGATRA PADDHATI by Rāmakṛṣṇa Tripāṭhī Nānābhāi and (iii) HAUTRA PADDHATI following the Sāmkhyāyana Sūtras by Raghunātha Dvivedī.

Edited with notes etc, by


PANDIT BHAGAVAT PRASĀDA SARMĀ,
Vedāchārya, Professor of Vedas,
Government Sanskrit College, Benares.

FASCICULAS. 1–१.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE.
Benares City.

1934.

Registered according to Act XXV. of 1867. (All Rights Reserved.)



Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares.

श्रीगणाधिपतये नमः ॥

अथाग्निष्टोमपद्धतिः ।

आध्वर्यवपद्धतिः ।

लक्ष्मीनृसिंहपितरौ गुरून्नत्वाग्रजांस्तथा ।
अग्निष्टोमस्य सरणिं वक्ष्ये कर्कानुसरिणीम् ॥

अग्निष्टोमं चिकीर्षुरादौ भूमिं पूजयेत् । तद्यथा—कर्ता सपत्नीको गुरुविप्रदैवज्ञशिल्पिसमेतः पूजासामग्रीं गृहीत्वा सोमारम्भात् प्राग्ज्योतिर्विदादिष्टे सुमुहूर्ते पूर्वाह्णे उक्तलक्षणलक्षितायां भूमौ गत्वा गुर्वाद्यनुज्ञातः कुशहस्तः कुशेषूपविश्य आचम्य प्राणानायम्य देशकालौ स्मृत्वा अमुकगोत्रोऽमुकप्रवरान्वितोऽमुकशर्मा सपत्नीकोऽहं करिष्यमाणाग्निष्टोमसंस्थज्योतिष्टोमयागोपयोगिप्राच्यादिदिक्साधन-पूर्वकशालायतनादिनिर्मातुं तदङ्गतया विहितानि स्वस्तिवाचनभूमि-कूर्मानन्तवराहविश्वकर्मपुरोहितदैवज्ञपूजनानि करिष्ये ।

तत्रादौ(१)निर्विघ्नतासिद्ध्यर्थं गणपतिगौरीपूजनं करिष्ये । यथोक्तविधिना गणपतिगौरीपूजनस्वस्तिवाचने विधाय अक्षतपुञ्जे भूमि-कूर्मानन्तवराहान् पूजयेत् । यष्टिहस्तपरिमिते काष्ठे गज इत्याख्ये विश्वकर्माणं पूजयेत् ।

आदौ भूमेः—

चतुर्भुजां शुक्लवर्णां कूर्मपृष्ठोपरिस्थिताम् ।
प्रसन्नवदनां चक्रशूलशङ्खादिधारिणीम् । इति ध्यानम् ।
आगच्छ सर्वकल्याणि वसुधे लोकधारिणि ।
लोकदत्तासि पृथिवि कश्यपेनाभिवन्दिते ॥

इत्यावाहनम् । स्योनेति पूजनम् । "ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः" (शु० य० सं० ३६।१३) ।

---

(१) एतच्च सर्वकर्मस्वादौ कर्तव्यं निर्विघ्नार्थत्वात् । "न ऋते त्वत्क्रियत" (ऋ १०।१०।११२।९) इति मन्त्रलिङ्गाच्च । "सर्वकर्मसमृद्ध्यर्थमादौ पूज्यो विनायक"इति लैङ्गात्, नार्चितो हि गणाध्यक्षो यज्ञादौ यत्सुरोत्तमाः । तस्माद्विघ्नं समुत्पन्नमाकस्मिकमिदं खल्वि"ति पाद्माच्च, "विलोक्य विघ्नेशविधिं तदेश्वरः"इति (भा०८।७।८)शुकोक्तेश्च ।

आध्वर्यवपद्धतिः ।

पूजान्ते—

उद्धृतासि वराहेण कृष्णेन शतबाहुना ।
दंष्ट्राग्रैर्लीलया देवि यज्ञार्थं प्रणमाम्यहम् ॥

इति प्रणमेत् । ततो दधिदूर्वायवफलपञ्चरत्नयुतं जलं ताम्रादिपात्रे गृहीत्वा विशेषार्घं(१) दद्यात् ।

ब्रह्मणा निर्मिते देवि विष्णुना शङ्करेण च ।
पार्वत्या चैव गायत्र्या स्कन्देन वरुणेन च ।
यमेन पूजिते देवि धर्मस्य विजिगीषया ।
सौभाग्यं देहि पुत्राँश्च धनं रूपं च पूजिते ।
गृहाणार्घं मया दत्तं प्रसन्ना शुभदा भव ।
भूम्यै नमः इदमर्घं(२) समर्पयामि ॥

ततो गन्धपुष्पपायससक्तुलाजैः सघृतैः सदीपैर्युक्तं महाबलिं दद्यात् । "ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री । पृथिवीं यच्छ पृथिवीं दृꣳह पृथिवीम्माहिꣳसीः (शु०य० सं०१३।१८) ।

उपचारमिमं तुभ्यं ददामि परमेश्वरि ।
भक्त्या गृहाण देवेशि त्वामहं शरणं गतः ॥

ततः कूर्मानन्तवराहादीनां(३) नाममन्त्रेण पूजनम् । विश्वकर्मपूजनमपि नाममन्त्रेण । ततः पुरोहितपूजनं दैवज्ञस्य च, ताभ्यां गोप्रदानम् । शिल्पिनं संतोष्य भूयसीं सङ्कल्प्य ब्राह्मणान् भोजयेत् । इति भूमेः पूजनम् ।

---

(१) आवाह्य "भूरसी"ति पुष्पाञ्जलिं दत्वा प्रणम्यार्घं दत्वा भूरसीति भूमिं सम्पूज्य पूजां निवेद्य बलिं दत्वा प्रार्थयेदिति क्रमो रुद्रकल्पद्रुमे (३६३ पत्रे) ।

(२) अत्र यकाररहित एवार्घशब्दो वाजसनेयिभिः पठनीयः पारस्करसूत्रे तथैव प्रायशो दर्शनात् ।

"आपः क्षीरं कुशाग्राणि दधिदूर्वाक्षतास्तथा ।
फलं सिद्धार्थकांश्चैव अर्घोऽष्टाङ्गः प्रकीर्तितः" इति ।

(३) श्रीवराहस्य यज्ञात्मतां प्रपञ्चितं श्रीमद्भागवते (स्कं० ३। अ०१३ श्लो० ३९-३८)—

"रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव यदध्वरात्मकम् ।
छन्दांसि यस्य त्वचि बर्हिरोमस्वाज्यं दृशि त्वङ्घ्रिषु चातुर्होत्रम् ॥
स्रुक् तुण्ड आसीत्स्रुव ईश नासयोरिडोदरे चमसाः कर्णरन्ध्रे ।
प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्वणं ते भगवन्नग्निहोत्रम् ॥
दीक्षाऽनुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः ।
जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः सभ्यावसथ्यं चितयोऽसवोहि ते ॥
सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देव धातवः ।
सत्राणि सर्वाणि शरीरसन्धिस्त्वं सर्वयज्ञक्रतुरिष्टबन्धनः" ॥ इति ।

आध्वर्यवपद्धतिः ।

ततस्तत्र समे देशे सङ्कुच्छायादिना प्रागुदक्सूत्रे संसाध्य प्राक्सूत्रे प्रागुपचारं विहारं रचयेत् ।

अथ विहारनिर्माणम्—

इतः परं तु सौमिक्या वेदेर्मानं मयोच्यते ।
द्विपदः प्रक्रमस्तत्र पदं तु त्रिविधं मतम् ॥ १ ॥
तिथ्यर्कपङ्क्तिकरजैर्ग्राह्यं तद्धि यथायथम् ।
अरत्निना सदोमानं सर्वत्र प्रक्रमैर्न हि ॥ २ ॥
पृष्ठ्यां विधायापरेऽन्ते विमितं चतुरस्रकम् ।
दश द्वादश वा दैर्घ्ये विस्तारे स्युररत्नयः ॥ ३ ॥
शाला वा दशविस्तारा दैर्घ्ये च द्विगुणा मता ।
तस्यानुदग्दिग्द्वाराणि त्रीणि स्युर्द्विकराणि हि ॥ ४ ॥
तस्मात्प्रत्यग्बहिस्तद्वत्पञ्चारत्निमितं मितम् ।
तथवोदक्स्यात्तन्मध्ये गर्तश्च करसम्मितः ॥ ५ ॥
तयोस्तु द्वारमेकैकं प्रागुदग्वा यथारुचि ।
विहारः प्राकृतस्तस्मिन्विशेषस्त्वधुनोच्यते ॥ ६ ॥
पूर्वद्वार्मध्यतः पश्चात्प्रक्रमद्वितये भवेत् ।
मध्य आहवनीयस्य पश्चात्सप्तान्तरे पुनः ॥ ७ ॥
मध्यः स्याद् गार्हपत्यस्य, शेषं प्राकृतमीरितम् ।
तन्मध्ययोरुदक्शङ्कू स्यातां सार्द्धकरद्वये ॥ ८ ॥
तौ मध्यौ खरयोस्तौ च वेदास्तौ करसंमितौ ।
पात्याद्दक्षिणतः प्रान्ते खर उच्छिष्टसंज्ञकः ॥ ९ ॥
दक्षिणाप्रवणोऽध्यस्रः सर्वेऽपि द्व्यङ्गुलोच्छ्रिताः ।
पूर्वद्वार्मध्यतः शङ्कुः पुरस्तात्प्रक्रमत्रये ॥ १० ॥
सोऽन्तः पात्यो महावेदेः पश्चिमप्रान्त इष्यते ।
तस्मादुभयतः श्रोणी तिथिप्रक्रमसम्मिते ॥ ११ ॥
वाऽर्धसप्तदशेषु स्तो वेदेः प्राशस्त्यमिच्छतः ।
अन्तः पात्यात्पुरः शङ्कुः षट्त्रिंशत्प्रक्रमेषु तु ॥ १२ ॥
तस्मादुभयतः स्यातां द्वादशप्रक्रमेऽसकौ ।
अन्तः पात्यात्पुरः सार्द्धप्रक्रमे सदसोऽवधिः ॥ १३ ॥
तस्मादुभयतः श्रोणी नवारत्नौ ततः पुरः ।
नवारत्नौ ततस्तद्वदंसौ द्वारद्वयं भवेत् ॥ १४ ॥
पत्यात् षट्सु प्रक्रमेषु पुरः शङ्कुस्ततः पुनः ।
एकविंशत्यङ्गुलेषु शङ्कुस्तद्दक्षिणोत्तरा ॥ १५ ॥

आध्वर्यवपद्धतिः ।

पृष्ठ्या, तस्यां धिष्णियाः स्युः, शङ्कोर्दक्षिणतो भवेत् ।
मध्यः शास्तुस्तु धिष्ण्यस्य अरत्नौ सनवाङ्गुले ॥ १६ ॥
पृष्ठ्याशङ्कोरुदक्पञ्चात्रादौ शङ्कुर्नवाङ्गुले ।
षट्त्रिंशदङ्गुले तस्मादेवं शङ्कुचतुष्टयम् ॥ १७ ॥
एते मध्या धिष्णियानां, विस्तारोऽष्टादशाङ्गुलः ।
वेदाङ्गुलोच्चा वेदास्राः षट् धिष्ण्याः सदसि स्मृताः ॥ १८ ॥
शङ्कोः प्रक्रमषट्कस्थाद्दक्षिणा तु करत्रये ।
भवेदौदुम्बरीगर्तः प्रक्रमो हि महानयम् ॥ १९ ॥
षट्त्रिंशत्प्रक्रमे शङ्कौ मध्यो यूपावटस्य तु ।
तस्मात्पश्चात्पदे शङ्कुः पञ्चारत्नौ पुनस्तथा ॥ २० ॥
शङ्कोरुभयतो वेदिश्रोण्यंसाः पदपञ्चके ।
सर्वतः सा दशपदा स्यादुच्चा चतुरङ्गुला ॥ २१ ॥
चतुर्विंशत्यङ्गुला वाऽथवा षट्त्रिंशदङ्गुला ।
तत्पश्चात्त्रिप्रक्रमान्ते शङ्कुर्दशसु चापरः ॥ २२ ॥
तयोः शङ्कोरुभयतः श्रोण्यंसौ दशभिः पदैः ।
पूर्वपश्चिमदिग्द्वारं हविर्धानं कटैर्वृतम् ॥ २३ ॥
दशप्रक्रमदघ्नं तच्चतुरस्रं समन्ततः ।
तस्मिन्दक्षिणपूर्वार्द्धमध्यमध्यं करात्मकम् ॥ २४ ॥
वेदास्रमस्रिषु छिद्राण्यर्कव्यासानि चाद्दणया ।
संभिद्यात् तेष्वपरवाः, सम्यक् चेत्पूर्वयो र्न हि ॥ २५ ॥
खरस्तदग्रे वेदास्रः पात्रार्थोऽरत्निसम्मितः ।
हविर्धानोत्तरश्रोण्युदक् क्रमचतुष्टये ॥ २६ ॥
शङ्कुः, सोऽग्नीन्मण्डपस्य स्तम्भो नैर्ऋत्यधिष्ठितः ।
पञ्चारत्निर्मण्डपः स्यान्मध्ये कुण्डं तु धिष्ण्यवत् ॥ २७ ॥
मार्जालीयोऽप्येवमेव दक्षिणश्रोणितो भवेत् ।
तन्मध्ये धिष्ण्यवद्वेदेः प्रान्त उच्छिष्टवत्खरः ॥ २८ ॥
ऐन्द्रीयाम्योरुत्तरस्मिन् द्वार्द्वयं दक्षिणे ह्युदक् ।
महावेदेरुत्तरांसादुदक् स्यात्त्रिंशदङ्गुले ॥ २९ ॥
शङ्कुः,स्तस्मात्पुनः पञ्चाच्छङ्कुः स्यात्त्रिष्वरत्निषु ।
मध्यश्चात्वालगर्त्तस्य स स्याद् द्वात्रिंशदङ्गुले ॥ ३० ॥
तदुत्तरेण शामित्रं यथायोगं तु तन्मितिः ।
वेदेः खातस्त्र्यङ्गुलः स्यात्पृष्ठ्या भूमिसमा मता ॥ ३१ ॥
यूपावटात्प्रत्यगर्कप्रक्रमेषूत्तराननौ ।

आध्वर्यवपद्धतिः ।

प्रादेशव्यासो गर्त्तः स्यादुत्करो यज्ञिये क्रतौ ॥ ३२ ॥
इति प्रक्रममानेनेरिता वेदिस्तु सौमिकी ।
अथैतदुपयोगिन्याः प्राकृत्या मानमुच्यते ॥ ३३ ॥
पृष्ठ्यायामधिकव्यासवृत्तं नर्यस्य कल्पयेत् ।
तन्मध्याद्धसुरुद्रार्कान्यतमप्रक्रमेष्वथ ॥ ३३ ॥
हस्तमात्राब्ध्यस्रमध्यः प्रक्रमो द्वादशाङ्गुलः ।
कुण्डमध्यान्तरालांशुं सस्वषष्ठं भजेत्त्रिधा ॥ ३४ ॥
नियम्यान्तौ मध्यशङ्कोर्वर्त्मैकं दक्षिणा नयेत् ।
स मध्यस्तदुदङ् नन्दाङ्गुले वृत्तं प्रकल्पयेत् ॥ ३५ ॥
सपादाष्टत्रिव्यासं तद्दक्षार्धं धनुराकृति ।
वेदास्रमध्यात्पूर्वस्मात्परस्माद्वापि शङ्कुतः ॥ ३६ ॥
पश्चाद्वेदिस्त्र्यस्रतिस्तच्छ्रोणी उभयतस्ततः ।
करद्वयमिते अंसौ सार्धहस्तौ तथा पुरः ॥ ३७ ॥
श्रोणितः पार्श्वयोर्मध्यौ सार्द्धद्वात्रिंशदङ्गुले ।
पञ्चचत्वारिंशद्व्यासार्धयोः सङ्ग्रहयोर्मतौ ॥ ३८ ॥
सभ्यावसथ्ययोः कुण्डे वृत्ते च नर्यसंमिते ।
वृत्तवेदास्रयोश्चोदग् यथा सम्भवमीरिते ॥ ३९ ॥
उदग्गंसात्पश्चिमेनोत्करो गर्तः षडङ्गुलः ।
अर्कोच्छ्रिताश्चतुर्व्यासा मेखलाः कुण्डसन्निभाः ॥ ४० ॥
वेद्याः खातस्त्र्यङ्गुलादिरखातौ सङ्ग्रहौ मतौ ।
वेद्यां सर्वो बहिः सर्वो बहिरन्तश्च भागतः ॥ ४१ ॥
त्रिविधोऽस्त्याहवनीयो वेदिः सर्वत्र तावती ।
वेदास्र आहवनीयो, वृत्तार्धं दक्षिणस्य च ॥ ४२ ॥
त्रीणि कुण्डानीतराणि वृत्तान्युक्तानि धीमता ।
प्राकृतस्य विहारस्य विज्ञेयैषोपकल्पना ॥ ४३ ॥
एवं विहारं सम्पाद्य यज्वा यष्टुं समारभेत् ॥ इति ।

अथ ज्योतिष्टोमप्रयोगः। तत्र प्रथमप्रयोगे स्वस्तिवाचनादिमातृपूजापूर्वकमाभ्युदयिकश्राद्धं नियमेन, द्वितीयादिप्रयोगे तु गणपतिगौरीपूजनस्वस्तिवाचने एव, आभ्युदयिकश्राद्धं विकल्पेन ।

ततः सुत्योपसदीक्षाद्यनुरोधेन सुमुहूर्ते कर्ता सपत्नीको देवतागुरुविप्रादीन्नमस्कृत्य निर्णेजनान्तं वैश्वदेवं च कृत्वा कुशहस्तो गार्हपत्यस्य पश्चात्पृष्ठ्याया उत्तरतः कुशेषु शान्तिपाठपूर्वकमुपविश्य आचम्य प्राणानायम्य सुमुखश्चेत्यादि देशकालौ स्मृत्वा अमुकगोत्रोऽमुकप्रव-

आध्वर्यवपद्धतिः ।

रोऽमुकशर्मा सपत्नीकोऽहं करिष्यमाणाग्निष्टोमसंस्थज्योतिष्टोमाङ्गतया विहितानि स्वस्तिवाचनमातृकापूजनवसोर्द्धारापूजनायुष्यमन्त्रजपनान्दीश्राद्धानि करिष्ये । तत्रादौ निर्विघ्नतासिद्ध्यर्थं गणपतिगौरीपूजनं करिष्ये । इति संङ्कल्प्य प्रयोगदर्पणाद्युक्तविधिना तानि कृत्वा यवाक्षतफलसुवर्णजलहस्तः प्रधानसङ्कल्पं कुर्यात् ।

अथ प्रधानसङ्कल्पः । अमुकगोत्रोऽमुकप्रवरोऽमुकशर्मा हिरण्यशतगवदक्षिणेन वासोऽश्वदक्षिणेन रथन्तरपृष्ठेन त्रिवृदादिचतुष्टोमेनाग्निष्टोमसंस्थेन ज्योतिष्टोमेनाहं यक्ष्ये । दौर्ब्राह्मण्यनिरासार्थप्रायश्चित्तपशोः समानतन्त्रेण करणपक्षे सङ्कल्पः । मम स्वीयदौर्ब्राह्मण्यनिरासार्थं करिष्यमाणस्यैन्द्राग्नपशोरग्नीषोमीयेण पशुना सहोपालम्भं कुर्वन् हिरण्येत्यादि। एवमेव पक्षे आश्विनोऽप्यूहनीयः। तत्रादौ ऋत्विजो वृणे इति सङ्कल्पयेत् ।

औद्गात्रपद्धतिः ।

श्रीगणेशाय नमः ।

अथाग्निष्टोमसंस्थस्य ज्योतिष्टोमस्य प्रयोग उच्यते ।

ऋत्विगार्षेयोऽनूचानः साधुचरणो वाग्म्यन्यूनाङ्गोऽनतिरिक्ताङ्गो द्वयसतश्चानतिकृष्णोऽनतिश्वेतः (द्राह्यायणश्रौ० सू० १ पटले १ खं ७ सू०) (लाट्यायनश्रौ० सू० १ प्रपाठ० १ कण्डि० । ७ सू०) "असौ ज्योतिष्टोमेन यक्ष्यते तत्रौद्गात्रं भवता कर्तव्यम्" इति सोमप्रवाकेण प्रार्थित उद्गाता यद्यार्त्विज्यं न चिकीर्षति तदा "नमः सोमाय राज्ञे" इत्युक्त्वा सोमप्रवाकं प्रत्याचक्षीत "न करिष्यामी" ति । यद्यार्त्विज्यं चिकीर्षति तदा तं प्रतिमन्त्रयेत "महन्मे वोचो भर्गो मे वोच यशो मे वोचः स्तोमं मे वोचो भुक्तिं मे वोचः सर्वं मे वोचस्तन्मावतु तन्मा विशतु तेन भुक्षिषीय" इति । इदं लौकिकं वरणम् ।

यत्रातिथीन्वासयति स आवसथः तं प्रति सोमप्रवाकाय लवणमन्नं दध्नाऽऽहारयेत् । (द्रा० श्रौ० १।१।१२) ।

हौत्रपद्धतिः ।

अथाग्निष्टोमहौत्रपद्धतिः । आर्षेयान्यूनोऽनूचानानृत्विजो वृणीते सोमेन यक्ष्यमाणश्चतुरः सर्वान्वा (शां० श्रौ० ५।१।२) । तद्यथा—

ब्रह्मादीन्प्राङ् मुखानुपवेश्य स्वयमुदङ्मुखो यजमानो दक्षिणभागतः स्थितया पत्न्या सहितो मन्त्रोच्चारणमात्रेण दैवधरणेन वृणीते ।

आध्वर्यवपद्धतिः ।

अथ दैवर्त्विग्वरणम् ।

अथ वरणम् । तत्रादौ दैवर्त्विग्वरणं मन्त्रोच्चारणरूपम् । अग्निर्मे होता, आदित्यो मेऽध्वर्युः चन्द्रमा मे ब्रह्मा, पर्जन्यो म उद्गाता, आपो मे हात्रा(१)शंसिनः । रश्मयो मे चमसाध्वर्यवः ।

औद्गात्रपद्धतिः ।

अथ गृहं प्रत्यागतानामृत्विजां यजमानो दैववरणं कुर्यात् । अग्निर्मे होता । आदित्यो मेऽध्वर्युः । चन्द्रमा मे ब्रह्मा । पर्जन्योम उद्गता । (सदस्यपक्षे—आकाशो मे सदस्यः) । आपो मे होत्रशंसिनः । रश्मयो मे चमसाध्यर्यवः । इदं मन्त्रजपरूपं दैववरणम् ।

हौत्रपद्धतिः ।

"चन्द्रमा मे दैवो ब्रह्मा" इत्युपांशु "त्वं मानुषः" इत्युच्चैः । एवं सर्वान् । "आदित्यो मे दैव उद्गाता त्वं मानुषः । अग्निर्मे दैवो होता त्वं मानुषः । वायुर्मे दैवोऽध्वर्युस्त्वं मानुषः । प्रजापतिर्मे दैवः सदस्यस्त्वं मानुषः । ऋतवो मे दैव्या होत्राशंसिनो यूयं मानुषाः । रश्मयो मे चमसाध्वर्यव यूयं मानुषाः" इति दशङ्ख्याकांश्चमसाध्वर्यून्वृणीते । "भर्ग मे वोचो भद्रं मे वोचो भूतिं मे वोचः श्रियं मे वोचो यशो मे वोचो मयि भर्गो मयि भद्रं मयि भूतिर्मयि श्रीर्मयि यशः" इति वृतो जपित्वा(२) । इति दवर्त्विग्वरणम् ।

---

(१) "महर्त्विग्व्यतिरिक्ता ब्राह्मणाच्छंस्याद्या द्वादशर्त्विजो होत्राशंसिन" इति मानवे ।

(२) "कच्चिन्नाहीनानुदेश्य-न्यस्तार्त्विज्यनीतदक्षिणानामन्यतम इति पृष्ट्वा प्रतिश्रृणोति प्रत्याचष्टे वा" [शां० श्रौ० १।१।१०] इति सूत्रशेषः।अस्यार्थः—"भर्ग म"इत्येवमादिकं मन्त्रं वृत ऋत्विक् जपित्वानन्तरं जपात्पृच्छति यदि पूर्वं न ज्ञातो योऽयंयज्ञः कर्तव्यः। किमयमहीन उत नेति । कच्चिच्छब्दः किं शब्दस्यार्थ । अनुदेश्यः स उच्यते यः कृत्वाऽन्यस्मै जीवते मृताय वा अनुदिश्यते । यथा कात्यायनेनोक्तम् "उखां चेद्विश्रिन्त्रियेत सोपकरणमाहितान्यावृता दग्ध्वा नेदिष्ठय्यग्नि चित्वा तमस्मा अनुदिशेदित्येक" [का० श्रौ० २५।१४।१] इति । न्यस्तार्त्विज्यस्तु न्यस्तं परित्यक्तमार्त्विज्यं यस्मिन्नन्येन केन चिद्यजमानस्य दोषेण । नीतासु दक्षिणासु यः शेषः स नीतदक्षिणो यज्ञशेषः । एवं दृष्टादृष्टदोषपरिहारार्थम् । यद्येतेषामन्यतमो न भवति ततः प्रतिश्रृणोति । इतरथा प्रत्याचष्टे । प्रतिश्रवः क्रियाभ्युपगमः। प्रत्याख्यानं तद्विपर्ययः।

आध्वर्यवपद्धतिः ।

अथ मानुषवरणम् ।

तत्रादौ(१)यजमानः सोमप्रवाकस्य उदङ्मुखोपविष्टस्य दक्षिणं जान्वालभ्य गोत्रामुकशर्मन् अस्मिन्नग्निष्टोमसंस्थे ज्योतिष्टोमे सोमे त्वं सोमप्रवाको(२) भवेति वदेत् । भवामीति तेन प्रत्युक्ते तं मधुपर्कादिनाऽमन्त्रकमर्चयेत् । ततः सोमप्रवाको होतृगृहं गत्वा अमुकशर्मणः सोमो भविष्यति तत्र भवता हौत्रं कर्त्तव्यमिति वदेत् । एवमितरान्। आध्वर्यवम् ,ब्रह्मत्वम् , औद्गात्रम् , प्राशास्त्रम् , प्रतिप्रस्थात्रीयम् , ब्राह्मणाच्छंसीयम् , प्रस्तोत्रीयम् , अच्छावाकीयम् , नेष्ट्रीयम् , पौत्रम् , प्रातिहर्त्रम् , ग्रावस्तुतीयम् , औन्नेत्रम् , आग्नीध्रीयम् , सुब्रह्मण्यीयम् , इति विशेषः। ते च प्रत्येकमां तथेति वदेयुः । ततो यजमानः प्राङ्मुखो ब्रह्मादीन् षोडशर्त्विजउदङ्मुखानुपविष्टान् दक्षिणं जान्वालभ्य मानुषान्वृणीते(३) । गोत्रामुकशर्मन् हिरण्यशतगवदक्षिणेन वासोऽश्वदक्षिणेन च रथन्तरपृष्ठेन त्रिवृदादिचतुष्टोमेनाग्निष्टोमसंस्थेन ज्योतिष्टोमेनाहं यक्ष्ये ।

तत्र मे त्वं ब्रह्मा भव, एवमेवेतरान्, उद्गाता भव, होता भव । अध्वर्युर्भव, ब्राह्मणाच्छंसी भव, प्रस्तोता भव, मैत्रावरुणो भव, प्रतिप्रस्थाता भव, पोता भव, प्रतिहर्त्ता भव, अच्छावाको भव, नेष्टा भव, अग्नीद्भव, सुब्रह्मण्यो भव, ग्रावस्तुद् भव, उन्नेता भव ।

औद्गात्रपद्धतिः ।

अथ मानुषवरणं कुर्यात् । अमुकशर्मा मानुषः । इदमपि मानुषवरणं मन्त्रजपमेव ।

हौत्रपद्धतिः ।

ततो यजमानो ब्रह्मोद्गातृहोत्रध्वर्युब्राह्मणच्छंसिप्रस्तोतृमैत्रावरुणाप्रतिप्रस्थातृपोतृप्रतिहर्त्रच्छावकनेष्टृग्नीत्सुब्रह्मण्यग्रावस्तुदुन्नेतॄणां सदस्यानां मानुषवरणं करोति ।

---

(१) सव्ये स्फ्यं गृहीत्वा साक्षसेन दक्षिणहस्ताग्रेण दक्षिणं ऋत्विग्जान्वालभ्य वरणं कुर्यादिति देवयाज्ञिकः ।

(२) यद्यपि सोमप्रवाकः कात्यायनसूत्रे नास्ति तथाप्याचारादत्र लिखितः ।

ततो यजमानः सोमप्रवाकं प्रति सोमप्रवाक सोमं मे ब्रूहि ऋत्विग्भ्यः । केम्य इति तेनोक्ते अमुकशर्मादिभ्य इति होतृनामपूर्वकमाह—

नात्र को यज्ञ इत्यादयः । एतच्छाखायां प्रवादनस्यानभिधानात् । सोमप्रवाक एव न वरणीयोऽनभिधानात् इति याज्ञिकाः केचित् ।

(३) वरणं नाम करिष्यमाणकर्मस्वरूपदक्षिणाद्रव्यतत्परिमाणश्रावणपूर्वकं स्वयमप्रवृत्तानां ब्रह्मत्वादिषु कर्मसु कर्तृत्वेनाभ्यर्थनम् ।

आश्वयंवपद्धतिः ।

अथ मधुपर्कः ।

ततो मधुपर्केण समन्त्रर्ठ० सर्वेषाꣳ समर्चनम् । तद्यथा-वृतानृत्विजः प्राङ्मुखानुपवेश्य स्वयं चोदङ्मुख उपविश्य "वृतानृत्विजो मधुपर्केणार्हयिष्ये" इति सङ्कल्प्य "साधु भवन्त आसतामर्चयिष्यामो भवत" इति वृतान्प्रार्थयेत् । "अर्चय" इति प्रतिवचनन्तेषाम् । अर्चयितुर्विष्टरदानम् । अर्चयितुरन्यो यः कश्चनार्च्यान्सम्बोधयति "विष्टरा विष्टरा विष्टरा" इति । ततोऽर्चयिता "प्रतिगृह्यन्तामि"ति सकृद्वदति । ततोऽर्च्यार्चयितुः सकाशाद्विष्टरं गृहीत्वा ("प्रतिगृह्णीम" इति प्रतिवचनं प्रतिग्रहीतृणां सर्वत्र) स्वासने उदगग्रं निदधाति । "ॐ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्यः । इमन्तमभिनिष्ठामि यो मा कश्चाभिदासति" इति ।

ततः "पादार्थान्युदकानि पादार्थान्युदकानि पादार्थान्युदकानी"त्यन्यः । प्रतिगृह्यतामित्यर्चयिता, अर्च्यस्तत्प्रतिगृह्य भूमौ निधाय तदुदकमञ्जलिनाऽऽदाय दक्षिणं स्वं पादं पूर्वं प्रक्षालयेत् । "ॐ विराजो दोहो-

औद्वाह्यपद्धतिः ।

ऋत्विजो वृत्वा मधुपर्कमाहरेदिति विधानान्मधुपर्कविधिः ।

तत्र यजमानविष्टरपुरुषाः विष्टरं पाद्यमर्घ्यमाचमनीयं मधुपर्कमाहरन्ति अर्हणीयप्रदेशादुत्तरतो गां वध्वोपतिष्ठेरन् (गो० गृ० ४।१०।१) । "ॐ अर्हणा पुत्रवाससा धेनुरभवद्यमे । सा नः पयस्वती दुहा उत्तरा मुत्तराꣳ समाम्" ॥ अथोद्गाता तिष्ठन् जपेत्—

"इदमहमिमां पद्यां विराजमन्नाद्यायाधितिष्ठामी"ति ।

यजमानपुरुषै"र्विष्टरो विष्टरो विष्टरः प्रतिगृह्यतामि"त्युक्ते विष्टरं प्रतिगृह्य "ॐ या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः । तासामस्मिन्नासनेऽच्छिद्राः शर्म यच्छत" इत्युदगग्रमास्तीर्योपविशेत् ।

पाद्यं पाद्यं पाद्यं प्रतिगृह्यतामित्युक्ते पाद्यं प्रतिगृह्यापः प्रेक्षेत । "ॐ यतोदेवीः प्रतिपश्याम्यापस्ततोमाराद्धिरागच्छत्वि"ति ततः सव्यं पादं

हौत्रपद्धतिः ।

ततो मधुपर्कः । तत्र यजमानेन कूर्चं गृहीत्वा "कूर्चः कूर्चः कूर्चः प्रतिगृह्यताम्" विष्टर इति वा "प्रतिगृह्णामी"ति प्रतिगृह्णीयात् । "ॐ अहं वर्ष्म सद्रशानां विद्युतामिव सूर्यः । इमं तमधितिष्ठामि यो अस्माँ अभिदासती"ति मन्त्रेण तदुपरि तिष्ठेदुपविशेद्वा ।

ततः "पाद्यं पाद्यं पाद्यं प्रतिगृह्यताम्" इति यजमानेनोक्ते "ॐ विरा-

आध्वर्यवपद्धतिः ।

ऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः" इति । पुनस्तथैव सव्यं पादं मन्त्रेणैव ।

ततः पूर्ववत्"द्विष्टरा विष्टरा विष्टराः प्रतिगृह्यन्ताम्" । अर्च्यो "वर्ष्मोऽस्मी"ति विष्टरस्योपरि पादौ करोतीति विशेषः ।

ततोऽन्यो "ऽर्घा अर्घाऽअर्घः"इति। "प्रतिगृह्यन्तामि"ति यजमानः। अर्च्यः "ॐ आपः स्थ युष्माभिः सर्वान्कामानवाप्नवानि" इत्यर्घं प्रतिगृह्य शिरसाभिवन्द्य प्रागुदग्वा निनयन्ननुमन्त्रयते। "ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत । अरिष्टा अस्माकं वीरा मा परासेचि मत्पय" इति ।

ततोऽन्यः "आचमनीयान्याचमनीयान्याचमनीयानि प्रतिगृह्यन्तामि"ति यजमानः । अर्च्यस्तत्प्रतिगृह्य तदेकदेशेनाचामति सकृत् "ॐ आमागन्यशसा सꣳ० सृज वर्चसा । तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनामि"ति । ततः स्मार्ताचमनम् ।

औद्गात्रपद्धतिः ।

प्रक्षालयेत्। " ॐसव्यम्पादमवनेनिजेऽस्मिन्राष्ट्रे श्रियं दधे"इति तज्जलैकदेशेन दक्षिणं पादं प्रक्षालयेत् "ॐदक्षिणम्पादमवनेनिजेऽस्मिन्राष्ट्रे श्रियमावेशयामी"ति । शेषोदकेनोभौ पादौ प्रक्षालयेत् "ॐपूर्वमन्यमपरमन्यमुभौ पादाववनेनिजे । राष्ट्रस्यर्ध्या अभयस्यापरुध्या" इति ।

"अर्घ्यमर्घ्यमर्घ्यं प्रतिगृह्यतामि"त्युक्त्वा यजमानपुरुषा उद्गातुरञ्जलौ कांस्यपात्रेणार्घ्यं निनयेत् । उद्गाता प्रतिगृह्णीयात् "ॐअन्नस्य राष्ट्रिरसि राष्ट्रिस्ते भूयासमि"ति ।

"आचमनीयमाचमनीयमाचमनीयं प्रतिगृह्यतामि"त्युक्ते तज्जलं प्रतिगृह्याचामेत् "ॐयशोऽसि यशो मयि धेही"ति ।

हौत्रपद्धतिः ।

जो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः" इति पाद्यं प्रतिगृह्य ततः पादयोस्तूष्णीं त्रिर्निनयेत् ।

"अर्घ्यमर्घ्यमर्घ्यं प्रतिगृह्यतामि"त्युक्ते तदर्घ्यं प्रतिगृह्णामीति प्रतिगृह्य तूष्णीं पादयोर्निनयति ।

तत "आचमनीयमाचमनीयमाचमनीयं प्रतिगृह्यतामि"त्युक्ते तत्पात्रं "प्रतिगृह्णामी"ति प्रतिगृह्य "ॐ आपो हि ष्ठा (१)मयोभुव०" इति तिसृभिः ऋग्भिः प्रत्येकमन्त्रान्ते आचामेत् ।

---

(१) ॐ आपो हि ष्ठा मयोभुवस्ता न ऊर्जं दधातन । महे रणाय चक्षसे ॥ यो वः शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः॥ तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ (ऋ० १०।९।१-३।)

आध्वर्यवपद्धतिः ।

ततोऽन्यो "मधुपर्का मधुपर्का मधुपर्काः" "प्रतिगृह्यन्तामि"ति यजमानः । ततोऽर्घ्यो दातृहस्तस्थं मधुपर्कं प्रतीक्षते "ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे" इति । मधुपर्कं प्रतिगृह्णाति—"ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम्प्रतिगृह्णामि" इति वामकरे धृत्वा दक्षिणानामिकया मधुपर्कमालोडयति सकृत्—"ॐ नमः श्यावास्यायान्नशने यत्त आविद्धं तत्ते निष्कृन्तामी"ति । ततोऽनामिकाङ्गुष्ठाभ्यां मधुपर्कैकदेशं गृहीत्वा प्रागुदग्वा क्षिपति, पुनरेवं वारद्वयमालोडनप्रक्षेपणे । ततो मधुपर्कैकदेशं प्राश्नाति "ॐयन्मधुनो मध्व्यं परमठ० रूपमन्नाद्यम् । तेनाहं मधुनो मध्व्येन परमेण रूपेणान्नाद्येन परमो मध्व्योऽन्नादोऽसानी"ति । एवं द्विरपरं मन्त्रेण, शेषं प्रागसञ्चरे निनयेत् । ततो द्विराचमनम् ।

प्राणान्त्सम्मृशति जलेन "ॐ वाङ्म आस्येऽस्तु" इति मुखे । "ॐ नसोर्मे प्राणोऽस्तु" इति दक्षिणनासायाम् । "ॐ नसोर्मे प्राणोऽस्तु" इति वामनासायाम् । "ॐ अक्ष्णोर्मे चक्षुरस्तु" इति दक्षिणाक्षणि । "ॐ

औद्गात्रपद्धतिः ।

"मधुपर्को मधुपर्को मधुपर्कः प्रतिगृह्यतामि"त्युक्ते मधुपर्कं प्रतिगृह्णीयात् "ॐयशसो यशोऽसीति" तस्यैकदेशं हस्ते निधाय पिबेत् "ॐइदमन्नमयठ० रस इमा गावः सह श्रिया तत्सवितुर्वरेण्यं वाग्बहु बहु मे भूयात्स्वाहे"ति। पुनस्तस्यैकदेशं हस्ते निधाय पिबेत् "ॐइदमन्नमयठ० रस इमा गावः सह श्रिया भर्गो देवस्य धीमहि प्राणो वै वाचो भूयान्बहुर्मे भूयो भूयात्स्वाहे"ति पुनस्तस्यैकदेशं हस्ते निधाय पिबेत् "ॐइदमन्नमयठ० रस इमा गावः सह श्रिया धियो यो नः प्रचोदयान्मनो वाव सर्वठ०

हौत्रपद्धतिः ।

ततो "मधुपर्को मधुपर्को मधुपर्कः प्रतिगृह्यतामि"त्युक्ते "ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे" इति प्रतीक्षते । "ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्प्रतिगृह्णामि यशसेब्रह्मवर्चसाये"ति मधुपर्कं प्रतिगृह्य वामहस्ते निधाय "ॐ वसवस्त्वाग्निराजानो भक्षयन्तु" पूर्वार्द्धं सकृन्मन्त्रेण द्विस्तूष्णीं निलिम्पेत् । "ॐ पितरस्त्वा यमराजानो भक्षयन्तु" इति दक्षिणार्द्धं सकृत् । अप उपस्पर्शनम् । "ॐ आदित्यास्त्वा वरुणराजानो भक्षयन्तु" इति पश्चार्द्धं सकृत् "ॐ रुद्रास्त्वेन्द्रराजानो भक्षयन्तु" इत्युत्तरार्धं सकृत् । अपउपस्पर्शनम् । "ॐविश्वे त्वा देवाः प्रजापतिराजानो भक्षयन्तु" इति मध्यादूर्ध्वं क्षिपेत् । सकृन्मन्त्रेण द्विस्तूष्णीम् । ततः "ॐ भूः ॐ भुवः ॐ स्वः" इति प्रत्येकं प्राश्नीयात् । ततः "ॐ भूर्भुवः

आध्वर्यवपद्धतिः ।

अक्ष्णोर्मे चक्षुरस्तु" इति वामाक्षणि । "ॐ कर्णयोर्मे श्रोत्रमस्तु" इति दक्षिणकर्णे । "ॐ कर्णयोर्मे श्रोत्रमस्तु" इति वामकर्णे । "ॐ बाह्वोर्मे बलमस्तु" इति दक्षिणबाहौ । "ॐ बाह्वोर्मे बलमस्तु" इतिवामबाहौ "ॐ ऊर्वोर्मे ओजोऽस्तु" इति दक्षिणोरौ । "ॐ ऊर्वोर्मे ओजोऽस्तु" इति वामोरौ । "ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु" इति शिरः प्रभृति सर्वाङ्गानि स्पृशेत् । अत्र पुनराचमनं केचिदिच्छन्ति ।

औद्गात्रपद्धतिः ।

सर्वं मे भूयात्स्वाहे"ति तूष्णीं चतुर्थम् । अत्रोच्छिष्टशङ्का(१) न कार्या । आचमनीयेनाचम्य शेषं ब्राह्मणाय दद्यात् ।

नापितेन गौर्गौर्गौरित्युक्त उद्गाता "ॐउत्सृजत गां तृणानि गौरस्ति"ति ब्रूयात् । अत्र मातारुद्राणामित्यनुमन्त्रणं नास्ति ।

हौत्रपद्धतिः ।

स्वः इति सकृच्छेषं पिबेत् । ततो ब्राह्मणायोच्छिष्टदानं सर्वपानं वा, अप्सु वा प्रक्षिपेत् । ततः (२)स्मार्तमाचमनम् ।

"ततः शन्नो देवीरभिष्टय(३) इत्याद्याभिर्ज्योक् च सूर्यं दृशे"इत्यन्ताभिर्हृदयस्थलमभिमृशेत् । "ॐ प्राणपा असि प्राणं मे पाहि" इति नासिके मुखं च युगपदभिस्पृशेत् । "ॐ चक्षुष्पा असि चक्षुर्मे पाहि" इति च

---

(१) ताम्बूलेक्षुफले चैव भुक्तस्नेहानुलेपने ।
सोमे च मधुपर्के च नोच्छिष्टं मनुरब्रवीत् । लघुहारीत १।३९ ।
"मधुपर्के तथा सोमे अप्सु प्राणाहुतीषु च ।
अनुच्छिष्टो भवेद्विप्रो यथा वेदविदो विदुः" । अङ्गिरास्मृ० ॥
"प्राणाहुतिषु सोमेषु मधुपर्के तथैव च ।
आस्यहोमेषु सर्वेषु नोच्छिष्टो भवति द्विजः" ॥

(२) स्मार्ताचमनं यथा—
"कृत्वाऽऽदौ पादशौचं विमलमथ जलं त्रिः पिबेदुन्मृजेद् द्विर्-
देशिन्यङ्गुष्ठयुग्मं सजलमभिमुखं नासिकारन्ध्रयुग्मम् ।
अङ्गुष्ठानामिकाभ्यौ नयनयुगयुतं कर्णयुग्मं कनिष्ठाङ्गुष्ठाभ्यां नाभिदेशे हृदयमथ तलेनाङ्गुलीभिः शिरोऽसौ" ॥
अशक्तौ त्रिः पीत्वा हस्तौ प्रक्षाल्य मुखं विमृज्य खानि स्पृशेदिति निर्णयसिन्धु-पूजाविधिनिरूपणे ११९२ पत्रे ।

(३) ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंयोरभिस्रवन्तु नः ॥ ईशानावार्याणां क्षयन्तीश्चर्षणीनाम् । आपो याचामि भेषजम् ॥ अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा । अग्निं च विश्वशम्भुवम् ॥ आपः पृणीत भेषजं वरूथं तन्वे मम । ज्योक् च सूर्यं दृशे ॥ (ऋ० १०।९।४-७) ।

आध्वर्यवपद्धतिः ।

ततोऽन्यो "गावो गावो गावः" इति । यजमानः "प्रतिगृह्यन्ताम्" । ततोऽर्घ्यः "ॐ माता रुद्राणां दुहिता वसूनाꣳ स्वसाऽऽदित्यानाममृतस्य नाभिः । प्रनुवोचं चिकितुषे जनाय मागामनागामदितिं वधिष्ट । मम चामुकशर्मणो यजमानस्य च पाप्मा हत" उपांशु "ॐ उत्सृजत" इति ब्रूयादुच्चैः ।

ततो यजमानेन दत्ते वाससी प्रतिगृह्य तयोरन्यतरत्परिदधाति "ॐ परिधास्यै यशोधास्यै दीर्घायुत्वाय जरदष्टिरस्मि । शतञ्च जीवामि शरदः पुरूची रायस्पोषमभिसंव्ययिष्ये" इति। तत आचमनम् ।

ततस्तदत्तं यज्ञोपवीतं "यज्ञोपवीतमि"ति मन्त्रेण (परिदधाति) "ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रति मुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेज" इति । तत आचमनम् ।

तत उत्तरीयम् "ॐ यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती । यशो भगश्च मा विदद्यशो मा प्रतिपद्यताम्" इति । द्विराचमनम् ।

दत्तं चन्दनमालिप्य जपति "ॐ सुचक्षा अहमक्षीभ्यां भूयासꣳ० सुवर्चा मुखेन । सुश्रुत्कर्णाभ्यां भूयासमि"ति ।

ततस्तथैव माल्यानि प्रतिगृह्णाति "ॐ या आहरज्जमदग्निः श्रद्धायै मेधायै कामायेन्द्रियाय । ता अहं प्रतिगृह्णामि यशसा च भगेन च" इति।

औद्गात्रपद्धतिः ।

एवं प्रस्तोतृप्रतिहर्तृसुब्रह्मण्यानां लौकिकं दैवं मानुषवरणमर्हत्वकर्म च भवति । तत्र विशेषः। "यशसो भक्षोऽसि महसो भक्षोऽसि श्रीभक्षोऽसि श्रियं मयिधेहि" इति मन्त्रेण मधुपर्कं त्रिर्भक्षयेयुः प्रस्तोत्रादयः तूष्णीं चतुर्थम् । मातारुद्राणामित्यनुमन्त्रणं न कुर्युः । गवि प्रोक्षायां कुरुतेति न ब्रूयुः कलौ निषिद्धत्वात् । "मुञ्चा गां वरुणपाशाद्विषन्तं मे धेहि । तञ्जह्यमुष्य चोभयोरुत्सृज(त) गामत्तु तृणानि पिबतूदकम्" इति प्रस्तोत्रादयो मन्त्रं ब्रूयुः ऋत्विजः प्राप्तत्वात् । अस्मिन् मन्त्रे अमुष्यपदे यजमानस्य षष्ठ्यन्तं नाम गृह्णीयात् । एको विदुरो द्वौ वा, स्मार्तसूत्रे गोभिले यज्ञे ऋत्विजां विशेष उक्तः ।

होत्रपद्धतिः ।

क्षुधी युगपत् । "ॐ श्रात्रपा असि श्रोत्रं मे पाहि" इति श्रोत्रे, प्रतिश्रोत्रमन्त्रावृत्तिः । "ॐ अनु नो मार्ष्टु तन्वो यद्विलिष्टं" इति मुखं विमृज्य ।

ततो यजमानेन "गौर्गौर्गौरि"त्युक्ते "ॐ मातारुद्राणामि"ति जपित्वा "ओमुत्सृजत तृणान्यत्तु" इति वदेत् । इति मधुपर्कः ।

आध्वर्यवपद्धतिः ।

तानि धारयति "ॐ यद्यशोप्सरसामिन्द्रश्चकार विपुलं पृथु । तेन सङ्ग्रथिताः सुमनस आबध्नामि यशो मयी"ति ।

ततो दातृदत्तकुण्डलादि मन्त्रावृत्त्या "ॐ अलङ्करणमसि भूयोऽलङ्करणं भूयादि"ति ।

ततो नैवेद्यं दत्तं प्रतिगृह्णाति । इति मधुपर्कः ।

अत्र वा स्वस्तिवाचनम् । यजमानाय सोमसमर्पणम् । यजमानस्य माङ्गल्यकरणम् ।

देवयजनप्रार्थना ।

ततो यजमानो देवयजनभूमिं गत्वा दैवर्त्विग्भ्यो मानुषेभ्यश्च देव यजनं प्रार्थयेत् । तत्र दैवप्रार्थनामुपांशु मानुषप्रार्थनामुच्चैः । तद्यथा—

उपांशु-अग्निर्मे होता स मे देवयजनं ददातु, उच्चैः होतर्देवयजनं मे देहि । एवं सर्वत्र । आदित्यो मेऽध्वर्युः स मे देवयजनं ददातु, अध्वर्यो देवयजनं मे देहि । चन्द्रमा मे ब्रह्मा स मे देवयजनं ददातु, ब्रह्मन् देवयजनं मे देहि । पर्जन्यो म उद्गाता स मे देवयजनं ददातु, उद्गातर्देवयजनं मे देहि । आपो मे होत्राशंसिनस्ते मे देवयजनं ददतु, होत्राशंसिनो देवयजनं मे दत्त । रश्मयो मे चमसाध्वर्यवस्ते मे देवयजनं ददतु, चमसाध्वर्यवो देवयजनं मे दत्त । दत्तमिति सर्वेषां यथायथं प्रतिवचनम् ।

औद्गात्रपद्धतिः ।

देवयजनप्रार्थना ।

अथ यजमानो "अग्निर्मे होता स मे देवयजनं ददातु" इत्युपांशूक्त्वा "होतर्देवयजनं मे देहीत्युच्चैर्ब्रूयात् । आदित्यो मेऽध्वर्युः स मे देवयजनं ददात्वि"त्युपांशूक्त्वा "ध्वर्यो देवयजनं मे देही"त्युच्चैः । "चन्द्रमा मे ब्रह्मा स मे देवयजनं ददात्वि"त्युपांशूक्त्वा, "ब्रह्मन्देवयजनम्मे देही"त्युच्चैः । "पर्जन्यो म उद्गाता स मे देवयजनं ददात्वि"त्युपांशूक्त्वा, "उद्गातदवयजनं मे देही"त्युच्चैः । "सदस्यपत्ते" "आकाशो मे सदस्यः स मे देवयजनं ददात्वि"त्युपांशूक्त्वा "सदस्य देवयजनं मे देही"त्युच्चैः । "आपो मे होत्राशर्ठ०सिनस्ते मे देवयजनं दद"त्वित्युपांशूक्त्वा "होत्राशर्ठ०सिनो देवयजनं मे दत्ते"क्त्युच्चैः । "रश्मयो मे चमसाध्वर्यवस्ते मे देवयजनं ददत्वि"त्युपांशूवा "चमसाध्वर्यवो मे देवयजनं दत्ते"त्युच्चैः । होत्रादीनां "दत्तमि"तिप्रतिवचनम् ।

आध्वर्यवपद्धतिः ।

ततो देवयजनं जोषयन्ते उच्चतमठं० सममविभ्रंश्यभितो देवयजनमात्रदेशं पुरस्ताद्वज्रं प्राक्प्रवणमुदग् वा यत्किञ्चानूचानर्त्विज उद्धतौषधिमूलेऽपरेऽन्ते विमितं कुर्वन्ति प्राग्वठं०शं पुरस्तादुच्चं प्रतिदिग्द्वारमुदग्वज्रं वा शालां वा परिवृते चोत्तरापरे सर्वत्र स्फ्येनारत्निना वा मानकरणम् ।

अध्वर्युर्यजमानो वा "अयन्त" इति गार्हपत्य एवाग्निमरण्योस्त्रिः समारोह्य सकृन्मन्त्रेण द्विस्तूष्णीम् । "ॐ अयन्ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तञ्जानन्नग्न आरोहाथानो वर्धया रयिम्" (शु०य० ३।१४) । सोमाधाने तु त्रयाणां समारोपः । देवयजनस्य दूरत्वे सभ्यावसथ्ययोः समारोपः, अन्यथा प्रत्यक्षावेव नेयौ ।

ततः सर्त्विक् सपत्नीकः सोपकरणो यजमान उदवसाय देवयजनं गत्वा शालास्तम्भं पूर्वार्ध्यं गृहीत्वा(१)ऽरणिपाणिराहेदमगन्मेति ।

"ॐ एदमगन्म देवयजनं पृथिव्या यत्र देवासो अजुषन्त विश्वे । ऋक्सामाभ्यांꣳ सन्तरन्तो यजुर्भी रायस्पोषेण समिषा मदेम" (४।१)॥

प्रविश्य उच्चासने शालायांꣳ राजानं निदधात्याहृतश्चेत् , प्राक्क्रयादन्नमुपहरन्त्यस्मै हविष्यममाꣳसं यजमानः "इदमन्नं सोमाय राज्ञे न ममेति" ।

कुण्डेषु भूसꣳस्काराः । अग्निमन्थनं गार्हपत्ये स्थापनम् । सभ्यावसथ्ययोः प्रत्यक्षयोर्मथित्वा वा स्वे स्वे कुण्डे निधानम् । आहवनीयस्य सप्तसु प्रक्रमेषु कल्पनम् । आहवनीयदक्षिणाग्न्योर्विहरणम् । यजमानोऽपराह्णेऽश्नातीष्टमुपपन्नं वा न वा पत्नी च ।

औद्गात्रपद्धतिः ।

अथोद्गाताऽऽत्मनो देवयजनगमनकालात् प्राक् तत्तत्कर्मानुष्ठानार्थं प्रस्तोतृसुब्रह्मण्यौ देवयजनं प्रति प्रेषयित्वा स्वगृहं गच्छेत् । यजमानस्य देवयजनयाचनाभावपक्षे तु उद्गातुः सोमप्रवाकाभिमन्त्रणम् । अन्नादिदानम् । कर्मारम्भात्पूर्वं प्रस्तोतृसुब्रह्मण्ययोः प्रेषणम् । स्वस्य क्रय औपवसथ्ये वा गमनम् । दैवमानुषवरणम् । मधुपर्कभक्षणम् । तानूनप्त्रादि सर्वम् , यद्यौपवसथ्ये गमनं तदा तानूनप्त्रादिनिवृत्तिः, सर्वेषामार्त्विज्योपक्रमवेलायां यज्ञोपवीतं चाचमनं च कर्तव्यम् । कर्मानुष्ठानकाले यज्ञाङ्गानामव्यवाय आभिमुख्यं च । प्राङ्मुखैश्च कर्म कर्तव्यमनादेशे ।

(१) अनेकयजमानके च सर्वेऽरणिपाणयो मुख्यं गृहपतिं शालास्तम्भग्रहणं कुर्वाणमन्वारभन्ते, तदेतत्सूत्रकारो वक्ष्यति "अविभवति गृहपत्यन्वारम्भ (का० श्रौ० १२।१।१३ इति ।

आध्वर्यवपद्धतिः ।

ततः कस्मैचित्समर्थाय क्रत्वर्थमपदिशति "क्रत्वर्थं मे गोपाय" "गोपायामी"ति तत्प्रतिवचनम् । "यथाकालर्ठ० सम्पादय" "सम्पादयामी"ति सः ।

अथाप्सुदीक्षा

तत उत्तरे परिवृत उदकुम्भस्त्य्य्युदीक्षा । तत्र मध्यगर्त उदकुम्भस्थापनम् । तदुत्तरतो नखनिकृन्तनकङ्कतोदपात्रकुशतरुणक्षुरौदुम्बरदन्तधावनकाष्ठदीक्षावाससामुपकल्पनम् । नापित उपतिष्ठति उपकल्पितानामुत्तरतः प्राङ्मुखो यजमान उदङ्मुखोऽध्वर्युः यजमानस्य नखानि निकृन्तन्त्यङ्गुष्ठ(ष्ठ)य प्रभृतीनि दक्षिणहस्तस्य प्रथमं ततः सव्यहस्तस्य ततो दक्षिणवामपादयोः । कङ्कतेन दक्षिणगोदानं वितार्योदपात्रोदकेनोनत्तोमा आप इति "ॐ इमाऽआप शमु मे सन्तु देवीः" (४।१) यूपवत् (का० श्रौ० सू० ६।१।१२) कुशतरुणं प्रागग्रमन्तर्धाय "ॐ ओषधे त्रायस्व" (४।२) क्षुरेण चाभिनिधाय तूष्णीम् । "ॐ स्वधिते मैनर्ठ० हिर्ठ०सीः" (४।२) । छित्वोदपात्रे प्रास्यति एवमुत्तरं तूष्णीम् । नापिताय क्षुरं प्रयच्छति तेन केशश्मश्रु वपति ।

ततो लौकिकाभिरद्भिः स्नानम् । औदुम्बरेण दन्तधावनम् । स्मार्तात्रमनम् । उदकुम्भोदकेना(१)पो अस्मानिति स्नात्वा "ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु । विश्श्वर्ठ० हि रिप्रम्प्रवहन्ति देवीः" (४।२) । उदिदाभ्य इत्युत्क्रामत्युत्तरपूर्वार्धे "ॐ उदिदाभ्यः शुचिरापूत एमि" (४।२) । क्षौमं वस्ते निष्पेष्टवै ब्रूयादहतं चेदद्भिरभ्युक्ष्य स्नातवस्यं वाऽमौत्रधौतं विचितकेशं प्रसारितदशं दीक्षातपसोरिति "ॐ दीक्षातपसोस्तनूरसि तान्त्वा शिवाꣳ शग्म्माम्परिदधे भद्रं वर्ण्म्पुष्यन्" (४।२) । न नीविं कुरुते । स्मार्तं द्विराचमनम् । यशसा मेत्युत्तरीयम् । "यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती । यशो भगश्च मा विदद्यशो मा प्रतिपद्यताम्" (पा० गृ० सू० २।६।२१) ।

एवं प्रतिप्रस्थाताऽपरस्मिन् परिवृते पत्नीं तूष्णीं वपनं वा, तत्रोदकुम्भनखनिकृन्तनौदुम्बरदन्तधावनकाष्ठदीक्षावाससामुपकल्पनम् । पूर्ववन्नखनिकृन्तनम् । हस्तपादप्रक्षालनम् । आचमनम् । दन्तधावनम् । गण्डूषकरणम् । द्विराचमनम् । उदकुम्भोदकेन स्नानम् । उत्तरपूर्वार्द्धे उत्का-

---

(१) न तु कुम्भोदकेन स्नानमविधानात् । उदकुम्मनिधानन्वदृष्टार्थं सोमक्रयवदिति देवयाज्ञिकः ।

आध्वर्यवपद्धतिः ।

मणम् । वाससः परिधानम् । आचमनम् । उत्तरीयधारणम् । द्विराचमनम्(१) ।

ततोऽध्वर्युः प्रागूद्वारेण बाहुगृहीतं यजमानं विमितं प्रापद्य प्रतिप्रस्थाता चापरद्वारेण पत्नीं दीक्षणीयया चरति ।

अथ दीक्षणीयेष्टिः ।

तत्र यजमानोऽध्वर्युर्वा गार्हपत्यस्य पश्चात्पृष्ठ्योत्तरत उपविश्य षट्समिधो गृहीत्वा करिष्यमाणावधारणं कुर्यात् । अस्मिन्नग्निष्टोमसंस्थे ज्योतिष्टोमे ये केचन वैकल्पिकपदार्थास्त ऋत्विक्प्रत्ययेन मयाऽवधारिताः । तत्र दीक्षणीयादीष्टिषु ब्रह्मवरण—(२)व्रतग्रहण—जपदक्षिणा(३)—वेद्यालम्भ—समिष्टयजुरागमभावः । वाचस्पतिप्रैषस्तु भवत्येव, (४)प्रायणीयादिष्वन्वाधानस्याप्यभावः । अग्नाविष्णू एकादशकपालेन पुरोडाशेन, पत्ते-आदित्यान् चरुणा सद्योऽहं यक्ष्ये । सप्तदशो वज्रः, व्रीहिभिर्यागः, ममाग्ने पक्षः, उत्तमे काले व्रतोपायनम् , ममाग्न इत्यादि षडासनम् , न ब्रह्मवरणम् , वाचस्पतिप्रैषः, प्रणीताप्रणयनम् , अग्नीनां परिस्तरणम् । पात्रासादने विशेषः-एकादशकपालानि, पुरोडाशपात्रेका, नान्वाहार्यपात्रम् , न च तण्डुलाः, पत्ते-उपकल्पनीयानि,

---

(१) पत्न्यश्चेज्ज्येष्टादिक्रमेण काण्डानुसमयेन सर्वासामप्सुदीक्षा ।

(२)सत्यवदनब्रह्मचर्यादिसङ्कल्परूपं व्रतं सोमार्थं पूर्वमुपेतम् । तच्चासोमसमासेनपरित्यक्तव्यम् । तत्र पुनरुपायनं विरुध्यते । "अग्ने व्रतपते व्रतञ्चरिष्यामि" (सं० १।५) इत्ययमुपायनमन्त्रः न हि चर्यमाणे व्रते "चरिष्यामि" इति प्रयोगः सम्भवति । तस्मात्प्रसङ्गसिद्धमिति भावः । तथा हि जैमिनिः—"तथा व्रतमुपेतत्वात् । विप्रतिषेधाच्च । सत्यवदिति चेत् । न संयोगपृथक्त्वात्" (१२ । १ । २०-२३) इति ।

(३)सोमयागान्तः पातिनीष्विष्टिष्वन्वाहार्यो दातव्यो न वेति संशये-"चतस्रो वै दक्षिणा हिरण्यं गौर्वासोऽश्व" (श० ४।३।४।७) इत्यादिदक्षिणा प्रधानस्यैव । न त्वङ्गानां, "दक्षिणा सोमस्य" इत्यभिधानात् । अत इष्टिषु चोदकप्राप्तोऽन्वाहार्यो दातव्य इति पूर्वः पक्षः । अत्रोच्यते—दाशमिकदक्षिणान्यायेन (१०।२।८।) ऋत्विग्दानमानन्त्यर्थं, सोमयागमध्यपातिनीषु पृथगानन्त्यभावाच्च दातव्य इति जैमिनेः (१२।१।१६) सिद्धान्तः ।

(४) अत्र दीक्षणीयादिष्वन्वाधानं कर्तव्यं न वेति संशये चोदकप्राप्तत्वात्कर्तव्यमिति प्राप्ते—अग्निधारणार्थमन्वाधानं कर्तव्यम् । तच्च धारणं दीक्षणीयायां कृतं तस्मादन्वाधानं नास्तीति सिद्धान्तः । तथाहि जैमिनिः—"धारणार्थत्वात्सोमेऽन्यन्वाधानं न विद्यते" (१२ । १ । १९) इति । "अग्न्यन्वाधानव्रतोपायनारण्यभोजनदानब्रह्मवरणानि दीक्षणीयाप्रभृति प्रागुदवसानीयायाः सोमे कृतत्वात्" (८ । १ । ४) इति कात्यायनसूत्रं व्याचक्षाणः कर्काचार्यः "कृतत्वादिति अत्र न सम्भवतीत्यतः प्रभृतिशब्दः प्रायणीयादि विषयो द्रष्टव्य" इति वदन् दीक्षणीयायां अन्वाधानं विद्यत एव, प्रायणीयाप्रभृत्येव तु तन्निषेध इत्यभिप्रैति ।

आध्वर्यवपद्धतिः ।

इध्मबर्हिः, पडवत्तम्, पत्ते-चरुस्थालीमेक्षणम्, (पोतकं चालनीं च) नवनीतम्, त्रैककुदाज्यनम्, एकविंश० शतिः कुशपवित्राणि, कृष्णाजिनद्वयम्, एकं वा, मेखला, उष्णीषं, कृष्णविषाणा, दीक्षितदण्डः, सतन्त्राया दीक्षणीयायाः उपांशुचरणम्, वागन्तेन वा, शूर्पाग्निहोत्रहवणयादानादि। धूरीषारोहणे-देवयोरसीत्यृहः। चरुपत्ते अनूहः। ग्रहणे-देवाभ्यां अग्नाविष्णुभ्यां जुष्टं गृह्णामि। पत्ते-आदित्येभ्यो जुष्टं गृह्णामि। प्रोक्षणे-त्वाधिकः। मुसलावधाने-स इदं देवाभ्यां०, पक्षे-अनूहः, तत्रैव पत्ते चर्वर्थपुरोडाशीयानां विभागः इदमग्नाविष्णवोः, इदमादित्यानाम्, दृषदि धान्यावापे-धिनुहि देवौ, पुरोडाशस्यैकत्वादनिर्देशः, आज्याधिश्रयणमग्नीधः, चरुपत्ते ब्रह्मणः, पत्ते-चरोः, (१)संयवनप्रथनाद्भिरभिमर्शनाभिवासनानाऔद्गात्रपद्धतिः ।

अथ दीक्षणीयेष्टिः ।

अथ दीक्षणीयेष्टौ प्रस्तोता पूर्वमवृतश्चेदिदानीं वृतः सन् 'प्रस्तोतरेहि, इत्यामन्त्रितः पूर्वया द्वारा पत्नीशालां प्रविश्योत्तरेणाग्नीन् गत्वा गार्हपत्यस्य पश्चादुपविश्य प्रधानयागकाले त्यमूष्विति तादृस्सामनी मध्यमस्वरेण प्रत्येकं त्रिरुद्गायेत् ।

हौत्रपद्धतिः ।

अथ दीक्षणीयेष्टिः ।

अपराह्णे दीक्षणीयाग्नावैष्णवेष्टिः । एहि होतरित्यामन्त्रितो होताचम्य तीर्थेन प्रविश्य कं प्रपद्यादि (२)पञ्चदश सामिधेन्यः उपांशु हविः, आवाहने-अग्निमग्न आ ४ वह सोममा ४ वह (उपांशु) अग्नाविष्णू (उच्चैः) आ ४ वह देवानित्यादिसमानम् ।

उत्तमे प्रयाजे—भूर्भुवः स्वर्यं ४ यजामहे स्वाहाऽग्निं स्वाहा सोमं

---

(१)"आदित्येभ्यश्चरुं निर्वपन्ति (श० ३ । १ । ३ । २) इत्यादिवाक्ये चरुशब्दः किं स्थालीं वक्ति उत ओदनमिति सन्देहे लौकिकाश्चरुशब्दमल्प पात्रे प्रयुञ्जते। तस्या अदनीयत्वाभावेन पुरोडाशविकृतित्वं मा भूत् किन्तु श्रपणयोग्यतायाः सद्भावात्कपालविकृतित्वं भविष्यति। तस्मात्—चरुः स्थाली इति पूर्वः पक्षः। अन्नमेव चरुशब्देन उच्यते "अदितिमोदनेन" इति वाक्यशेषे ओदनशब्देन चरुरनूद्यते। निघण्टुकारा अपि "हव्यपाके चरुः पुमान्" इति (अमरकोषे २ । ७ । २२) पठन्ति, तस्मात् चरुशब्दोऽन्नवाचीति (जै० १० । १ । १०) राद्धान्तः। तस्य च स्थाल्यामेव (जै० १०।१।११) पाकः कर्तव्यः।

चरौ पेषणादिकं कर्तव्यं न वेति सन्देहे चरोः पुरोडाशविकृतित्वात् पुरोडाशे च पेषणादीनां सत्वात् अतिदेशेनात्र प्राप्तौ पेषणसंयवनोपधानादीनि कर्तव्यानीति प्राप्ते—तेषामर्थलोपादकरणमिति जैमिनेः (१० । १ सू० ४९-५८) सिद्धान्तः ।

(२) कात्यायनानां शतपथोक्तेः (३।१।३।६) सप्तदश सामिधेन्यः ।

आध्वर्यवपद्धतिः ।

भावः । प्राणदाने-यस्ते०-त्वाग्नाविष्ण गच्छ स्वर्य० । पत्ने-आदित्यान् गच्छ० । सप्तदशेन वज्रेणेत्यवबाधनम् । उत्तमे प्रयाजे-इदमग्नये सोमाय-याग्नाविष्णुभ्यां, पत्ने-आदित्येभ्यः देवेभ्य आज्यपेभ्य इत्यादि । कालेप्रस्तोतुः सामगानं, प्रधानयागे अग्नाविष्णुभ्यामनुब्रूहि अग्नाविष्णू यज निधनवषट्कारसमकालं यागः । इदमग्नाविष्णुभ्यां पत्ने-आदित्येभ्योऽनु-

औद्गात्रपद्धतिः ।

तार्क्ष्यसाम्नोस्तार्क्ष्यऋषिस्त्रिष्टुप् छन्दः इन्द्रो देवता दीक्षणीयायामिष्टौ विनियोगः ।

त्यमू॑षु । वाँ॑जि । ना ३४५ म । देवँ॑जूतां २३४ म् । सँ॑हो वाँ॑नेन्ता । रु॑ता ३। रँ॑थानाम्। अरिष्ट॑ना २३४ यि॑मम्। पृ॑तना ३४३ जमाशुम्। स्वँ॑स्ते । यायि । तार्क्ष्यामिहा॑ ३४३ । हे ३ वा ५ इमा ६५६ ॥ १ ॥

ईयइया ३ हाइ । त्यमू॑षुवाँजिना ३० दे ३ वजूँतम् । इ ४ यँ ईया । हा॑ २३४ इ । सँ॑होवाँनेन्ता । रु॑ता ३। रँ॑थानाम् । ईय इया ३ हाई । अरिष्टा ३ नायि । मी ३० पृत । नाजमाशुम् । इ ४ यँईया । हा॑ २३४५ इ । स्वँ॑स्ते । यायि । तार्क्ष्यामिहा॑ ३४३ । हे ३ वा ५ इमा ६५६ ॥ २ ॥ (१)

हौत्रपद्धतिः ।

स्वाहा (उपांशु) अग्नाविष्णू (उ०) स्वाहा देवा इत्यादि समानम् । वार्त्रघ्नावाज्यभागौ—

अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया । समिद्धः शुक्रऽआहुतो४म् (ऋ० ४।५।२७।४) । त्वष्टं० सोमासि सत्पतिस्त्वष्टं० राजोत वृत्रहा । त्वं भद्रो असि क्रतो४म् ॥

ततः प्रधानम् । (उपांशु) अग्नाविष्णुभ्यां (उच्चैः) अनुब्रू४हीत्युक्ते-

(उपांशु) अग्नाविष्णू महि तद्वां महित्वं पातं घृतस्य गुह्यानि नाम । दमे दमे सुष्टुतिर्वामियानोपवां जिह्वा घृतमाचरण्या४ओम् । इयं पुरोऽनुवाक्या । "ॐ अग्नाविष्णू महि धाम प्रियं वां वीथो घृतस्य गुह्या जुषाणा । दमे दमे सप्त रत्ना दधाना प्रति वां जिह्वा घृतमुच्चरण्या४त् (उच्चैः) वौषट् । इयं च याज्या (शां०श्रौ०२।४।४) । अत्र प्रस्तोतुर्निधनेन सह वषट्कारं ब्रूयात् । ततो विराजौ(२) स्विष्टकृतो नित्ये वा । अग्नये

---

(१) छ० आ० ४।१।५।५।१ = गे० ९, १,१—२—२ ।

(२) प्रेद्धो अग्न (ऋ० ६।१।५।१४) इमो ऽअग्न (ऋ० ७ । १ । १८) इति विराजौ स्विष्टकृतो याज्यानुवाक्ये भवतः शाखान्तरात् ।

आध्वर्यवपद्धतिः ।

ब्रूहि । आदित्यान्यज । इदमादित्येभ्यो । स्विष्टकृदादि । (१)द्विदेवत्यत्वाच्चतुर्द्धाकरणाभावः । बहुदेवत्यत्वाच्चरोरपि । न दक्षिणा । उल्मुकसम-

हौत्रपद्धतिः ।

स्विष्टकृतेऽनुब्रूहीत्युक्ते—

ॐ पिप्रीहि देवाँ उशतो यविष्ठ विद्वाँ २॥ ऋतूँ २॥ ऋतुपते यजेह । ये दैव्या ऋत्विजस्तेभिरग्ने त्वर्ठ० होतृणामस्या यजिष्ठोऽम्। (का०हौ०१।११)।

ततो"ऽग्निꣳस्विष्टकृतं यज" इत्युक्ते भूर्भुवःस्वर्ये यजामहेऽग्निꣳस्विष्टकृतमयाडग्निरग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्ययाट् (उपांशु) अग्नाविष्णवाः (उच्चैः) प्रिया धामान्ययाट् देवानामित्यादि प्रकृतिवत्।

अग्ने यदद्य विशो अध्वरस्य होतः पावक शोचे वेष्वर्ठ० हि यज्वा । ऋता यजासि महिना वियद्भूर्हव्या वह यविष्ठ या ते अद्या ४वौषट्-(मं०६ सू०१५ऋक्१४) ।

इडोपाह्वाने विशेषः-उपहूतं बृहदित्यादि देवपुत्र इत्यन्तं प्रकृतिवत्कृत्वा उपहूतोऽयं यजमानोऽस्य यज्ञस्यागुर उद्वचमशीयेति तस्मिन्नुपहूतः । भक्तः । मार्जनम् । दक्षिणा न भवति। एषा ते० हि । त्रयोऽनुयाजाः । सूक्तवाके-अग्निर्हविरजुषतावीवृधत महो ज्यायोऽकृत सोमो हविरजुषता वीवृधत महोज्यायोऽकृत (उपांशु)अग्नाविष्णू (उच्चैः)हविरजुषेतामवीवृधेतामहोज्यायोऽकृातां देवा आज्यपा आज्यमजुषन्तावीवृधन्त महोज्यायोऽकृत अग्निर्होत्रेणेदर्ठ० हविरजुषतावीवृधत महो ज्यायोऽकृत अस्यामृधेद्धोत्रायां देवंगमामाशास्तेऽयं यजमानोऽस्य यज्ञस्या गुर उद्वचमशीयेत्याशास्ते यदनेन हवि०(२) देवेभ्यः । नमः उपतृच्छ्यो० दे । उद्० ।

---

(१) प्रकृतौ "आग्नेयं चतुर्द्धा करोति" (आप० श्रौ० सू० ३ । ३ । २) इति श्रूयते । तत्राविशेषात्सर्वत्र चतुर्धाकरणं कर्तव्यमुत आग्नेय एवेति संशये-आग्नेयवैष्णवाग्नीषोमीययोरपि पुरोडाशयोरग्निसम्बन्धात्, "तच्चतुर्धा पुरोडाशं कृत्वा बर्हिषदं करोति" (श० १ । ८ । १ । ४०) इति श्रुत्या पुरोडाशसामान्य एव चतुर्द्धाकारणश्रवणाच्च पुरोडाशत्रय एव चतुर्धाकरणं कार्यमिति पूर्वः पक्षः। आग्नेये पुरोडाशे एव अग्निदेवताया मुख्यः सम्बन्धः,। यद्यपि माध्यन्दिनशाखायां पुरोडाशमात्रे श्रवणमस्ति तथापि शाखान्तरे "आग्नेयं चतुर्धा करोति' इति विशेषस्यैव श्रवणात् "सामान्यविधिरस्पष्टः संहियेत विशेषतः" (तन्त्र वा० ३।४।४७) इति न्यायेन सामान्यस्य पुरोडाशवाक्यस्य विशेषेण आग्नेयवाक्येन एकदेवत्ये आग्नेयमात्रे सङ्कोचादाग्नेयमात्रस्यैव चतुर्धाकरणमिति (जै० ३।१।१५) सिद्धान्तस्तद्वदत्रापीति भावः ।

(२) पाऽऽशास्ते तदश्यात् तद् ऋध्यात् तदस्मै देवा रासन्तां तदग्निर्देवो देवेभ्यो

आध्वर्यवपद्धतिः ।

सनादि । व्यूहने-अग्नाविष्णवोरु०,अग्नाविष्णू तमपनुदताम् । पक्षे-अग्नाविष्णवोरादित्यानामु० । अग्नाविष्णू आदित्यास्तमपनुदन्तु० । अभ्युक्ष्य जुह्वेत्यादि वेद्यालंभवर्जं प्राक् समिष्टयजुषः (१)कृत्वा होतृप्रायश्चित्तान्ते, शालां पूर्वेण बहिः कुशास्तरणं, तेष्ववस्थितं प्राङ्मुखं यजमानं नवनीते नाभ्यङ्क्ते शीर्ष्णोऽध्यनुलोमर्ठ० सपादको महीनां पयोसीति "ॐ महीनां पयोऽसि व्वर्चोदा असि व्वर्चो मे देहि" (४।३) । यजमानः स्वयमेव

हौत्रपद्धतिः ।

पत्नीसंयाजान्ता । पत्नीवेदवाचनं स्तरणं च न भवति वेदशेषविमोकआहवनीयोपस्थानस्थितिनिवृत्तिः अध्वर्युमन्वारभ्यौद्ग्रभणानि जुह्वन्तं

वनुतां वयमग्नेः परिमानुषाः इष्टं च वित्तं चोभे चैनं द्यावापृथिवी अर्ठ० हस्पतामिह गतिर्वामस्येदं च नमो देवेभ्यः (का० हौ० प० १।८) (शां० श्रौ० १ । १४ । ११) ।

(१) अग्नाग्नावैष्णवेष्टौ प्रकृतिवत्सर्वाङ्गेषु प्राप्तेष्वाह कात्यायनः—"प्राक् समिष्टयजुषः करोति" (७।२।२६) । समिष्टयजुषः प्राक् यान्यङ्गानि तान्येव करोति ।

ननु समिष्टयजुर्मांत्रस्य प्रतिषेधः "समिष्टयजुरेव न जुहोति नेदिदं दीक्षितवसन परिधाय पुरा यज्ञस्य सꣳस्थाया अन्तं गच्छानीत्यन्तो हि यज्ञस्य समिष्टयजु" (श० ब्रा० ३।१।३।६) रिति । 'सत्यमेतत्, पुरा यज्ञस्य संस्थाया अन्तगमनदोषो मा भूदित्येतत्कारणमुपदिष्टं, ततश्च समिष्टयजुषि कृते यद्यन्तगमनं तर्हि तदुत्तरेषु पदार्थेषु क्रियमाणेषु सुतरामन्तगमनं भवति अतः साधूक्तं 'प्राक् समिष्टयजुष' इति । "समिष्टयजुर्वर्जं वा" (का० ७।२।२६) । अथवा समिष्टयजुर्वर्जयित्वाऽन्यत्सर्वं कर्मापवर्गान्तं भवति तन्मात्रस्य प्रतिषेधात् । एवं पक्षद्वयोपन्यासे कृते यः पक्षः श्रेयान् स एवाभ्युपगन्तव्यः । कश्चासौ प्राक् समिष्टयजुषः करोतीति । अत्राहुर्हरिस्वामिनः—'तस्य सप्तदश सामिधेन्यो भवन्ति । उपाꣳशु देवतं यजती"ति (श ३।१।३।६) अत्र सप्तदशउपांशुत्वयोर्विधिः इतरेषामनुवादः प्राप्तत्वात् । "समिष्टयजुरेव" (श० ३।१।३।६) ति समिष्टयजुरादिपदार्थकाण्डावलोपविधिः । कुत एतत् तदन्तार्थवादात् । "अन्तो हि यज्ञस्य समिष्टयजु" (श० ३।१।३।६) रिति । यत्र हि औपचारिकाऽप्यन्तः परिहीयते समिष्टयजुस्तत्र पारमार्थिको ब्राह्मणतर्पणरूपो न परिहीयते इति का युक्तिः, तथा सुरेष्वागतेषु यज्ञमपह्नुवानाः समिष्टयजुर्वर्जं करिष्यन्तीत्यनुपपन्नं यत्तु "समिष्टयजुरेव ने" ति तद्धविराहुत्यन्तरापेक्षयावधारणम् । ये तु समिष्टयजुर्वर्जं क्रियां मन्यन्ते तेषामत्र "समिष्टयजुरेवे" त्ययमनुवादो भवति ध्रौवस्यार्थान्तरे औद्ग्रभणहोमे विनियोगात् (का० ७।३।१६) । समिष्टयजुषः सामर्थ्यादेव निवृत्तेः । "नेदिदं दीक्षितवसन" मिति प्रारम्भ एवान्तगमनरूपं नकार्यमित्यर्थः। तथाचापस्तम्बसूत्र (१०।४।७) मानवसूत्रयोः-"पत्नीसंयाजान्ता दीक्षणीया सन्तिष्ठत" इति "पञ्चदश सप्तदश वा सामिधेन्य" इति च । अतएव पुरा यज्ञस्य संस्थाया अन्तगमननिषेधाद्दीक्षणीयायाःप्रभृत्यनूबन्ध्यायाः प्राक् कस्यापि कर्मणः समिष्टयजुः प्रभृति कर्मापवर्गान्तं कर्म न भवति समानन्यायात् । तद्यथा-दीक्षणीया दक्षिणाग्निहोमान्ता (श० ब्रा० ९।५।१।१९) प्रायणीया अध्वन्ता (श०

आध्वर्यवपद्धतिः।

वृत्रस्येत्यद्यावनक्ति त्रैककुदाञ्जनेनाभावेऽन्यद् द्विर्दक्षिणं त्रिरुत्तरं परा-क्सक्तुत्सकृन्मन्त्रः शरेषीकया साग्रया "ॐ वृत्रस्यासि कनीनकश्चक्षुर्दा-ऽसि चक्षुर्मे देहि" (४ । ३) अध्वर्युः कुशपवित्रैश्चित्पतिमैति पावयति

९ । ५ । १ । २०) आतिथ्येष्टान्ता (श० ९ । ५ । १ । २१) उपसत्प्रधानयागान्ता (श० ९ । ५ । १ । २२) अग्नीषोमीयो दक्षिणाग्निहोमान्तः (श०९।५।१।२३) सवनीयपशुरनुबन्ध्यपशुश्च समिष्टयजुरन्तौ-सवनीयपुरोडाशाः पशुपुरोडाशाश्चेष्टान्ताः। यत"स्ते दीक्षणीयां निरवप"न्नित्यादि (श०९ । १ । ५।१ । १९) श्रुत्या दीक्षणीयाप्रायणीयादीनां तृतीयसवनान्तानामन्तलोप उच्यते । पश्चाच्च "ते देवा अब्रुवन् । ये न इमे यज्ञाः सामि सꣳस्थिता यानिमान्त्विजहतोऽगामोप तज्जानीत यथेमान्त्स ꣳ स्थापयामे" (श०९।५।१ ।२८) ति विमर्शपूर्वकं "ते चेतयमानाः एतानि समिष्टयजूꣳष्यपश्यंस्तान्यजुहवुस्तैरेता-न्यज्ञान्त्समस्थापयन्" "ते वा एते नवयज्ञाः नवैतानि समिष्टयजूꣳषितद्यदेतानि जुहो-त्येतानेवैतद्यज्ञान्त्स ꣳस्थापयती" (श० ९।५।१।२९-३०) ति सर्वेषां दीक्षणीयादीनां तृतीयसवनान्तानां संस्थितानां सहैव संस्थापनं विधीयते । अत एव यज्ञसमाप्तेरर्वागन्त-गमनस्य निषेधाच्चयनेऽपि शतरुद्रियादिषु सर्वजुहोतिषु दर्शपूर्णमासधर्मत्वेऽपि समिष्टय-जुषः पूर्णपात्रादि कर्मापवर्गान्तस्य चाभावः । एवं वाजपये नैवारबाहस्पत्यचरौ राजसूया-न्तर्गतमैत्रावरुणपयस्यादौ च द्रष्टव्यम् । समानन्यायात् । सर्वयज्ञसंस्थायां तु सर्वं समि-ष्टयजुरादि कर्मापवर्गान्तं क्रियते सर्वयज्ञसंस्था चानूबन्ध्यान्ते भवति तां तु प्रकृत्य "ताꣳहि सर्वोऽनुयज्ञः सन्तिष्ठत" इति श्रवणात् अतोऽनुबन्ध्यान्ते सर्वसाधारणं पूर्णपात्रनिनयनादि कर्मापवर्गान्तं समापनीयम् । हरिस्वामिभिरप्यग्नीषोमीयस-वनीयानूबन्ध्यसाधारणस्य शूलावभृथस्यानूबन्ध्यान्ते सिद्धान्तीकृतत्वाच्च । अ-नूबन्ध्याभावे पयस्यान्ते पूणपात्रनिनयनादि कर्मापवर्गान्तमनुष्ठेयं अनूबन्ध्याया स्थाने तस्याः (का०१०।९।१५) विहितत्वात् । सूत्रकारस्याप्ययमेवाभिप्रायो गम्यते यत्प्रा-गुदवसानीयायाः कस्यापि कर्मणः समाप्तिर्न भवतीति । "अग्न्यन्वाधानव्रतोपायनारण्य-भोजनदानवह्नयवरणानि दीक्षणीयाप्रभृति प्रागुदवसानीयायाः कृतत्वात्" (का० श्रौ० ८। १।४) । इत्यनेनाग्न्यन्वाधानादीनां प्रागुदवसानीयायाः प्रतिषेधात् । (महर्षिजैमिनेरपि बहुभिर्न्यायैं (१२।१।१०-११।१४।१६) स्वयमेव सिद्धान्तः।) तेनैवं विज्ञायते एतावत्पर्यन्त-मग्न्यन्वाधानं व्रतोपायनादिसाधारणमिति तेन समाप्तिरपि प्रागुदवसानीया या एव सर्व-साधारणी युज्यते। अत एव श्रूयते "ताꣳहिसर्वोऽनुयज्ञः संतिष्ठत"इति। यथा द्वादशाहाद्य-हर्गणेषु "पत्नीसंयाजान्तान्यहानि सन्तिष्ठन्त"इति पत्नीसंयाजान्तानां सर्वेषामसाधारणं दक्षिणाग्निहोमादि कर्मापवर्गान्तं सर्वमन्त्येऽहनि समाप्यते (जै० ९।१।९) । एवम-त्रापि येषां सोमान्तर्गतादीनां दीक्षणीया-पशुपुरोडाश सवनीयपुरोडाशशतरुद्रियादि जु-होति-बार्हस्पत्यचर्वादीनामनन्तापच्छिन्नानां पूर्णपात्रकर्मापवर्गान्तमपेक्ष्यते तत्सर्वमनु-बन्ध्यान्ते पयस्यान्ते वा सर्वसाधारणं समापनीयमिति सिद्धम् । अन्तापच्छिन्नानां प्रायणीयातिथ्योपसदग्नीषोमीयसवनीयानूबन्ध्यपशुतत्पुरोडाशानां तु तदपेक्षैव नास्ति। न हि दीक्षणीया कस्यापि भाष्यकारस्य मतेऽन्तापच्छिन्ना । सर्वैरपि समिष्टयजुर्वेज बा

आध्वर्यवपद्धतिः ।

सप्तभिः सप्तभिः प्रतिमन्त्रमच्छिद्रेणेति(१) सर्वत्र द्विरुपरिनाभ्युन्मृज्य प्रदक्षिणम् "ॐ चित्पतिर्मा पुनात्वच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् (७।४)। पुनर्द्वितीयं सप्तकं गृहीत्वा तथैवोपरिनाभि "ॐ वाक्पतिर्मा पुनात्वच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् (४।४)। ततस्तृतीयं गृहीत्वा सकृदवाङ्नाभेः "ॐ देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम्" (४।४)। कुशपवित्रत्यागः । एकेन त्रिभिः सप्तभिर्वैकशतेन वा राजसूये । आ वो देवास इति वाचयति(२) यजमानम् ।

"ॐ आ वो देवास ईमहे वामं प्रयत्यध्वरे । आ वो देवास आशिषो यज्ञियासो हवामहे" (४।५) इति ब्रूहि । यजमानः "ॐआ वो देवास ईमहे वामं प्रयत्यध्वरे । आ वो देवास आशिषो यज्ञियासो हवामहे" । स्वाहा यज्ञमित्यङ्गुली अचते नानाहस्तयोरेवर्ठ० शेषं प्रतिमन्त्रम्। तत्रादौ

हौत्रपद्धतिः ।

यजमानं(३)तदुह स्माह कौषीतकिर्न होतव्या इति श्रुतेः । इति प्रथममहः ।

कर्मापवर्गान्तं पूर्वं कर्तव्यमित्यस्य पक्षस्य सिद्धान्तीकृतत्वात् प्रायणीयादिवत् प्रत्यक्षवचनाभावाच्च । तेन "नेदिद"मिति वचनात्समिष्टयजुरादिकं सर्वं तस्या अवशिष्यते । अनेनैव न्यायेनाग्नीषोमीयपशुपुरोडाशादीनामप्यवशिष्यते तत्र समिष्टयजूंषि सर्वसाधारणान्येव सुत्यान्ते हूयन्ते "तद्यदेतानि जुहोत्येतानेवैतद्यज्ञान् सर्वꣳस्थापयती" (श०९।५।१।३०) ति वाक्यात् । इतरत्पूर्णपात्रादिकर्मापवर्गान्तमनूबन्ध्यान्ते तन्त्रेण सर्वसाधारणं समाप्यत इति निरवद्यं, अनूबन्ध्याभावे पयस्यान्ते । पूर्णपात्रस्यासादनप्रोक्षणे अपि अनूबन्ध्यापशुपुरोडाशपात्रासादनकाले पयस्यायां कर्तव्ये लाघवान्निनयनसन्निधानानुग्रहाच्चेति दिक् ।

(१) "अनुषङ्गो वाक्यसमाप्तिः सर्वेषु तुल्ययोगित्वादि" (जै० २।१।४८)ति न्यायादत्र अच्छिद्रेणेत्यादेः मन्त्रत्रयेष्वनुषङ्गो भवति ।

(२) "अथाशिषामारम्भो वाचयति" [श०३।१।३।२४) इत्यादौ ज्ञश्चाज्ञश्च द्वावपि वाचयितव्या उत ज्ञ एवेति संशये अविशेषादुभौ वाचयितव्याविति पूर्वः पक्षः । अध्ययनविधिबलादधीतवेदस्य विदितवेदार्थस्यैव याजमानत्वादभिज्ञमेव वाचयेन्न त्वविज्ञमिति (जै ३।८।९) सिद्धान्तः ।

(३) पञ्चाहुतीर्जुहुयात् "मनो मे मनसा दीक्षितां स्वाहेति प्रथमां वाङ्मे वाचा दीक्षितां स्वाहेति द्वितीयां प्राणो मे प्राणेन दीक्षतां स्वाहेति तृतीयां मध्ये स्थयं प्राणश्चक्षुर्मे चक्षुषा दीक्षितां स्वाहेति चतुर्थीं श्रोत्रं मे श्रोत्रेण दीक्षितां स्वाहेति पञ्चमीं तद्वह स्माऽऽह कौषीतकिर्न होतव्या (शां० ब्रा० ७।४।शां० श्रौ० ९।४।१४) इति श्रुतेः।

आध्वर्यवपद्धतिः ।

कनिष्ठिके--"ॐस्वाहा यज्ञं मनस आरभे" । ततोऽनामिके—

"ॐ स्वाहोरोरन्तरिक्षात् यज्ञमारभे" । ततो मध्यमे--"ॐ स्वाहा द्यावापृथिवीभ्यां यज्ञमारभे" । अन्तिमेन मुष्टी कृत्वा "ॐ स्वाहा वातादारभे यज्ञमा०" । स्वाहेत्युक्त्वा वाग्यतः "ॐ स्वाहा" (४ । ५) अङ्गुष्ठौ तत्सहिते तर्जन्यौ चोत्सृजति ।

अध्वर्युर्यजमानं बाहुगृहीतं (१)वाग्यतं प्रवेशयति पूर्वद्वारेण विमितं प्रविश्याहवनीयगार्हपत्यावन्तरेणागत्य स्वासने उपविशति सोऽस्य सञ्चर आप्रसवात् ।

एवं प्रतिप्रस्थाता पत्नीमभ्यञ्जनादि तूष्णीं (२)पूर्वद्वारेणैव अग्नी अन्तरेणापरेण वा प्रवेशयति । अस्या अप्ययमेव सञ्चर आ प्रसवात् ।

अध्वर्युः औदुम्बरभणानि जुहोति स्थाल्याः स्रावेणाकूत्या इति प्रतिमन्त्रम् । "ॐ आकूत्यै प्रयुजेऽग्नये स्वाहा" । इदमाकूत्यै प्रयुजेऽग्नये । "ॐ मेधायै मनसेऽग्नये स्वाहा" । इदं मेधायै मनसेऽग्नये । तृतीयं जपत्येव । (सस्वरं जपः) ।

"ॐदीक्षायै तपसेऽग्नये स्वाहा" । "ॐसरस्वत्यै पूष्णेऽग्नये स्वाहा" । इदं सरस्वत्यै पूष्णेऽग्नये । "ॐ आपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवीऽउरोऽअन्तरिक्ष । बृहस्पतये हविषा विधेम स्वाहा" । इदं (३)द्यावापृथिव्यन्तरिक्षबृहस्पतिभ्यो न मम । इदं सवित्रे न ममेति भद्रः। पञ्चमं जुह्वां ध्रौवमासिच्य द्विश्च स्थाल्याः स्रुवेण तृतीयं स्रुवमभिपूरयति विश्वो देवस्येति । "ॐ विश्वो देवस्य नेतुर्मर्तो व्रुरीत सख्यम् । विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा (४।७) । इदं(४)विश्व–

(१) वाग्यमनस्यास्य कृत्स्नप्राकरणिकाङ्गत्वं (जै०३।१।१४) सिद्धान्तितम् ।

(२) अत्र मानवसूत्रे विशेषः—"प्रतिप्रस्थाता तूष्णीं पत्नीं पावयित्वा परया द्वारा प्रपाद्य दक्षिणतः पश्चादपरस्य पत्नीलोकमुपस्थाप्योपवेशयति" । अतोऽपरेण द्वारेण प्रवेशनं समूलम् । अनेकयजमानकेऽभ्यञ्जनादि बाहुगृहीतप्रपादनान्तमेकैकस्य यजमानस्य कर्तव्यं संस्कारस्यैतावत्परिमाणत्वात् । अप्सुदीक्षायामपि नखनिकृन्तनादिप्रपादनान्तमेकैकस्येति ।

(३) अत्र "आपो देवीर्लिङ्गोक्ता" इत्युक्त्वा (सर्वानुक्रमणिः १।१६) न्मन्त्रलिङ्गं भिन्नविभक्त्यन्तानामेव देवतात्वेनावगमाच्च "इदमद्भ्यो द्यावापृथिवीभ्यामन्तरिक्षाय बृहस्पतये न मम" इति वा त्यागः । एवं सर्वत्राऽनेकदेवतासु ज्ञेयम् ।

(४) इदं विश्वेभ्यो देवेभ्यः सवित्रे मित्राय बृहस्पतये पूष्ण इति वा । अथवा इदं सवित्रे इत्येतावानेव त्यागः, विश्वो देवस्य स्वस्त्याग्नेयः सावित्रीमनुष्टुभमिति सर्वानुक्रमण्या (१।१६) मुक्त्वा "दथ सावित्रीं जुहोती"ति चयने (श० ब्रा० ६।६।१।२१) श्रुतत्वाच्च ।

आध्वर्यवपद्धतिः ।

देव-सवितृ-मित्र-बृहस्पति-पूषभ्यो न मम । एतामेव वा पूर्णां जुहुयादेकां नेतराः(१) ।

[दीक्षणीयाशेषसमापनम्]

ततो बर्हिर्होमादि(२) समिष्टयजु—ब्राह्मणतर्पणप्रैष—तर्पण-कर्मापवर्गावर्जं सर्वं पौर्णमासवत् ।

इति दीक्षणीयेष्टिः ।

अथ कृष्णाजिनादिदीक्षा ।

आहवनीयं दक्षिणेन कृष्णाजिने माꣳसहिते स्यूतान्ते तर्ह्यसु पश्चादासञ्जनवती निदधाति प्राग्ग्रीवे । एकं चेत्पश्चात्पादद्विगुणं कृत्वा यजमानो दक्षिणं जान्वाच्यास्ते पश्चादेनयोः । शुक्लकृष्णसन्धिमालभत ऋक्सामयोरिति ॥

"ॐ ऋक्सामयोः शिल्पे स्थस्ते व्वामारभे ते मा पातमास्य यज्ञस्योदृचः" (४ । ६) ।

तयोर्दक्षिणजानुनाऽऽरोहति शर्मासीति ।

"ॐ शर्मासि शर्म मे यच्छ नमस्ते ऽअस्तु मा माहिर्ठ०सीः" (४ । ६) । तेनास्ते ऽपरेन्ते ।

मेखलां बध्नीते (३)वेर्णि त्रिवृतर्ठ० शणमुञ्जमिश्रामन्तरां वाससऊर्गसीति ।

"ॐ ऊर्गस्याङ्गिरस्यूर्णम्म्रदा ऽऊर्ज्जं मयि धेहि"। (४ । १०) नीविं कुरुते सोमस्य नीविरिति ।

"ॐ सोमस्य नीविरसि" । (४ । १०) उष्णीषेण स्वं शिरः प्रोर्णुते विष्णोः शर्म्मेति ।

"ॐ विष्णोः शर्मासि शर्म यजमानस्य" (४।१०) ।

प्रादेशमात्रीं कृष्णविषाणां त्रिबलिं पञ्चबलिं वोत्तानां परिधानीयस्य दशायां बध्नीते तया (४)कण्डूयनम् ।

---

(१) एतान्यौदुम्बराणि दीक्षणीयाङ्गं तच्छेषभूतद्रव्यसाध्यत्वात् । दीक्षणीयाऽभावे अस्थियज्ञे (का०श्रौ०२५।१३।३५) न भवति प्रौवाज्यस्य हुतत्वात् ।

(२) बर्हिर्होमः। प्रणीताविमोकः। राक्षसभागः। कर्कमते भागावेक्षणं व्रतविसर्गो भागप्राशनमिति । देवयाज्ञिकमते व्रतविसर्गोऽनूबन्ध्यान्ते पयस्यान्ते वा भवति नात्र ।

(३) मेखलाबन्धनमध्वर्योरिति कर्कः । यजमानः स्वयं बध्नाति आत्मनेपदश्रवणादिति देवः ।

(४) शाखान्तरे "सुपिप्पलाभ्यस्त्वौषधीभ्य" (आ० श्रौ१०।१०।२) इति कण्डूयनमन्त्र आम्नातः तत्र यदाऽनेकेषु पाण्याद्यङ्गेषु युगपत्कण्डूरुत्पद्यते किं तदा प्रत्यङ्गं मन्त्रा-

आध्वर्यवपद्धतिः ।

तत उदकोपस्पर्शः । काण्वानां नृत्तरीयदशायाम् । उपस्पृशत्येनया दक्षिणस्या भ्रुव उपरीन्द्रस्य योनिरिति "ॐ इन्द्रस्य योनिरसि" (४ । १०) ।

भूमौ चोल्लिखति सुसस्या इति। "ॐ सुसस्याः कृषीस्कृधि (४।१०)।

अध्वर्युर्मुखसम्मितमौदुम्बरं दण्डं(१) प्रयच्छत्युदग्रं यजमानाय स गृहीत्वोच्छ्रयस्वेत्येनमुच्छ्रयति ।

"ॐ उच्छ्रयस्व वनस्पत ऊर्ध्वो मा पाह्यर्ठ० हस आस्य यज्ञस्योदृचः" (४ । १० ।) तं दक्षिणत उपधत्ते ।

अत्र वा मुष्टिकरणवाग्यमने ।

एवं प्रतिप्रस्थाता पत्नीं तूष्णीं युगपन्मेखलादि योक्त्रेण(२) वा जालं वा शिरसि विपर्यायं (वा) पृथुमुखो (३)यज्ञियवृक्षशङ्कुः

वृत्तिरुत सकृदिति सन्देहे युगपद्बहङ्गोपपत्तायां कण्डूवां प्रत्यङ्गमभ्यस्यमाने कण्डूयने कण्डूयनकर्मणस्तदपनेयस्य दुःखस्य दुःखापनयनसंस्कार्याणामङ्गानांच भिन्नत्वात्प्रत्यङ्गमावृत्तिरिति पूर्वः पक्षः । कृष्णविषाणया विधीयमानकण्डूयनशेषमन्त्रस्य संस्कार्यात्मन एकत्वात्सकृन्मन्त्रपाठेन तत्सिद्धेर्नावृत्तिः कर्तव्येति (जै० ११।४। सू०४१–५०) सिद्धान्तः ।

(१) ज्योतिष्टोमे श्रूयते "दण्डेन दीक्षयति" "तस्य शतं दक्षिणा" इति । तद्दीक्षा दक्षिणमङ्गप्रधानार्थमुत प्रधानार्थमेव । पुरुषाणामङ्गप्रधानार्थत्वाद्दीक्षादक्षिणस्याङ्गप्रधानार्थतेति प्राप्ते–"दीक्षा सोमस्य" (तै० आ० ३।९।) "दक्षिणा सोमस्य" इति वचनाद्दीक्षादक्षिणं सोमस्य प्रधानस्यैवेति (जै० ३।७।५) सिद्धान्तः ।

दर्शपूर्णमासयोरारम्भे सकृदेवान्वारम्भणीया कर्तव्या न प्रतिप्रयोगमावर्तनीया इत्युक्तं नवमे (१।३४–३५) । सा च विकृतिष्वपि कर्तव्येति निर्णीतं द्वादशे (२।६) ।

अत्र सन्ति ज्योतिष्टोमे दर्शपूर्णमासविकृतिभूतानि दीक्षणीयादीनि कर्माणि । अस्ति तु प्रकृतावारम्भणीयेष्टिः "आग्नावैष्णवमेकादशकपालं निर्वपेद्दर्शपूर्णमासावा(रि)रप्स्यमाणः" (गो० ब्रा० उ० १ । १२ ।) इति । तत्र सन्देहः दीक्षणीयादिष्वारम्भणीया कर्तव्या उत नेति । "विधेः प्रकरणान्तरेऽतिदेशात्सवकर्म स्यात्" (जै० १० । १ । १) इति न्यायेन सर्वं प्राकृतं कर्तव्यमिति पूर्वः पक्षः ।

सोमयागारम्भेणैव दीक्षणीयादीनामारब्धत्वात् तेषां पृथगारम्भाभावेन आरम्भाख्यद्वारलोपाद्दीक्षणीयादिषु आरम्भणीया न कर्तव्या इति (जै० १० । १ । २) सिद्धान्तः ।

(२) इत ऊर्ध्वं पत्नीसन्नहनं कर्तव्यं न वेति चिन्तायां दार्शपौर्णमासिकं पत्नीसन्नहनं प्रायणीयादिषु चोदकप्राप्तं कर्तव्यमिति प्राप्ते—यद्यदृष्टाय बन्धः यदि वासोधारणं दृष्टप्रयोजनं, तदुभयमपि सौमिकेन योक्त्रबन्धनेन सिध्यति । अन्यार्थेनापि सन्नहनेन सन्नद्धेवेति न पृथक्सन्नहनमिति सिद्धान्तः । तथा हि जैमिनिकात्यायनौ—"सन्नहनं च वृत्तत्वात्" (१२।१।२९) । पत्नीसन्नहनं च सयोक्त्रायाः" (८।१।५) इति ।

(३) यज्ञमर्हन्ति यज्ञियाः पलाशादयः । यज्ञात्त्वग्भ्यां घखञौ (पा० ५ । १ । ७१) इति घप्रत्ययः । तथा च श्रुतिः—(श० १ । २ । ५ । २०) "ते वै पालाशाः स्यु" रित्यु-

आध्वर्यवपद्धतिः।

कण्डूयने। ओल्लेखनात्करोति मेखलादि चेत् कृष्णाजिनादि चेद्दण्डान्तम्(१) ॥

इति कृष्णाजिनादिदीक्षा।

अन्यो दीक्षितोऽयं ब्राह्मण(२) इत्याह त्रिरुच्चैः। प्रतिप्रस्थाता दीक्षितोऽयं ब्राह्मणः ३। अस्मिन्नुद्वासने प्रैषे ब्राह्मण इत्येव वैश्यराजन्ययोरपि श्रुतेः (श० ब्रा० ३। २। १। ४०)।

एतत्प्राग्यदा च सूर्योऽस्तमियात्तदैव सायमग्निहोत्रहुतं हुत्वा सर्वमवशिष्टं कर्म कर्त्तव्यं नान्यथा।

अथ महावीरसम्भरणम्।

एकदीक्षापक्षेऽत्रैव महावीरसम्भरणयूपाहुतियूपच्छेदनानि, दीक्षाबहुत्वे तु, यस्मिन् कस्मिंश्चिद्दीक्षादिने तानि।

तत्रादौ महावीरसम्भरणम्। (३)दीक्षासु महावीरान्सम्भरन्ति।

पक्रम्य "यदि पालाशान्न विन्देदथो अपि वैकङ्कताः स्युर्यदि वैकङ्कानान्न विन्देदथो अपि काश्मर्यमयाः स्युर्यदि काश्मर्यमयान्न विन्देदथो अपि बैल्वाः स्युरथो खादिरा अथ ऽऔदुम्बरा ते हि वृक्षा यज्ञियाः" इति। ब्रह्मपुराणेऽपि—

पालाशाश्वत्थन्यग्रोधप्लक्षवकङ्कोद्भवाः।
काश्मर्योदुम्बरो बिल्वाश्चन्दनः सरलस्तथा ॥
शालश्च देवदारुश्च खादिरश्चेति याज्ञिकाः।

(१) अनेकयजमानके एकैकस्य कृष्णाजिनास्तरणादिदण्डप्रदानान्तं कर्तव्यं, एवं पत्नीनामपि। दण्डप्रदानान्ते कृते दीक्षितो भवति. अतः कृष्णाजिनास्तरणादीनि दण्डोच्छ्रयणान्तानि समस्तानि दीक्षाकरणानि न व्यस्तानि। अतः सर्वेषु दण्डोच्छ्रयणान्तेष्वनुष्ठितेषु दीक्षितो भवतीति देवयाज्ञिकः। असामाधानिना "दीक्षितोय" मित्येतस्मात्प्रागस्तमयेऽग्निहोत्रकाल आगते सायंप्रातर्होमस्तन्त्रेण कर्तव्यः, न प्रातर्होममिति याज्ञिकाः। इष्टेरनन्तरमेव होमादिनिषेध इति मीमांसकाः। तथा हि जैमिनिः-"परेणाऽऽवेदनादीक्षितः स्यात्, सर्वैर्दीक्षाभिस्सबन्धात्। इष्टयन्ते वा तदर्था ह्यविशेषाद्यसम्बन्धात्। समाख्यानं च तद्वत्" (९। ३। २९-३१) इति।

(२) अनेकयजमानके चास्योहः। दीक्षितावमौ ब्राह्मणौ, दीक्षिता इमे ब्राह्मणा इति।

(३) महावीरग्रहणं पिन्वनरौहिणकपालानामप्युपलक्षणम्। तान्यप्यत्र प्रक्रियन्त एव। प्रयोजनं पिन्वनादीनामपि विस्मरणे सम्भारनिवपनादि सर्वं तदुपयुक्तं भवतीति। एकाहेषु—तावदेकादीक्षा तिस्रो दीक्षाश्चतस्रो दीक्षा द्वादश दीक्षा अपरिमिता (जै० ६। ७।१०) वा दीक्षा भवन्ति (जै० ६।५।८) (का० ७।१।२४)। अहीनेषु—"दीक्षाः सुत्योपसच्छेषेण" (का० २३।१।२) ति। द्वादशाहे च दीक्षा द्वादशे (ज० ६।५।९)ति। तत्रानेकदीक्षापक्षे यस्मिन्नहनीच्छा भवति तस्मिन्महावीरसम्भरणं कर्तव्यम्। एकदीक्षापक्षे च 'दीक्षितोऽयं ब्राह्मण' इति प्रैषानन्तरं प्रागस्तमयान्महावीरसम्भरणं श्रपणान्तं

आध्वर्यवपद्धतिः।

अन्तःपात्ये दक्षिणतः समन्त्रं ब्रह्मास्ते, तत्सव्यपार्श्वे यजमानः। अन्तःपात्यदेशे संभारान्निदधाति, मृदं, वल्मीकवपां, वराहविहतं, पूतीकानजापयो, गवेधुकाः, कृष्णाजिनमभ्रिचोत्तरतः। अध्वर्युर्देवस्य त्वेत्यभ्रिमादायौदुम्बरीं वैकङ्कतीं वारत्रिमात्रीम्।

"ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यामपूष्णोहस्ताभ्याम्। आददे नारिरसि" (३७।१)। सव्ये कृत्वा दक्षिणेनालभ्य जपति युञ्जत इति।

"ॐ युञ्जते मनऽउत युञ्जते धियो विप्राविप्रस्य बृहतो विपश्चितः। विहोत्रादधे वयुनाविदेकऽइन्महीदेवस्य सवितुः परिष्टुतिः" (३७।२)।

साभ्रिभ्यां पाणिभ्यां मृदमादत्ते पिण्डवद्देवी द्यावापृथिवी इति।

"ॐ देवी द्यावापृथिवी मखस्य वामद्य शिरो राध्यासन्देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे" (३७।३) आददे।

कृष्णाजिने निदधात्युत्तरतः सर्वत्र। देव्यो वयम्य इति वल्मीकवपाम्। "ॐ देव्योव्वयम्यो भूतस्य प्रथमजा मखस्य वोद्य शिरो राध्यासन्देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे" (३७।४) आददे।

इयत्यग्र ऽआसीदिति वराहविहतम्। "ॐ इयत्यग्रऽआसीन्मखस्य तेऽद्य शिरो राध्यासन्देवयजने, पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे" (३७।५) आददे।

इन्द्रस्यौजस्थेति पूतीकान्। "ॐ इन्द्रस्यौजस्थ मखस्य वोऽद्य शिरोराध्यासन्देवयजने पृथिव्याः। मखाय त्वा मखस्य त्वा शीर्ष्णे" (३७।६) आददे।

मखायेति पयः "ॐ मखाय त्वा मखस्य त्वा शीर्ष्णे" (३८।६) तूष्णीं गवेधुकाः।

सम्भृतानभिमृशति मखायेति "ॐ मखाय त्वा मखस्य त्वा शीर्ष्णे" (३७।६) अभिमृशामि(१)।

कृष्णाजिनं परिगृह्योत्तरतः परिवृतं गच्छन्त्यध्वर्युप्रतिप्रस्थातृनेष्टोन्नेतारः प्रैतु ब्रह्मणस्पतिरिति।

"ॐ प्रैतु(२) ब्रह्मणस्पतिः प्र देव्येतु सूनृता। अच्छा वीरं नर्यम्पङ्क्ति-

---

कृत्वाऽऽपाकादुद्धरणं प्रातः कर्तव्यम्। 'तान् दिवैवोपवपेद्दिवोद्वपेदि" (श० ब्रा० १४।१।१।२१) त्युक्तत्वात्तत्कालमेव पाकासम्भवात्प्रातरुद्धापो युक्त इति।

(१) केचित्प्रत्येकमभिमर्शनमिच्छन्ति।

(२) "प्रैतु ब्रह्मणस्पति" रिति मन्त्रपाठः सर्वेषाम्। "अथोत्तरतः परिश्रितं भवति।

आध्वर्यवपद्धतिः ।

राधसन्देवा यज्ञन्नयन्तु नः (३७।७) ।

परिवृते निदधाति सम्भारानुद्धतावोक्षिते सिकतोपकीर्णे प्राग्द्वारे मखायेति ।

"ॐ मखाय त्वा मखस्य त्वा शीर्ष्णे (३७।७) निदधामि" ।

दक्षिणतः समन्त्रं ब्रह्मास्ते यजमानश्चास्ते । अजाक्षीरं गवेधुकाश्च पृथक्कृत्वा सम्भारैः सꣳसृजति मखायेति ।

"ॐ मखाय त्वा मखस्य त्वा शीर्ष्णे (३७।७) सꣳसृजामि"

मृदमादाय महावीरं करोति मखायेति ।

"ॐ मखाय त्वा मखस्य त्वा शीर्ष्णे (३७ ७) करोमि । प्रादेशमात्रमूर्ध्वमासेचनवन्तं मेखलावन्तं मध्यसङ्गृहीतमूर्ध्वं मेखलायास्त्र्यङ्गुलं निष्ठितमभिमृशति मखस्य शिर इति ।

"ॐ मखस्य शिरोऽसि" (३७।८) । स्थापयति आदानमेके । एवमितरौ प्रतिमन्त्रम् ।

मृदमादाय द्वितीयं करोति "ॐ मखाय त्वा मखस्य त्वा शीर्ष्णे" करोमि (३६।८)। अभिमृशति "ॐ मखस्य शिरोऽसि" (३७।८) स्थापयति।

तृतीयं कराति "ॐ मखाय त्वा मखस्य त्वा शीर्ष्णे करोमि" (३७।८) अभिमृशति "ॐ मखस्य शिरोऽसि । मखाय त्वा मखस्य त्वा शीर्ष्णे" (३७।८) स्थापयति ।

स्रक्पुष्पकराकृती पिन्वने रौहिणकपाले परिमण्डले ।

मृदुमुपशयां निदधाति महावीरान् गवेधुकाभिः श्लक्ष्णयति मखायेति प्रतिमन्त्रम् । "ॐ मखाय त्वा मखस्य त्वा शीर्ष्णे श्लक्ष्णयामि" (२७।८)

दक्षिणाग्नेरेकदेशमुल्मुकमादाय तेनाश्वशकृता (१)धूपयत्यश्वस्येति प्रतिमन्त्रमुखावदग्निः ।

"ॐ अश्वस्य त्वा वृष्णः शकृताधूपयामि देवयजने पृथिव्याः । मखाय त्वा मखस्य त्वा शीर्ष्णे" (३७।९) ।

कृष्णाजिनमपसार्य तत्राभ्या चतुरस्रं हस्तमात्रं गर्तं खात्वा तत्र श्रपणमास्तीर्य तत्र कृतक्रमेण तान् सर्वानधोमुखान्निधाय तेनैवोल्मुकेन

तदभिप्रयन्तो।जपन्ति प्रैतु ब्रह्मणस्पतिरि" (श० ब्रा० १४।१।२।१९) त्यादि श्रुतेः । परिश्रितस्य सिद्धस्यैव निर्देशात्पूर्वं पञ्चारत्निप्रमाणं समचतुरस्रं प्राग्द्वारं कृत्वा तन्मध्ये सप्तभूसंस्कारान्कृत्वा सिकतोपकीर्णं कार्यं, ततः कृष्णाजिनं परिगृह्येत्यादि कार्यम् ।

(१) अथवा धूमायमानं सकृदेव हस्तेन गृहीत्वा भूमिस्थानेव महावीरान्सर्वान् परिवर्तनेन धूपयति ततस्तूष्णीं पिन्वने रौहिणकपालौ धूपयति ।

आज्यवपद्धतिः।

प्रदहनं च मखायेति प्रतिमन्त्रम् "ॐ मखाय त्वा मखस्य त्वा शीर्ष्णे" (३७।६) प्रदहामि(१)। एवमितरौ।

पक्वानुद्धरत्यृजवे त्वेति प्रतिमन्त्रम्। ॐ "ऋजवे त्वा (३७।१०) उद्वपामि" "ॐ साधवे त्वा उद्वपामि," "ॐ सुक्षित्यै त्वा उद्वपामि"।

अजापयसाऽवसिञ्चति मखायेति प्रतिमन्त्रम्। "ॐ मखाय त्वा मखस्य त्वा शीर्ष्णे" अवसिञ्चामि। एवमितरौ।

तूष्णीं पिन्वनादीनां करणाभिमर्शनश्लक्ष्णनधूपनप्रदहनोद्धरणावसेचनानि दिवैव प्रदहनोद्धरणे, यदि सूर्योऽस्तमियाद्रात्रौ प्रदहनान्तं कृत्वा प्रातरुद्धरणावसेचने कुर्यादिति भद्रः(२)। इति महावीरसम्भरणम्।

अथ यूपच्छेदनम्।

पूर्णाहुतिवन्निरूप्याज्यं गार्हपत्येऽधिश्रित्य सुक्स्रुवं च सम्मृज्योद्वास्योत्पूयावेक्ष्य चतुर्गृहीतं गृहीत्वा समित्पूर्वकमाहवनीये यूपाहुतिं जुहोति चतुर्गृहीतꣳ स्रुवेण वोरुविष्णविति।

"ॐ उरुविष्णो विक्रमस्वोरुक्षयाय नस्कृधि। घृतं घृतयोने पिब प्र प्र यज्ञपतिन्तिर स्वाहा" (५।४१)। इदं विष्णवे न मम।

आज्यशेषमादाय सतक्षा गच्छति यूपम्। अभिमृशत्यत्यन्यानिति, प्राङ्तिष्ठन्नभिमन्त्रयते(३) वा।

---

(१) अथवा महावीराणामादीपने मखायेति त्रयोमन्त्राः। सूत्रे प्रदहने विधानात्। श्रुतौ (श० ब्रा० १४।१।२।२१) वाऽवधाने विहिता इति पूर्वं तत्र प्रदर्शिताः। अथवा तत्कालमेवाग्निं मथित्वा तत्कालमथितेनाग्निना महावीरादीनां धूपनं श्रपणं श्रपणमपसार्योत्तानान् कृत्वा ऋजवे त्वेति प्रतिमन्त्रं महावीरानुद्धरति तूष्णीं पिन्वने रोहिणकपाले चोद्धरति। एतेषां पचनोद्धरणे दिवैव कर्तव्ये न रात्रौ।

(२) असम्भवे तु कुम्भकारादिकृतं सिद्धपात्रग्रहणं वा "खात-लून-छिन्ना-वहत-पिष्ट-दुग्ध-दग्धेषु यजुष्क्रियासम्भवात्" (का० श्रौ० १।१०।१३) इति परिभाषालिङ्गात्।

ततो महावीरादीनामसञ्चरे निधानं महता प्रयत्नेन रक्षणं च कार्यम्। भेदे प्रायश्चित्तस्य बाहुल्यात्। तथा हि तत्प्रायश्चित्तम्। "भूमिभूमिमवागान्माता मातरमप्यगात्। भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यताम्"इति मृन्मयं भिन्नमभिमृशेत्। "य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः सन्धाता सन्धिं मघवा पुरूवसुरिष्कर्ता विहृतं पुनरि"(का० २५।५।२९-३०)ति घर्म्यम्। परमेष्ठ्यादींश्च (य० सं० ८।५४-५८) चतुस्त्रिंठ०शतं जुहोति" इति।

(३) अभिमन्त्रणलक्षणन्तु—

"मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरेत्।
शेषिणं तन्मना भूत्वा स्यादेतदनुमन्त्रणम्॥

आध्वर्यवपद्धतिः।

"ॐ अत्यन्यांऽअगान्नान्यांऽउपागामर्वाकृत्वा परेभ्योऽविदम्परोवरेभ्यः। तन्त्वा जुषामहे देव वनस्पते देवयज्यायै देवास्त्वा देवयज्यायै जुषन्ताम्" (५।४२)।

पालाशं बहुलपर्णमशुष्काग्रमूर्ध्वसकलशाखं मध्याग्रोपनतमवणमभावे खादिरबिल्वरौहितकान्। खादिराभावे सोम इतरात्।

छेदनप्रदेशे स्रुवेणोपस्पृशति विष्णवे त्वेति-"ॐ विष्णवे त्वा (५।४२) उपस्पृशामि"।

ओषध इति कुशतरुणं तिरस्कृत्य "ॐ ओषधे त्रायस्व" (५।४२)। स्वधित इति परशुना प्रहरति "ॐ स्वधिते मैनर्ठ०हिर्ठ० सीः" (५।४२)।

प्रथमशकलं निदधाति। अनक्षस्तम्भं वृश्चति। एकजम्। द्यां मालेखीरिति पतन्तमभिमन्त्रयते।

"ॐ द्याम्मालेखीरन्तरिक्षं माहिर्ठ० सीः। पृथिव्या सम्भव"। न दक्षिणा पतेत्,

अयर्ठ० हि त्वेति शोधनमभिमन्त्रणशेषो वा विशेषोपदेशात्। "ॐ अयर्ठ०हि त्वा स्वधितिस्ते तिजानः प्रणिनाय महते सौभगाय (५।४३)।

अतस्त्वमित्यावृश्चने जुहोति यूपे वा तत्संस्कारात् स्थाणौ श्रुतेश्च। "ॐ अतस्त्वं देव वनस्पते शतवल्शो विरोह सहस्रवल्शा विवयर्ठ०रुहेम (५।४३) स्वाहा"। इदं वनस्पतये न मम।

परिवास्याच्छेदनं पुनः। त्र्यरत्निश्चतुररत्निर्वा। एकरत्निप्रभृतीनेके। अष्टाश्रि करोत्युवरवर्जं। मूलात्स्वरुनिष्पादनम्। अग्राच्चपालं पृथुमात्रमष्टाश्रिमध्यसङ्गृहीतमूर्ध्वमग्रे प्रतिमुञ्चति द्व्यङ्गुलं वा तत्रातिक्रान्तं यूपस्य पञ्चारत्निः पञ्चदशपर्यन्तः सोमे दशसप्तचतुर्दशवर्जमपरिमितो वा सप्तदश वाजपेये। एकविर्ठ० शतिरश्वमेधे यथाकायं स्थविमा। इति यूपच्छेदनम्(१)।

औदुम्बरभणादारभ्य यतवाग्यजमान अस्तमयाद्वाचं यच्छति पत्नी

एतदेवाभिमन्त्रस्य लक्षणं चेक्षणाधिकम्।"
इत्याश्वलायनश्रौतसूत्रनारायणवृत्युक्तं बोध्यम्।

(१) यूपैकादशिनीपक्षे एवमेवैकादश यूपांश्छित्वा वितष्टं च द्वादशमचपालमनष्टाश्रीकृतं देवयजनं नयेत्। यूपाहुतिः (का० श्रौ० ६।१।४) सकृदेव (जै० ११।२।७) भवति। "यूपाहुत्यभ्यादानयवावपनानि सकृदि" (का० श्रौ० ८।८।९) त्युक्तेः। स्थाण्वाहुतिश्च पृथक् सर्वेषां भवतीति रामवाजपेयिनः।

आध्वर्यवपद्धतिः ।

च अध्वर्युः अस्तमिते "दीक्षित वाचं(१) विसृजस्व" ३ । "पत्नि वाचं विसृजस्वे"ति त्रिराह पृथक् ।

यजमानः अग्निमभ्यावृत्य व्रतं कृणुतेति वाग्विसर्जनं त्रिरुक्त्वा "ॐ व्रतङ्कृणुत व्रतङ्कृणुत व्रतङ्कृणुत" (४। ११) अग्निर्ब्रह्मेति च सकृत् "ॐ अग्निर्ब्रह्माग्निर्यज्ञा व्वनस्पतिर्यज्ञियः" (४। ११) । भूर्भुवः स्वरिति वा "ॐ भूर्भुवः स्वः" ।

अत ऊर्ध्वमामुष्टिविसर्गादनस्तमितेऽनुदिते च त्रिराह "दीक्षित वाचं यच्छ, पत्नि वाचं यच्छे"ति । यथोक्तं विसर्जनम् ।

व्रतदुघे दोहयति यजमानः । 'गावौ धुक्ष्वे'ति प्रैषः । तत्क्षीरव्रतौ(२) भवतः । प्रथमे व्रते व्रीहियवयोरन्यतरमावपत्युभावेके तद्व्रतमदोहे सर्वौषधर्ठ० सर्वसुरभि चैके ।

अध्वर्युर्गार्हपत्ये दीक्षितस्य व्रतस्य श्रपणं कुर्यात् । दक्षिणाग्नौ पत्न्याः लौकिकी यवागू राजन्यस्य तथामिक्षा वैश्यस्य कांस्यपात्रेणाध्वर्युर्यजमानाय दीक्षितसञ्चरेण व्रतं प्रयच्छत्यनुत्सिक्तमपररात्रे सायंदोहमपराह्णे प्रातर्दोहम् ।(३)

---

(१) अनेकयजमानके अस्योहः । 'दीक्षितौ वाचं विसृजेथा'मिति द्वयोः । "दीक्षिता वाचं विसृजध्वमि"ति बहुषु । पत्नीशब्दस्य तु नोहः प्रकृतावप्यसमवेतत्वात् ।

(२) ज्योतिष्टोमे दीक्षितस्यान्नभोजनाभावे व्रतमाम्नायते—"पयोव्रतं ब्राह्मणस्य, यवागू राजन्यस्य, आमिक्षा वैश्यस्य" इति। तत्पुरुषार्थमुत क्रत्वर्थमिति संशये प्रकरणं बाधित्वा पुरुषसंयोगाद्व्रतस्य पुरुषप्रीत्यर्थतया लब्धफलस्य पुरुषार्थत्वमिति पूर्वः पक्षः । पुरुषाणां क्रियार्थानां शरीरधारणार्थो बलकरणार्थश्चायं संस्कारो व्रतं नाम । स क्रतुधर्मोभवितुमर्हति,प्रकरणानुग्रहाय, पुरुषार्थत्वे सति फलं कल्प्यं, क्लृप्तमितरत्र । प्रयोगवचनेनोपसंहृतं तत्प्रधानस्य । तस्मात्क्रत्वर्थमिति (जै० ४। ३। ४) सिद्धान्तः ।

"पयो व्रतं ब्राह्मणस्य यवागू राजन्यस्यामिक्षा वैश्यस्य" अत्र। सन्देहः किं यस्यापरं भोजनं न विद्यते स पयो व्रतयेत्, यवागूमामिक्षां वा, उत विद्यमानेऽपीति । तदेतदसत्यन्यस्मिन्भक्षे कर्तव्यं, अन्याभावस्य निमित्तत्वात् । निमित्ते सति नैमित्तिकस्यानुष्ठेयत्वादिति प्राप्ते न ह्यत्रान्याभावो निमित्तत्वेन श्रुतः । तस्मात्-सत्यप्यन्यस्मिन्भक्षे-नियमादृष्टाय पय एव व्रतयेदिति (जै० ६। ८। ८) सिद्धान्तः ।

(३) ज्योतिष्टोमे श्रूयते—"अथास्मै व्रतं प्रयच्छति अतिनीय मानुषं कालं सायं दुग्धमपररात्रे प्रातदुग्धमपराह्णे" (श० ३।२।२।१६) इति । तत्र सन्देहः। किं यस्याजीर्णिः सम्भाविता तेनापि व्रतयितव्यमुत नेति । "नियतं वाऽर्थवत्वात्स्यादि"ति न्यायेन (जै० ६।८।२६) (विहितत्वात्) व्रतयितव्यमेवेति पूर्वपक्षे—यजमानस्य रोगोत्पत्या क्रतुविरोध एव सम्भाव्येत । तेन प्रधानविरोधादजीर्णसम्भवे न व्रतयितव्यमिति (जै० ६। ८। ९) सिद्धान्तः ।

आध्वर्यवपद्धतिः।

यजमानः स्वासने कृष्णाजिनयोः दैवीं धियमिति व्रतायोपस्पर्शनं कुर्यात्। व्रतार्थमाचमनम्। "ॐदैवीं धियं मनामहे सुमृडीकामभिष्टये। वर्चोधां यज्ञवाहसꣳसुतीर्था नो असद्वशे" (४।११)।

ये देवा इति व्रतयत्यमृन्मये कांस्यपात्रे "ॐ ये देवा मनो जाता मनोयुजो दक्षक्रतवस्ते नोऽवन्तु ते नः पान्तु तेभ्यः स्वाहा" (४११)।

आचम्य श्वात्राः पीता इति नाभिमालभते "ॐ श्वात्राः पीता भवत यूयमापो अस्माकमन्तरुदरे सुशेवाः। ता अस्मभ्यमयक्ष्मा अनमीवा अनागसः स्वदन्तु देवीरमृता ऋतावृधः" (४।१२)। पत्नी लोहे तूष्णीं व्रत्यभक्षणमात्रं पत्न्या व्रतश्रपणप्रदाने प्रतिप्रस्थातुरिति संप्रदायः।

मेध्यन्कृष्णविषाणया लोष्टं किञ्चिद्वाऽऽदत्त इयं त इति।

"ॐ इयं ते यज्ञिया तनूः"।

अपो मुञ्चामीति मेहति "ॐ अपो मुञ्चामि न प्रजाम्। अर्ठ० होमुचः स्वाहाकृताः पृथिवीमाविशत"। शौचाचमनान्ते—

पृथिव्या सम्भवेत्याक्तं निदधाति "ॐ पृथिव्या सम्भव" (४।१३)।

अग्ने त्वमित्युक्त्वा स्वपित्यधः प्राङ् दक्षिणतोऽग्निमुखः "ॐ अग्ने त्वर्ठ० सुजागृहि वयर्ठ० सुमन्दिषीमहि। रक्षा णो अप्रयुच्छन् प्रबुधे नः पुनस्कृधि" (४।१४) इति प्रथममहः॥

(अथ द्वितीयमहः।)

अग्निमभ्यावृत्तं विबुद्धमस्व(१)प्स्यन्तं पुनर्मन इति वाचयत्यध्वर्युः।

"ॐ पुनर्म्मनः पुनरायुर्म्मऽ आगन्पुनः प्राणः पुनरात्मा मऽ आगन्पुनश्चक्षुः पुनः श्रोत्रम्मऽ आगन्।

वैश्वानरोऽ अदब्धस्तनूपाऽ अग्निर्नः पातु दुरितादवद्यात्" इति ब्रूहि। यजमानः—

"ॐ पुनर्म्मनः पुनरायुर्म्म आगन्पुनः प्राणः पुनरात्मा मऽ आगन्पुनश्चक्षुः पुनः श्रोत्रम्म आगन्।

वैश्वानरोऽ अदब्धस्तनूपाऽ अग्निर्नः पातु दुरितादवद्यात्" (४।१५)

अनुदिते दीक्षित वाचं यच्छ ३। पत्नि वाचं यच्छेति त्रिराहाध्वर्युः।

उदिते च दीक्षित वाचं विसृजस्व ३। पत्नि वाचं विसृजस्वेति त्रिराह।

यजमानस्य व्रतङ् कृणुतेत्यादि (पत्र ३२) पूर्ववत्। तत्र त्रिस्तनं

(१) आहवनीयाभिमुखीभूतं यजमान विगतनिद्रं पुनः स्वापमकरिष्यन्तं पुनर्मन इति वाचयति।

गावौ धुक्वेति प्रैषः(१)। व्रताधिश्रयणं पूर्ववत् (पत्र ३२)।

त्वमग्न इत्याह कृध्वा ऽव्रत्यं वा व्याहृत्य।

"ॐ त्वमग्ने व्रतपाऽ असि देव आमर्त्येष्वा। त्वं यज्ञेष्वीड्यः" (४। १६)।

लब्धमालभ्य(२) वाचयति रास्वेयदिति। अध्वर्युर्गामालभस्वेत्यादि यथाद्रव्यम्।

"ॐ रास्वेयत्सोमा भूयो भर देवो नः सविता व्वसोर्द्दाता व्वस्वदादि"ति ब्रूहि। यजमानः—

ॐ रास्वेयत्सोमा भूयो भर देवो नः सविता व्वसोर्द्दाता व्वस्वदात् (४।१६) आलब्धुमशक्येऽ(३)भिमन्त्रणम्।

(अथ दीक्षितनियमाः।)

अथ नियमाः। शूद्रसम्प्रवेश-सम्भाषा-प्रत्युत्थाना-भिवादनोदकावायवर्षाणि वर्जयेत्प्रागवभृथात्। परिह्वालं वदति विचक्षणवनसितवर्ती वाचम्। शालासनास्वग्नौ सन्धिवेलयोः वेद्याँसुत्यासु। अप्रायश्चित्तमपराधे। इतरेतरस्मिन्वोपहवमिच्छेरन्। पत्न्यामेकदीक्षो। इति नियमाः(४)—

---

(१) अत्र साग्नौ (चयने) यजमानोऽहरहरप्रयात(११।७५)'मिति मन्त्रेण स्वाहान्तेनोखायां समिधमादधाति। ततो भस्मापोऽभ्यवहरणादि प्रायश्चित्यन्तम्। ततो विष्णुक्रमवात्सप्रे समासेन। ततोऽध्वर्युः पलाशशाखया गार्हपत्यस्य चितेः स्थानस्य सम्मार्जनादि निषेशन इत्युपस्थानान्तम्।

(२) शाखान्तरे "दीक्षितो भृतिं वन्वीते"ति (आ० श्रौ० १०।१८।४) दीक्षितस्य भृतियाचनार्थं प्रयाणं विहितमस्ति। तत्र याचने क्रियमाणे यद्धिरण्याश्वगवादि यत्कश्चिद्दाति तल्लब्धहिरण्याद्यालभ्य हिरण्यमालभस्वेत्येवमादिना प्रषेणालम्भं कारयित्वा रास्वेयदित्यमुं मन्त्रं यजमानं वाचयति। "अथ यद्दीक्षितायामिहरन्ति तस्मिन्वाचयति रास्वेयदिति" (श० ३।२।२।२५) श्रुतेः। आपस्तम्बः—

"दीक्षितो द्वादशाहं भृतिं वन्वीत यज्ञमेव तत्सम्भरतीति विज्ञायते। पूषा सञ्ज्येति सनीहारान्सं शास्ति। चन्द्रमसीत्येतैर्यथालिङ्गं प्रतिगृह्णाति देवः सविता वसोर्वसुदावेत्यन्यानि' (१०।१८।४-७)। तथा "पृथगरणीष्वग्नीन्समारोप्य रथेन प्रयाति। तदभावे रथाङ्गमादाये (१०।१९।६) त्यादि।

(३) यदा कश्चिद्दाता प्राह ममान्यस्मिन्देशे एका गौर्वर्तते हिरण्यादि वा तुभ्यं दास्यामि तदा विप्रकृष्टत्वात्तस्यालम्भः।कर्तुं न।शक्यते।तदाभिमन्त्रणमिति भावः।

(४) दीक्षितः शूद्रेषु न प्रविशेत् शूद्रः सह सम्भाषणं न कुर्यात् अथवा शालामध्ये शूद्रस्य प्रवेशो वारणीयः, यदि शूद्रेण सम्भाषणेनावश्यं कार्यं भवति तदा त्रैवर्णिकमन्तरा कृत्वा तेन कारयितव्यं न तु साक्षात्, प्रत्युत्थानार्हस्यापि वृद्धगुर्वादेः प्रत्युत्थानं न

आध्वर्यवपद्धतिः।

कार्यम्, अभिवादनञ्च। उदक्रमध्ये प्रवेशनं न कार्यं वृष्टयुदकधारासंयोगो वर्ज्यः कोमलं वदेत् न परुषं संस्कृतां वाचं वदेत्। अन्नदानपरां सत्यां वाचं वदेत्। विचक्षणशब्दवतीं चनसितं शब्दवतीं च ब्राह्मणादिनामधेयभूतां वाचं वदेत्। तथा च मानवे—

"न प्रत्यक्षनाम्नाचक्षीत चनसित्येवर्हता सह सम्भाषमाणे ब्रूयाद्विचक्षणेतीतरैरि"ति। (२।१।२।१९)। आपस्तम्बे (१०।१।२६) च—

जागर्त्यैतां रात्रिं क्रीते राजनि द्वितीयां श्वः सुत्यायां तृतीयायाम्। ।चनसितं विचक्षणमिति नामधेयान्तेषु निदधाति। चनसितेति ब्राह्मणम्। विचक्षणेति राजन्यवैश्यौ। परिणयेन मानुषीं वाचं वदति। न स्त्रिया न शूद्रेण सम्भाषेत नैनमनुप्रपद्येत यद्येनं शूद्रेण सम्वाद उपपद्येत ब्राह्मणराजन्यवैश्यानामेकं ।ब्रूयादिममित्थं ब्रूहीति वाजसनेयकम् (श० ब्रा० ३।१।१।१०)। कामं शूद्रेण सम्भाषेत यः पापेन कर्मणानभिलक्षितः स्यादिति शाट्यायनकम्। अभिवदति नाभिवादयतेऽप्याचार्यं श्वसुरं राजानमिति शाठ्यायनकम्। न चास्य नाम गृह्णीयात्। न च दन्तान्दर्शयते। हस्तेनापिगृह्य स्मयते। मधु मांसं स्त्रियमनृतमुपरिशय्यां क्षौरं विकाले निष्क्रमणं दीक्षितविमितात्प्रवासमिति वर्जयेत्। न दिवा मूत्रपुरीषे कुर्यात्। यदि कुर्याच्छायायाम्। न प्रतीच्या द्वारा निष्क्रामति। नाक्रतुसंयुक्तामाहुति जुहोति नाग्निहोत्रम्। न दर्शपूर्णमासाभ्यां यजते। न पचते। न दीक्षितवसनं परिदधीत। नास्य पापं कीर्तयेत्। नान्नमश्नीयादिति।

काठके च—यदि प्राक्कालादङ्गुलीर्वाचं वोत्सृजेदिदं विष्णुर्विचक्रमे बृहस्पते जुषस्व नस्त्वमग्ने व्रतपा असीत्यग्निमुत्तमयेति।

आश्वलायनसूत्रे—दीक्षणादि पित्र्याणां दैवानां च धर्माणां प्राकृतानां निवृत्तिः सर्वेशश्च वर्जयेयुर्ग्रामचर्यां सरणं विवृतस्मयनं स्त्र्यभिहासमनार्याभिभाषणमनृतं क्रोधमपां प्रगाहणमभिवर्षणमारोहणं च वृक्षस्य नावो वा रथस्य वा दीक्षिताभिवादनं दीक्षितस्त्वोपसदामुभौ सुन्वन्ता समसिद्धान्ताः पूर्वारम्भिणममितक्षतरं वा सर्वसाम्ये यथा द्वयो नृत्तगीतवादितान्यन्यांश्चावृत्योपचारान्न चैनान्बहिर्वदितोभ्याश्रावयेयुरिति (४४९ पत्रे)।

सायं काले शालायामेवोपवेशनं कर्तव्यं नत्वितस्ततो गमनं प्रातः सन्ध्याकाले च स्वापो न कार्यः उत्थायोपवेष्टव्यम्, अस्यासनास्वप्नस्यापराधे यद्यपि प्रायश्चित्तं किमपि नास्ति तथाप्ययं नियमोऽवश्यं पालनीयः। अथवास्य नियमस्यातिक्रमे अनेकयजमानके परस्परमुपहवप्रार्थनं कार्यं दीक्षिता उपह्वयध्वमित्येवं अग्निष्टोमादावेकयजमानके पुनं नियमातिक्रमे पत्न्या उपहवप्रार्थनं प्रायश्चित्तं पत्न्युपह्वयस्वेति सा च उपहूत इति प्रसौति।तथा दन्तधावनानित्यस्नानाग्निहोत्रावसथ्यहोमवैश्वदेवतर्पण सन्ध्योपासनादिकं किमपि न करोति तत्र दीक्षामध्ये एवं नियमयुक्त आस्ते।

तिस्रो रात्रीर्व्रतं चरेत्। अमाँसाश्यमृतमयपायी। स्त्री-शूद्र-शव-कृष्णशकुनिश्वनीचादर्शनमसम्भाषा च तैः। शवशूद्रसूतकान्नानि च नाद्यात्। मूत्रपुरीषे क्षीवनं चातपे न कुर्यात्सूर्याच्चात्मानं नान्तर्दधीत। तमेनादकार्यान्कुर्वीत। अवज्योत्य रात्रौ भोजनम्। सत्यवदनमेव वा। दीक्षितोऽप्यातपादीनि कुर्यात्प्रवर्ग्यवांश्चेत्। (पा० गृ० सू० २।८। १—९। श० ब्रा० १४।१।१।२८) इति।

ब्रह्मचर्यसत्यवदनादिनियमेषु यथाकाम्यमुत नेति विचारे "फलयुक्तानामारम्भे या-

आध्वर्यवपद्धतिः ।

याकामो फलार्थित्वा" (का० श्रौ० १।२।१०)दिति सर्वकर्मस्विच्छयानुष्ठानप्राप्तौ—"न नियमनिमित्ताग्निहोत्र—दर्शपूर्णमासदाक्षायणाप्रयणपशुषु प्रवृत्ते (१।२।११)" रिति सूत्रेण न याथाकाम्यमिति । तथा हि सूत्रार्थः-नियमः = सत्यं वदेदित्यादिकः, निमित्तं = कर्मविनाशादि, अग्निहोत्रं = सायंप्रातर्होमः, दर्शपूर्णमासौ = प्रकृताष्टी, दाक्षायणोऽपि दर्शपूर्णमासविशेषएव, आग्रयणं नवयज्ञः, पशुर्निरूढः, एषु नियमादिषु पठ्यन्तेषु सूत्रोक्तेषु कर्तुर्न याथाकाम्यम् । कुतः प्रवृत्तेः शास्त्रं ह्येतेषु नियमेन पुरुषं प्रवर्तयति अत एतेषां नियोगतोऽनुष्ठानं कर्तव्यम्' नेच्छया नियमेषु तावत् "सत्यं वदेत्, नानृतं वदेत्" "अधः शयी स्यात्" (श० ब्रा० १।१।६) इत्येवमादिशास्त्रं नियमेन प्रवर्तयति कथं यदि नियमेषु याथाकाम्यं स्यात्तर्हि नियमशास्त्रमनर्थकं स्यात् शास्त्रं विनापि याथाकाम्यस्य सिद्धत्वात् सर्वोऽपि यदेच्छति तदा सत्यं वदति अधः शेते वा, न च वेदे मात्रामात्रस्यापि व्यानर्थक्यमिष्यते अतः शास्त्रार्थवत्त्वाय नियमेषु न याथाकाम्यमिति । तदयमनृतवदनिषेधः क्रत्वर्थः संयोगः न तु पुरुषार्थः तथा हि जैमिनिः—

"अकर्म क्रतुसंयुक्तं संयोगान्नित्यानुवादः स्यात्, विधिर्वा संयोगान्तरात्" (३।४।१८—१९) न्यायमाला च—

"अनृतं न वदेद्वैधः पुंधर्मो वाऽनुवादगीः ।
सक्रतौ पुंसि शुद्धे वा क्रतौ यद्वा विधिः क्रतौ ॥
अनृतोक्तेः पुमर्थत्वात्तन्निषेधस्तथाविधः ।
स्मार्तानुवादः पुंस्क्रत्वोः श्रुतिप्रक्रिययोर्वशात् ॥
नाऽऽख्यातेपुरुषानुक्तिः क्रतावेव प्रयाजवत् ।
सत्योक्तिनियमादन्य संयोगोऽतः क्रतौ विधिः" ॥
(३।४।८।१४—१६) इति ।

दीक्षितस्यामनोज्ञस्वप्नादिदर्शने प्रायश्चित्तमाम्नातम् । तद्यथामनोज्ञस्वप्नदर्शने—दीक्षितोऽमनोज्ञं स्वप्नं दृष्ट्वा जपेत् "पर्यावर्ते दुःस्वप्नात्पापः स्वप्नादभूत्यै ब्रह्माहमन्तरं करवे परः स्वप्नमुखा कृधी"ति । दीक्षितस्य रेतःस्कन्दने—इन्द्रियं स्कन्नमद्भिरुप सिञ्चे"त्योमेऽद्य पयसो रसः पदि दोषादुदर्पथः । अग्निहोत्रमिव सोमेन तमहं पुनराददे" इति । दीक्षितस्य जलतरणे—उदकं चेत्तरेत्तदभिमन्त्रये "दुन्दतीर्बलं धत्तौजो धत्त सहो धत्त मा मे दीक्षां मा तपो निर्वधिष्टे"ति । अववर्षणे-"उन्दतीर्बल" मित्यनेनाभिमन्त्रणम् । दीक्षितस्यामेध्यदर्शने-अमेध्यं दृष्ट्वा सूर्यमुपतिष्ठेता "बद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषा श्रेष्ठो दीक्षे मा मा हासी"दिति । दीक्षितस्याङ्गे शोणितोत्पत्तौ—"रुद्रियाभ्योऽन्नयः स्वाहे"ति जुहुयात् । एवं निष्ठीवेच्चेद् "बीभत्साभ्योऽन्नयः स्वाहे"ति । धावेच्चे"द्वायवे स्वाहे"ति । स्विद्याच्चे"त्तपस्याभ्योऽद्भ्यः स्वाहे"ति । स्वप्याच्चे"त्प्रजापतये स्वाहे"ति । आर्त्यश्रुकरणे "तृप्राभ्योऽद्भ्यः स्वाहे"ति । छर्द्याविष्टः पयः पीत्वोदकं वा छर्दयीत निष्टयूतवद्धोमः (का० २९।११।२१—३२) इति । पत्न्या अप्येषु निमित्तेष्वेतान्येव प्रायश्चित्तानि ।

अत्रैतत्संदिह्यते किं युगपदनेकामनोज्ञस्वप्नदर्शने सकृन्मन्त्रवचनमुत भेदेनेति । तथा नदीतरणेऽपि च स्रोतसां भेदे किं भेदेन मन्त्रवचनं उत सकृदिति । अववर्षणेऽपि च

आध्वर्यवपद्धतिः ।

(अथ प्रायणीयेष्टिः ।)

अथ प्रायणीया । दीक्षान्ते प्रायणीयमदित्यै(१)चरुं निर्वपति । न सङ्कल्पो नान्वाधानम्, न व्रतोपायनारण्यभोजने । न ब्रह्मवरणम् । चतुरासनम् । वाचस्पतिप्रैषः । प्रणीताप्रणयनम् । आहवनीयस्यैव परिस्तरणम् । पात्रासादने--

औद्गात्रपद्धतिः ।

अथ द्वितीयेऽह्नि प्रायणीयायां प्रस्तोता पूर्ववद्गार्हपत्यस्य पश्चादुपविश्य चरुहोमकाले "प्रो अयासीदिति" प्रवर्द्गार्गवं तृचे गायेत् ।

हौत्रपद्धतिः ।

श्वोभूते प्रायणीयेष्टिः । एहि होतरित्यामन्त्रितो होताऽऽचम्य तीर्थेन प्रविश्य कं प्रपद्यादि प्रश्नदश सामिधेन्यः, उपांशु हविः, (शाङ्खायनानां) नाज्यभागौ भवतः स्वसूत्रे (शां० श्रौ० १।१।६) पठितम् ।

अनाज्यभागपक्षे—आवाहने "आ ४ वह देवान्यजमानाय पथ्यां स्वस्तिमन्नमा ४ वहे"त्यादि ।

युगपदनेकधारासन्निपाते किं प्रत्यवयवेषं मन्त्रवचनमुत सकृदिति ? एवं युगपदनेकामेध्यदर्शने वनीवाहनप्रयाणे (श० ६।८।१) चेति ।

यदि निद्रा मध्ये प्रबोधैरल्पैर्व्यवधायेत, नदी च बहुस्रोतोयुक्ता द्वीपैं, वृष्टिश्च विच्छेदैः, अमेध्यानि च देशैः, तदा तैरन्तरायैर्निमित्तेषु भिद्यमानेषु नैमित्तिका मन्त्रा आवर्त्या इति प्राप्ते—रात्रिगतां कृत्स्नां निद्रामुद्दिश्य मन्त्रविधानान्निमित्तमेकम् । एवमितरत्रापि योज्यम् । तस्मान्नास्ति मन्त्रावृत्तिरिति सिद्धान्तः । तथा हि जैमिनिकात्यायनौ—"स्वप्ननदीतरणाभिवर्षणामेध्यप्रतिमन्त्रणेषु चैवम्" (११।४।५१) स्वप्ननदीतरणावर्षणामेध्यदर्शनप्रयाणेषु तु सकृत् कालद्रव्यैकार्थत्वात् (१।७।१२) इति ।

ज्योतिष्टोमे श्रूयते "दीक्षितो न ददाति न जुहोति न पचति" (मै० ३।६।५) इति । तत्र विचारः किमयं सर्वेषामेव पुरुषार्थानां क्रत्वर्थानां चोपदिष्टानामतिदिष्टानां प्रतिषेधः, उतातिदिष्टानां पुरुषार्थानां च, अथवा पुरुषार्थानामेवाग्निहोत्रादीनामिति । तत्राविशेषाद्दानादिकं पुरुषार्थं, यच्च क्रत्वर्थं, तत्राप्युपदिष्टमतिदिष्टं च तत्सर्वं प्रतिषिध्यते । इत्याद्यः पूर्वः पक्षः । उपदिष्टस्यापि प्रतिषेधे उपदेशस्य व्यर्थत्वापत्तिः स्यादतोऽतिदिष्टं, पुरुषार्थं च प्रतिषिध्यत इति मध्यमः पक्षः ।

नित्याग्निहोत्रदानादिकं पुरुषार्थत्वेन यत्प्रत्यक्षश्रुतावुपदिष्टं तज्ज्योतिष्टोमकालेऽपि प्राप्तम्, यच्चातिदिष्टं दानादिकं, तयोरुभयोर्मध्ये प्रत्यक्षोपदिष्टनिषेधस्योपदिष्टमेव सन्निहितमिति पुमर्थस्यैवात्र निषेध इति (जै० १०।८।७) सिद्धान्तः । यदि प्रतिषेधपक्षे वाक्यभेदः शङ्क्येत, तर्हि पुमर्थदानादिव्यतिरिक्तं क्रतुकालेऽनुष्ठेयमिति पर्युदासोऽस्तु ।

(१) "अदित्यै चरुरन्यत्रापी" (का०श्रौ० ५।७।२) त्यनेनैव सिद्धेऽपि पुनश्चरुग्रहणं चरोः प्रायणीयत्वप्रज्ञप्त्यर्थम् । तथा च श्रूयते "आदित्यं चरुं प्रायणीयं निर्वपती (श० ३।२।३।१) ति ।

आध्वर्यवपद्धतिः ।

शूर्पाग्निहोत्रहवणीस्फ्यः शम्या-कृष्णाजिनं-उलूखल-मुशलं-दृषदुपलं-पात्री-पवित्रच्छेदनानि-पवित्रे-आज्यस्थाली-उपसर्जनीपात्रं-कुशमुष्टिः-वेदितृण-मग्निः । पत्ने-योक्त्रम्, स्रुवः, जुहूपभृत् ध्रुवा-सन्नहनावच्छादनानि, परिधयो विधृत्यो आज्यम्, होतृषदनम्, ओषधं प्राशित्र हरणे(१) ।

उपकल्पनीयानि इध्मावर्हिः चरुपात्रमेक्षणे (कपालस्थाने चरुस्थाली, श्रुतावदानस्थाने मेक्षणम्) । पडवत्तं लौकिककपालम् । पात्र्यामौषधकरणादि । विलालभ्भे दैव्या असीत्यूहः ।

ग्रहणे-अदित्यै जुष्टं गृह्णामि । प्रोक्षणे-त्वाऽधिकः ।
मुसलावधाने-सद्दं देव्यै हविः । कुक्कुटाहननम् ।
कणान्तेऽध्वर्योराज्यनिर्वापोपसर्जन्यधिश्रयणे ।

चरोः (ऐषण) संयवनप्रथनाद्भिरभिमर्षणपिष्टलेपपात्र्यङ्गुलिप्रक्षालनाभिवासनानामभावः(२) ।

औद्गात्रपद्धतिः ।

प्रवद्भार्गवस्य(३) भृगुऋषिः जगतीछन्दः सोमो देवता
प्रायणीयायां गाने विनियोगः ।

हौत्रपद्धतिः ।

कात्यायनानां वार्त्रघ्नावाज्यभागौ । आज्यभागपक्षे तु आवाहने—"आ ४ वह देवान्यजमानाय अग्निमग्न आ ४ वह सोममा ४ वह (उपांशुपथ्यां स्वस्तिं (उच्चैः) आ ४ वह । (उपांशु-) अग्नि (उच्चैः-) मा ४ वह । (उपांशु) सोम (उच्चैः-) मा ४ वह । (उपांशु-) सवितार- (उच्चैः-) मा ४ वह । (उपांशु-) अदिति (उच्चैः-) मा ३ वह देवानित्यादि प्रकृतिवत् ।

उत्तमे प्रयाजे—भूर्भुवर्यें ४ यजामहे स्वाहाग्निं स्वाहा सोमं स्वाहा (उपांशु-) पथ्यां स्वस्तिं (उच्चैः) स्वाहा (उपांशु-) अग्निं (उच्चैः-) स्वाहा (उपांशु-) सोमं (उच्चैः-) स्वाहा (उपांशु-) सवितारं (उच्चैः-)

---

(१) कपालोपवेषान्वाहार्यपात्रोद्धरणपात्र्यन्वाहार्यतण्डुलान्तर्धानकटपूर्णपात्रकर्मापवर्गाणामभाव इति रामवाजपेयिनः । अग्न्यन्वाधान-ब्रह्मवरण—व्रतग्रहण—दक्षिणादान-व्रतविसर्गाणामभावः इति देवः । ब्रह्मयजमानषडवत्तभागा हि पुरोडाशविकारत्वाच्चोरपि स्युः ।

(२) श्रुतज्ञानाय माभेरिति स्पर्शनं तु भवत्येवेति रामवाजपेयिनः ।

(३) प्रायणीयायां प्रवद्भार्गवम् (द्रा. श्रौ. २।२।२२) ।

आध्वर्यवपद्धतिः ।

एकत्वादनिर्देशः । आज्याधिश्रयणमग्नीधः। प्राणदाने-अदितिं गच्छ । पञ्चदशेन वज्रेणेत्यववाधनम् ।

उत्तमे प्रयाजे—इदमग्नये सोमाय पथ्यायै स्वस्तये अग्नये सोमाय सवित्रेऽदित्यै देवेभ्य आज्यपेभ्योऽग्नये स्विष्टकृते च न मम । पञ्च मम० । अन्नादो भूयासम् ।

आज्यभागाविष्टूवाज्येन देवता(१)श्चतस्रो यजति पथ्यास्वस्तिमग्निर्ठं० सोमर्ठ० सवितारं च अदितिं चरुणा ।

आप्याय्याप्याय्य चतुर्गृहीतग्रहणं सर्वत्र । मन्त्रमुपांशु वा प्रधानयागः ।

हौत्रपद्धतिः ।

स्वाहा देवानित्यादि समानम् ।

वार्त्रघ्नावाज्यभागौ—"ॐअग्निर्वृत्राणि जङ्घनद् द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतोऽमम्" (य० सं० ३३।६। प्रथमाज्यभागपुरोऽनुवाक्येयम्) ।

---

(१) ननु गण्यमाना एवैताश्चतस्रो भविष्यन्ति किमर्थं पुनश्चतस्र इत्युक्तम् । मा भूत्कस्यचिदाशङ्का पथ्यां स्वस्तिमिति पृथगेते द्वे देवते इति । इदानीं प्रसङ्गादिदं विचार्यते—प्रायणीये किं पञ्च प्रधानानि आदित्यश्चरुराज्यभागाश्च, उत किमादित्य एव प्रधानमङ्गयागा इतर इति । तत्र "स वै पञ्च प्रायणीये देवता यजति पञ्चोदयनीये" (श० ३।२।३।२३) इति पञ्चानां प्रायणीयसंयोगात्पञ्च प्रधानानीति केचिदाहुः । अपरे पुनर्वर्णयन्ति उत्पत्तिवाक्ये केवलस्यादित्यस्य प्रायणीयसंयोगः "आदित्यं चरुं प्रायणीयं निर्वपती"।(श० ३।२।३।१) ति । उदयनीयेऽपि निगमने "तस्मादेष आदित्य एव प्रायणीयो भवत्यादित्य उदयनीय" (श० ३।२।३।६।) इति यस्तु पञ्चानां प्रायणीयसंयोगो न स प्रायणीये पञ्च प्रधानानि विदधातीति । किं तर्हि पौर्णमासिकीभ्यो देवताभ्योऽभ्यधिका पञ्च प्रायणीये देवता यजतीति पञ्चानामतिरिक्तानां सार्थवाद इति । यदि पञ्च प्रधानानि परिसमाप्तायामपि प्रायणीयायां विस्मृतस्य यागस्य पुनः करणम् । यदि आदित्य याग एव प्रधानं ततोऽक्रिया । तत्रादित्यं चरुं प्रायणीयमिति चरुसामानाधिकरण्यात्तस्यैव प्राधान्यमितरेषां चाङ्गत्वमिति सिद्धान्तः । अङ्गत्वेऽपि सत्याज्यद्रव्यकत्वसाद्दृष्टेनोपांशुयाजधर्मप्राप्तेः पथ्यास्वस्त्यादीनां व्यूहनावाहनादिषु सङ्कीर्तनं भवत्येव । अत्रापस्तम्बः—"चतुर आज्यभागान्प्रतिदिशं यजति पथ्यां स्वस्तिं पुरस्तादग्निं दक्षिणतः सोमं पश्चात्सवितारमुत्तरतः मध्येऽदितिं हविषेति (१०।२१।११) एवं मानव (२।१।३।२५) कऽसूत्रयोरपि । शतपथे तु "ता वा एताः पञ्च देवता यजती"(श०३।२।३।१२)ति प्रकृत्य"दीचीमेव दिशं पथ्यया स्वस्त्या प्राजानन् , प्राचीमेव दिश्यग्निना प्राजानन् , दक्षिणामेव दिशठं० सोमेन प्राजानन् , प्रतीचीमेव दिशर्ठ० सवित्रा प्राजानन्नूर्ध्वामेव दिशमदित्या प्राजान"न्निति (श० ३।२।३।१२-१९)श्रूयते । तेनाग्नेरुत्तरभागे पथ्यां स्वस्तिं यजति प्राच्यामग्निं दक्षिणतः सोमं पश्चात्सवितारं मध्येऽदितिमिति ।

(अथ प्रधानयागः ।)

पथ्यायै स्वस्तयेऽनुब्रूऽहि । पथ्यां स्वस्तिं यज । उत्तरतो होमः । इदं पथ्यायै स्वस्तये ।

अग्नयेऽनुब्रूऽहि । अग्निं यज । पूर्वतः । इदमग्नये ।

सोमायानुब्रूऽहि । सोमं यज । दक्षिणतः । इदं सोमाय ।

सवित्रेऽनुब्रूऽहि । सवितारं यज । पश्चात् । इदं सवित्रे ।

हौत्रपद्धतिः ।

"ॐ त्वष्टं० सोमासि सत्पतिस्त्वष्टं राजोत वृत्रहा । त्वं भद्रो ऽअसि क्रतोश्म्" । (का०हौ०प०२।४। द्वितीयाज्यभागपुरोऽनुवाक्येयम्) ।

अथ प्रधानयागः—(उपांशु-) पथ्यायै स्वस्तये (उच्चैः-) अनुब्रू ४ हीत्युक्ते—(उपांशु-)

"ॐ स्वस्ति नः पथ्यासु धन्वसु स्वस्त्यप्सु व्रजनेष्ववर्वति ।

स्वस्ति नः पुत्रकृथेषु योनिषु स्वस्ति राये मरुतो दधातन (उच्चैः-) ओ३म् (ऋ०१०।६४।१५) ।

(उपांशु-) पथ्यां स्वस्तिं (उच्चैः-) यज । भूर्भुवर्यें४ यजामहे (उपांशु-) पथ्यां स्वस्तिं "स्वस्ति ऋद्धि प्रपथे श्रेष्ठा रेक्णे स्वस्त्यभियावा ममेति सा नो अमा सो अरणे निपातु स्वावेशा भवतु देवगोपा ४ (उच्चैः-) वौ ४ षट् (ऋ० १०।६४।१६) । ओजः सहः सह ओजः स्वः ।

(उपांशु-) अग्नये (उच्चैः-) अनुब्रू४हि (उपांशु-) ॐ अग्ने नय सुपथा राये ऽअस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम (ऋ०१।१८९।१) (उच्चैः-)ओ३म् ।

(उपांशु-) अग्निं (उच्चैः-) यज । भूर्भुवर्यें ४ यजामहे (उपांशु-) अग्निमग्ने त्वं पारया नव्यो अस्मान्त्स्वस्तिभिरति दुर्गाणि विश्वा । पूश्च पृथ्वी बहुला नऽउर्वी भवा तोकाय तनयाय शंयोः (ऋ० १।१८९।२) (उच्चैः-) वौ ४ षट् । ओजः सहः सह ओजः स्वः ।

(उपांशु-)सोमाय (उच्चैः-) अनुब्रू४हि । (उपांशु-) "त्वं सोम प्र चिकितो मनीषा त्वं रजिष्ठमनुनेषि पन्थाम् । तव प्रणीती पित

औद्गात्रपद्धतिः ।

प्रो अयासायि(त्) । इन्दुरिन्द्रा । स्या२ निष्कृताम् । सखासख्युः । न प्रमिना । ता२ यि सङ्गिरम् । मर्य इवा । युवतिभायिः । सा मर्षतायि । सोमः कला । शेशतया । मा२ नोपथा ३१ उ ॥

आध्वर्यवपद्धतिः ।

अवदानधर्मेण चरुमवदाय अदित्यै अनुब्रूऽहि । अदितिं यज । निधनसमकालं मध्ये यागः । इदमदित्यै ।

औद्गात्रपद्धतिः ।

प्रबोधियो । मन्द्रयुवो । वा २ यिपन्युवाः । पनस्युवाः । संवरणायि। पूरवक्रमूः । हरिं क्रीडा तमभ्यनू । षा २ तस्तूभाः । अभिधेना । वः पयसायित् । आरशिश्रियू ३ रा उ ॥

आनः सोमा । सेयतं पायि । प्यूरषामिषाम् । इन्द्रोयवा स्वपबमा । ना २ ऊर्मिणा । यो नोदोहा । तेत्रिरहान् । आरसश्चुपायि । क्षुमद्धाजा । वन्मधुमात् । सूरवीरियाँ ३ मा उ । वा २ ३ ४ ५(१)॥

हौत्रपद्धतिः ।

रो न इन्दो देवेषु रत्नमभजन्त धीराः" (ऋ० १ । ९१ । १) (उच्चैः-) ओ३म् । (उपांशु-) सोमं (उच्चैः-) यज भूर्भुवर्यें ४ यजामहे (उपांशु-) सोमं या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् । गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्या ४ न् (ऋ० । १ । ९१ । १९ ।) (उच्चैः-) वौ ४ षट् । ओजः सहः सह ओजः स्वः ।

(उपांशु-) सवित्रे (उच्चैः-) अनुब्र४हि-(उपांशु-) "तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् (ऋ० ३।६२।१०) (उच्चैः-) आ३म् । (उपांशु-) सवितारं (उच्चैः-) यज भूर्भुवर्यें ४ यजामहे (उपांशु-) सवितारं य इमा विश्वा जातान्याश्रावयति श्लोकेन । प्र च सुवाति सविता ४ (ऋ० ५। ८२। ९) (उच्चैः-) वौ ४ षट् । ओजः सहः सह ओजः स्वः ।

(उपांशु-) अदित्यै, अनुब्र४हीं (त्युच्चैः)।

(उपांशु-) सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्म्माणमदितिं सुप्रणीतिम् । दैवीं नावं स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये। (ऋ० १०(६३)६४।१०)।

(उच्चैः-) ओ३म् (उपांशु-) अदितिं (उच्चैः-) यज भूर्भुवर्यें ४ यजामहे (उपांशु) अदितिं महीमू षु मातरं सुव्रतानामृतस्य पत्नीमवसे हुवेम ।

---

(१) (उ० आ० ४, २, ७, १, ऊह ४, १, ७)।

होत्रपद्धतिः।

तुविक्षत्रामजरन्तीमुरुचीं सुशर्म्माणमदितिं सुप्रणीतिं (उच्चैः) (श० य० सं० २१।५) वौ ४ षट्। ओजः सहः सह ओजः स्वः। अत्र प्रस्तोत्रा निधनेन सहादितियाज्यायां वषट्कारं कुर्यात्। अग्नये स्विष्टकृतेऽनुब्रू ४ ही त्युक्ते—

त्वां चित्रश्रवस्तम हवन्ते विक्षु जन्तवः। शोचिष्केशं पुरुप्रियाग्ने हव्याय वोळह वै (मं० १ सू० ४५ ऋक् ६) वौ ४ षट्। ओजः सहः सह ओजः स्वः।

"अग्निं स्विष्टकृतं यजे" त्युक्ते भूर्भुवर्यें४ यजामहे ऽग्निं स्विष्टकृतमयाडग्निरग्नेः प्रिया धामा न्यायाट् सोमस्य प्रिया धामान्ययाट् पथ्यायाः स्वस्तेः (उपांशु), प्रिया धामान्ययाट् (उच्चैः), अग्नेः (उपांशु), प्रिया धामान्ययाट् (उच्चैः), सोमस्य (उपांशु), प्रिया धामान्ययाट् (उच्चैः), सवितुः (उपांशु), प्रिया धामान्ययाट् (उच्चैः), अदितेः (उपांशु), प्रिया धामान्ययाट् देवानामाज्यपानां प्रि० (१) हविः।

यद्वा हि ष्टं तदग्नये बृहदर्च विभावसो। महिषीवत्वद्रयिस्त्वद्वाजा उदीरते (ऋ०मं०५। सू० २५ ऋक् ७) वौ ४ षट्। ओजः सहः सह ओजः स्वः।

उदकोपस्पर्शः। उपह्वानं पर्वाञ्जनादि। उपहूतं, इडोपहू० पुत्रे, उपहूतेऽयं यजमानोऽस्य यज्ञस्यागुर उद्रूचमशीयेति तस्मिन्नुपहूतः। भक्षः। मार्जनं। दक्षिणा न। एषा(२) ते० हि। त्रयोऽनुयाजाः। सूक्तवाके अग्निर्हो० कृत, सोम० कृत पथ्यास्वस्ति (उपांशु) हविः कृत अग्निः (उपांशु) हविः कृत, सोम (उपांशु) हविः कृत, सविता, (उपांशु) हवि० कृत अदितिः (उपांशु) हविः कृत देवा आज्यपा कृत, अग्निर्होत्रे० कृत। अस्यामृधेद्धोत्रायां देवङ्गमायामाशास्तेऽयं यजमानोऽस्य यज्ञस्यागुर उद्रूचमशीय यदनेन हवि० भ्यः। नम उप शंयोर्ब्रूहीत्युक्ते तच्छंयो० दे। उदकोपस्पर्शः। शंय्वन्ता। पत्नीसंयाजाः। इति प्रायणीया।

---

(१) "यो धामानि यक्षदग्नेर्होतुः प्रिया धामनि यक्षत्स्वं महिमानमायजतामेज्या इषः कृणोतु सो अध्वरा जातवेदा जुषता७हवि" रिति मन्त्रशेषः।

(२) "एषा ते अग्ने समित्तया वर्धस्व चा च प्यायस्व। वाधषीमहि च वयमाच प्याशिषीमहि" इति मन्त्रः।

आध्वर्यवपद्धतिः ।

ततः स्विष्टकृदादि । न दक्षिणा ।

व्यूहने–पथ्यायाः स्वस्तेरग्नेः सोमस्य सवितुरदितेरू० । पथ्याः स्वस्तिरग्निः सोमः सवितादितिस्तम० ।

अप्रधानत्वात्पथ्यास्वस्त्यादीनां व्यूहनं नेति कश्चित् ।

शंय्वन्ते परिधिहोमः । संस्रवाहुतिः । धुरि निधानम् । न वेद्यालम्भः । वेदविमोकः, पत्ते योक्त्रस्य च । आवेदेस्तरणम् ॥

चरुमेक्षणवर्हिर्निदधात्युदयनीयायै(१) सलेपं चरुं प्रमृष्टं मेक्षणम् । प्रक्षालयति वा चरुमनुप्रहरतीतरे त एवर्त्विजो विप्रेतेष्वन्येऽपि ।

शंय्वन्तं(२) भवत्यन्तवचने पूर्वं प्राप्तेरुत्तरं वा प्रकृत्यनुग्रहानुया-

---

(१) ज्योतिष्टोमे प्रायणीयश्चरु (श० ३।२।३।१) रुदयनीयश्च (श० ४।१।१।१।) तत्र शाखान्तरे (त० सं० ६।१।५) श्रूयते–"प्रायणीयस्य निष्कासे उदयनीयमनुनिर्वपती"ति तत्र विचारः। किं प्रायणीयनिष्कासद्रव्यकमुदयनीयधर्मकं कर्मान्तरं विधीयते किं वा प्रायणीयनिष्कासस्योदयनीयनिर्वापसंयोगः प्रतिपत्तिः उत प्रायणीयनिष्कासे निर्वापः उदयनीयस्य संस्कार इति । अत्र पूर्वन्यायेन (पू० मी० ११।२।१५) निष्कासद्रव्यकमुदयनीयसमानधर्मकमर्थकर्म । इत्याद्यः पूर्वः पक्षः। मुख्यस्योदयनीयस्य प्रकृतत्वाद्भिन्नप्रकरणाम्नातावभृथधर्मातिदेशवदुदयनीयधर्मातिदेशासम्भवान्नार्थकर्मत्वम् । किन्तु निष्कासप्रतिपत्तिरिति मध्यमः पक्षः । उपयुक्तसंस्कारादुपयोक्ष्यमाणसंस्कारस्य गरीयस्त्वादुदयनीयस्य संस्कार इति (पू० मी० ११।२।१६) सिद्धान्तः ।

(२) अत्र श्रूयते "शंय्वन्ता प्रायणीया सन्तिष्ठते, न पत्नीः संयाजयन्ति (श० ३।२।३।२३) इडान्ता आतिथ्या सन्तिष्ठते, नानुयाजान्यजन्ति" (श० ३।४।१।२६) इति । तत्र संशयः किं प्रायणीयातिथ्ये शंय्विडान्ते वा कृत्स्नसंस्थे वा उत शंय्विडान्ते एवेति । तत्र शंय्विडान्तवचनेन परेष्वङ्गेषु सर्वेष्वकर्तव्येषु पुनः पत्नीसंयाजानूयाजानामकर्तव्यत्ववचनं परिसङ्ख्यारूपेणाङ्गान्तराणामकर्तव्यताप्रतिषेधेन कर्तव्यताविधानार्थं पत्नीसंयाजानेव न कुर्यादन्यानि कुर्यादेवेति । तेन पत्नीसंयाजानूयाजप्रतिषेधेन कृत्स्नसंस्थाविधानात् शंय्विडान्तवचनेन तत्संस्थाविधानाद्द्वयोः संस्थयोर्व्रीहियववद्विकल्प इति पूर्वः पक्षः । मैवम् ।

वाक्यभेदो हि न न्यायो विकल्पश्चाष्टदोषभाक् ।
त्रिदोषा परिसंङ्ख्या च तस्मात्स्तुत्यैकवाक्यता ॥

शंय्विडान्तविधेरेवायमर्थवादार्थोऽनुवादः पत्नीसंयाजाद्यकरणाल्लाघवं भवतीति न विध्यन्तरम् । तस्मान्नियमेन शंय्विडान्ते एव प्रायणीयातिथ्ये इति (पू० मी० १०।७। सू० ३८–३९।) सिद्धान्तः ।

शंय्विडान्तयोरेव सन्देहः प्रकृतौ द्वौ शंयू पत्नीसंयाजानां पुरस्तादेकः पश्चादपरः । तथेडे अपि द्वे अनूयाजानां पुरस्तादेका पश्चादपरा । तत्र किं पूर्वाभ्यां शंय्विडान्ताभ्यां तदन्तता उतोत्ताराभ्यामुतानियम इति । तत्र विशेषाभावादनियम इति प्रथमः पूर्वः पक्षः।

यदि प्रायणीया पूर्वशंय्वन्ता, आतिथ्या च पूर्वेडान्ता तदानीमन्तत्वविधिनैव ता-

आध्वर्यवपद्धतिः ।

जप्रतिषेधाभ्यां ग्रहणादप्रवृत्तिः सन्त्वराश्रुतेश्च नित्यानुवादोऽनुयाज-प्रतिषेधः ।

उपरवदेशे प्रतिप्रस्थाता रोहिते चर्मण्यानडुहे सोमं निवपति विक्रय्येनं विचिनोति कौत्सः शूद्रो वा । दक्षिणतो ब्राह्मण उपास्ते स च ब्राह्मणाच्छंसी । उदकुम्भश्च पुरस्तात् ।

अध्वर्युः शालाद्वाराण्यपिधाय ध्रौवं जुह्वां चतुर्विगृह्णाति ध्रुवयैव । बर्हिस्तृणेन हिरण्यं बध्नावदधात्येषा त इति जुह्वाम् ।

"ॐ एषा ते शुक्र तनूरेतद्ब्रह्मस्तया सम्भव भ्राजङ्गच्छ" (४।१७) ।

आहवनीये जूरसीति जुहोति ।

"ॐ जूरसि धृता मनसा जुष्टा विष्णवे ।

तस्यास्ते सत्यसवसः प्रसवे तन्वो यन्त्रमशीय स्वाहा" (४।१८) । इदं वाचे ।

ब्रह्मा हिरण्यवत्या ॐ हुतायां दक्षिणोऽनुगच्छत्याक्रयात् ।

शुक्रमसीति हिरण्यमुद्धृत्य—

"ॐ शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवमसि" (४।१८) ।

तूष्णीं वेद्यां तृणं निदधाति सुत्रवद्धर्ठ० हिरण्यं कुरुते ।

अत्र प्रायणीयाशेषसमाप्तिः । चरुस्थालीं प्रक्षाल्य उदनीयाथ निद्ध्यात् । पक्षे बर्हिर्होमः । प्रणीताविमोकः । राक्षसभागः । भागावेक्षणप्राशने । पक्षे मेक्षणप्रासनमाहवनीये । इति प्रायणीया ।

(अथ सोमक्रयः ।)

अथ सोमक्रयः । अध्वर्युः-निरूप्याज्यं गार्हपत्येऽधिश्रित्य स्रुक् स्रुवं च सम्मृज्याज्यमुद्वास्योत्पूयावेक्ष्य चतुर्गृहीतं गृहीत्वा अन्वारभस्व यजमानेत्याह ।

अन्वारब्धोऽध्वर्युर्यजमानश्चापावृतद्वारे निष्क्रामतः प्रतिप्रस्थाता च। दक्षिणेन द्वारर्ठ० सोमक्रयणी तिष्ठत्यलक्षिताऽभ्यङ्काऽप्रवीताऽरज्जुब-

---

भ्यां शंय्विडाभ्यामूर्ध्वमप्राप्तानां पत्नीसंयाजानामनुयाजानां च वारितत्वान्निषेधो व्यर्थः स्यात्। परयोरन्तत्वे ताभ्यां शंय्विडाभ्यां प्राप्तानां तेषामनिवारणात्तन्निवारणाय सार्थको निषेधः । तस्मात्परे एव शंय्विडे प्राह्ये इति द्वितीयः पक्षः ।

निषेधोऽयं नित्यानुवादः स च पूर्वयोः शंय्विडान्तयोरन्तत्वेऽप्येकवाक्यतामापाद्यार्थवादत्वेनोपपद्यते । सञ्ज्ञाविरोधिन्यौ हि पूर्वे शंय्विडे । तस्मात्पूर्व एव शंय्विडे प्राह्ये इति (जै० १०।७। सू० ४०—४२) शङ्कान्तः ।

आध्वर्यवपद्धतिः।

द्धा बभ्रुः पिङ्गला पिङ्गलाऽभावेऽरुणा(१) रुणाभावे रोहिण्यश्येताक्षी चिदसीत्येनामभिमन्त्रयते।

"ॐ चिदसि मनासि धीरसि दक्षिणासि क्षत्रियासि यज्ञियास्यदितिरस्युभयतः शीर्ष्णी। सा नः सुप्राची सुप्रतीच्येधि मित्रस्त्वा पदि बध्नीताम्पूषादूध्वनस्पात्विन्द्रायाध्यक्षाय। अनु त्वा माता मन्यतामनु पितानुभ्राता सगर्भ्योऽनुसखा सयूथ्यः। सा देवि देवमच्छेहीन्द्राय सोमर्ं० रुद्रस्त्वा वर्त्तयतु स्वस्ति सोमसखा पुनरेहि(२) (४।१६-२०)॥

अध्वर्युप्रतिप्रस्थातरावुदीचीन्नीयमानावनुगच्छतो वस्व्यसीति मन्त्रेण पत्नीयजमानब्रह्माणस्तूष्णीम्।

"ॐ (३)व्वस्व्यस्यदितिरस्यादित्यासि रुद्द्रासि चन्द्रासि। बृहस्पतिष्ट्वा सुम्ने रम्णातु रुद्द्रो व्वसुभिराचके" (४।२१)॥

सर्वे षट् पदान्यतीत्य सप्तमं (४)पर्युपविशन्ति।

अध्वर्युः-हिरण्यमस्मिन्त्सप्तमे पदे निधायाभिजु(५)होत्यदित्यास्त्वेति।

---

(१) "अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात्" (पू० मी० ३।१।१२) इति न्यायेनाऽऽरुण्यादि गुणानामसङ्कीर्णता सिद्धान्तिता तत एवावगन्तव्या।

(२) "सोमक्रयणश्चिवत्सः साण्डः" इति साद्यस्क्रे आम्नायते, (का० श्रौ० २२।३।३९) तत्रायं मन्त्र ऊह्यते। चिदसि मनोऽसि धीरसि दक्षिणोऽसि क्षत्रियोऽसि यज्ञियोऽस्यदितिरस्युभयतः शीर्षा। स नः सु प्राङ् सुप्रत्यङ् एधीति। अग्निष्टुति (का० श्रौ० २२।४।३१) च "अग्नयेऽध्यक्षाय" इति। इन्द्रस्तुति (का० श्रौ० २२।५।३) "इन्द्रायाध्यक्षाय" इति। "सूर्यस्तुति (का० श्रौ० २।५।३) "सूर्यायाध्यक्षाय" इति। वैश्वदेवस्तुति विश्वेभ्यो देवेभ्योऽध्यक्षेभ्य" इत्यादि। तथा इन्द्राय सोममित्यत्राग्नये सोममित्यादि। (का० श्रौ० २२।५।३)

(३) अस्यापि साद्यस्क्रे (का० श्रौ० २२।२।९) ऊहः। वस्व्यस्यदितिरस्यादित्योऽसि रुद्रोऽसि चन्द्रोऽसीति।

(४) "अथ सप्तमं पदं पर्युपविशन्ती"(श० ब्रा० ३।३।१।३)ति श्रवणात्। कठसूत्रे—तस्य दक्षिणेषु सप्तसु पूर्वपादेषु तक्षणं कुरुते। मानवे च "षट् पदान्यनुनिष्क्रामति दक्षिणस्य पूर्वपदस्य तूष्णीं सप्तमं पदमभिपरिगृह्य" (२।१।३।३९) इति।

(५) यदाहवनीये जुह्वति तेन सोऽस्यामभीष्टः प्रीतः (तै० ब्रा० प्र० १ अ. १० पत्र ६१) आहवनीये होमाः (का० १।८। ४३) इति सामान्यविहितस्याहवनीयस्य "पदे जुहोति वत्मेनि जुहोति गार्हपत्ये पत्नीसंयाजाञ्जुहोति" इति विशेषविहितैः पदादिभिः किं विकल्पोऽथवा बाध इति सन्देहः। सामान्यविशेषयोस्तुल्यबलत्वाद्विकल्प इति पूर्वः पक्षः। पत्नीसंयाजादिषु होमविशेषेषु होमसामान्ये श्रुतस्याहवनीयस्य लक्षणया प्राप्तिः

आध्वर्यवपद्धतिः ।

"ॐ अदित्यास्त्वा मूर्द्धन्नाजिघर्म्मि देवयजने पृथिव्याऽइडाया-स्पदमसि घृतवत्स्वाहा" (४।२२) । इदमदित्यै ।

स्फ्येन पदं त्रिः परिलिखत्यस्मे रमस्वेति । (१)सकृन्मन्त्रेण द्विस्तूष्णीम् ।

"ॐ अस्मे रमस्व" ।

हिरण्य ꣳ समुद्धृत्य अभ्या खात्वा तत्पदꣳस्थात्यामावपत्यस्म्मे ते बन्धुरिति ।

"ॐ अस्मे ते बन्धुः" (४।२२) ॥

अपः पदस्य स्थाने निषिच्य यजमानाय पदं प्रयच्छति(२)त्वे राय इति ।

"ॐ त्वे रायः सन्तु" (४।२२) ।

मे राय इति यजमानः प्रतिह्णाति ।

"ॐ मे रायः सन्तु" (४ २२) ॥

मा वयमित्यध्वर्युरात्मानर्ठ० सꣳस्पृशति ।

"ॐ मा व्वयर्ठ० रायष्पोषेण व्वियौष्म" (४।२२) उदकोपस्पर्शः ।

अध्वर्युर्हुत्वा पत्न्यै(३) पदं प्रयच्छति नेष्टा तोत इत्येनां वाचयति ।

गार्हपत्यादि तु श्रुत्यैव होमविशेषे विधीयते, तेनास्मिन्विशेषे श्रुत्या शीघ्रप्राप्तं गार्हपत्यादिकं लक्षणया मन्थरप्राप्तमाहवनीयं निरुणद्धीत्यतो बाध इति सिद्धान्तः ।

तथाहि जैमिनिः—"अविशेषेण यच्छास्त्रमन्याय्यत्वाद्विकल्पस्य तत्संदिग्धमाराद्विशेषशिष्टं स्यात्" (१०।८।१६) इति ।

(१) अत्र च सकृन्मन्त्रेण द्विस्तूष्णीम् । "एकद्रव्ये कर्मावृत्तौ सकृन्मन्त्रवचन (का० श्रौ० १।७।८) मित्युक्तेः। "अथ स्फ्यमादाय परिलिखति। स परिलिखति "अस्मे रमस्वेति" (श० ब्रा० ३।३।१।५-६) श्रुतत्वात् । अत्र परिलेखनमुपर्य्युपरि कार्यं चयने बहिर्बहिरिति विशेषो (का० श्रौ० १६।२।२३) क्तेः ।

(२) अनेकयजमानके पदसमर्पणे प्रतिग्रहणे च सर्वेषामन्वारम्भ ऊहश्च । युवयोरायः, आवयोराय इति द्वियजमानके । युष्मासु रायोऽस्मासु राय इत्यनेकयजमानके ।

(३) अत्र श्रूयते "अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणाति०' (तै०सं० ६।१।६) "सप्तपदान्यनुनिष्क्रामति" (श० ब्रा० ३।२।१) "तत् (सप्तमं पदं) यजमानः प्रतिगृह्णाति" इति (श० ब्रा० ३।३।८) । इदमपरं श्रूयते "यर्हि हविर्धाने प्राचो प्रवर्तयेयुस्तर्हि तेनाक्षमुपाञ्ज्यात्" इति ।

अत्र सन्देहः । किं सोमक्रयणयानयनं पदपांसूर्थमुत क्रयप्रयुक्तमिति । नयनात् क्रयः स्यं चैतदुभयं निष्पद्यते । 'एकनिष्पत्तेः सर्वं समं स्या(जै० ४।१।२२)दिति न्यायेनोभयं प्रयोजकमिति पूर्वः पक्षः ।

"एकहायन्या क्रीणाति" (तै० सं० ६।१।६) इति तृतीयाश्रुत्या गोःक्रयार्थता गम्यते ।

आध्वर्यवपद्धतिः ।

"ॐ तोतो रायः सन्तु" इति (१)ब्रूहि । पत्नी—

"ॐ तोतो रायः सन्तु" (४।२२) ।

सोमक्रयणार्था च समीक्षमाणा ॐ समरुय इति वाचयति नेष्टा ।

"ॐ समरुये देव्या धिया सन्दक्षिणयोरुचक्षसा । मा मऽआयुः प्रमोषीर्मोऽअहन्तव व्वीरं विदेय तव देवि सन्दृशि" (४।२३) इति ब्रूहि । पत्नी—

'ॐ समरुये देव्या धिया सन्दक्षिणयोरुचक्षसा । मा मऽआयुः प्रमोषीर्मो ऽअहन्तव व्वीरं विदेय तव देवि सन्दृशि' (४।२३) ।

सा च शालायां सुगुप्तदेशे पदं स्थापयति अध्वर्युः प्रक्षाल्य पाणी हिरण्यं बध्नीतेऽनामिकायाम् । आप्यायनाभिषवांश्वदाभ्येषु च(२)॥६॥

प्रेष्यति च सोमोपनहनमाहर, सोमपर्याणहनमाहर, उष्णीषमाहर, इति प्रैषत्रयम् ।

अत्र वा(३)निवपन ठं० सोमस्य ।

शोभन ठं० सोमोपनहनं भवति उष्णीषाभावे सोमपर्याणहनाद् द्व्यङ्गुलं त्र्यङ्गुलं वोष्णीषायावकृन्तति । अध्वर्युर्यजमानो वा सोमोपनहनठं० हरति । अन्य इतरे=प्रतिप्रस्थाता पर्याणहनोष्णीषे आहरतीत्यर्थः । ब्रह्मयजमानाध्वर्युप्रतिस्थातारः सोमं गच्छन्ति ।

अध्वर्युरेष त इति वाचयति यजमानम् ।

गोद्वारा तदानयनमपि क्रयार्थमेवेति क्रय एवाऽऽनयने प्रयोजकः । न च पदकमर्थत्वं गोर्वा तदानयनस्य वा क्वचिच्छ्रुतम् । तस्मात्—तदप्रयोजकमिति सिद्धान्तः (पू० मी० ४।१। अ० १०) ।

(१) अनेकपत्नीके सर्वासां वाचनं ब्रूतं ब्रूतेत्यादियथायथं प्रयोगः ।

(२) सोमक्रयार्थमेतद्धिरण्यबन्धनम् । यत एवं श्रूयते "अग्नेरेतसं वै हिरण्य (श० ब्रा० ३।३।२।२) मित्यादि । पाणिप्रक्षालनं दृष्टार्थं पदपरिलेखनोद्धरणादिना धूलिलिप्तत्वात् ।

पाणिप्रक्षालनं त्वत्रैव, आप्यायनाभिषवांश्वदाभ्येषु नानुकृष्यते तस्य दृष्टार्थत्वात्, आप्यायनादिषु तस्याश्रवणाच्च । सोमाप्यायने हिरण्यबन्धनं शाखान्तरात् । अभिषवे स्वशाखायामेव "अथास्याꣳ हिरण्यं बध्नीत" (३।९।४।१) इति । अंशुग्रहे "अथास्य हिरण्यं बद्धं भवती० इति (श० ४।६।१।६) । अदाभ्ये च "अथ हिरण्य मभि·····नित्यसावेव बन्धु"रिति । यदि चात्र पाणिप्रक्षालनमप्यभिमतं भवेत् तदा हिरण्यबन्धनवच्छ्रुयेत न श्रूयते च अतो न भवति ।

(३) स्वशाखायामस्मिन्नेव काले श्रुतत्वात् "पदर्ट० समुह्य पाणी" (श० ब्रा० ३।३।२।१) त्याद्युक्त्वा "अथाग्रेण राजनं विबिन्वन्ति तदुदकुम्भ उपनिहितो भवति तद्ब्राह्मण उपास्ते" (श० ब्रा० ३।३।२।९) इति ।

आध्वर्यवपद्धतिः ।

"ॐ एष ते गायत्रो भागऽइति मे सोमाय ब्रूतादेष ते त्रैष्टुभो भागऽइति मे सोमाय ब्रूतादेषते जागतो भागऽइति मे सोमाय ब्रूताच्छन्दोनामाना ॐ साम्राज्यङ्गच्छेति मे सोमाय ब्रूतादि"ति ब्रूहि (४।२४) । यजमानः—

"ॐ एष ते गायत्रो भागऽइति मे सोमा(१)य ब्रूतादेष ते त्रैष्टुभो भागऽइति मे सोमाय ब्रूतादेष ते जागतो भागऽइति मे सोमाय ब्रूताच्छन्दो नामाना ॐ साम्राज्यङ्गच्छेति मे सोमाय ब्रूतात्" (४।२४) ।

सोमस्य पश्चादध्वर्युः प्राङुपविश्य तदुत्तरतः प्रतिप्रस्थाता सोमं दक्षिणेन समन्त्रं ब्रह्मा तद्वामे यजमानः तत्पश्चात् पत्नी'(२)अध्वर्युरास्माकोऽसीति सोममालभते ।

"ॐ आस्म्माकोऽसि शुक्रस्ते ग्रह्यो व्विचितस्त्वा व्विचिन्वन्तु" (४।२४) ।

न विचिनोत्य(३)तस्तृणकाष्ठापासनमेके(४) ।

---

(१) मन्त्रस्य न्यग्रोधे ऊहः ।

(२)अत्र हरिस्वामिनः—'यजमानोऽभिमृशति आस्माकोऽसीति मन्त्रलिङ्गात् "स्व इव ह्यस्यैतद्भवति" (श० ब्रा० ३।३।२।७) इति वाक्यशेषात् । अतो यजमान एवाभिमृशति नाध्वर्युः । प्राङित्युदङ्निवृत्त्यर्थं श्रौतत्वज्ञापनार्थं च' । "यदि राजन्यं वैश्यं वा याजयेत्स यदि सोमं विभक्षयिषेन्न्यग्रोधस्तिमिनी (अङ्कुराः फलानि वा) राहृत्य ताः सम्पिष्य दधन्युन्मृज्य तस्मै भक्षं प्रयच्छेन्न सोमम्" इतिशाखान्तरीयश्रुतेर्वैश्यराजन्ययोः सोमभक्षणनिषेधः । तत्र वैश्यक्षत्रिययोः सोमयागे अध्वर्युर्यंज मानं भक्षं कारयितुमिच्छन् वटफलस्तवकान् उपनहनेन वाससा बध्वा सोमस्यैवेतिकर्तव्यतया न्यग्रोधस्य क्रयणादारभ्य अभिषवादर्वाक् संस्कारजातं कुर्यात् । तदुक्तम्—"वैश्यराजन्ययोः सोमे न्यग्रोधस्तिमीनुपनह्येच्छन् भक्षणाय" (का० श्रौ० १०।९।२८) इति । तस्मिन्पक्षे मन्त्रस्यास्य (न्यग्रोधे) विपरिणामः । 'आस्माकौ स्थ' इत्यादिरूपेण ।

(३) अतः परं सोमविक्रयी सोमं न विचिनोति शाखान्तरात् । आध्वर्युस्तु पूर्वमपि न विचिनोति शाखान्तरे प्रतिषेधदर्शनात् । तथा च मानवे—"नाध्वर्युः सोमं विचिनुयादिति प्रतिषिद्धं विचयनं प्रेक्षणं च" (२।१।३।५५) इति । काठके च—"न विचीयमानं प्रेक्षेरन्" इति ।

(४) एकेनेति । "अत्र हैके तृणं वा काष्ठं वा वित्वापास्यान्ति तदु तथा न कुर्यात्" इत्यादि (३।३।२।८) श्रवणात् । अत्र काले एके चरकयजमानाः सोममध्यगतं तृणकाष्ठं वा वित्वा लब्ध्वा = यदि लभन्ते ततः सोमादपास्यन्ति = बहिः क्षिपन्ति ग्रसितं तस्मै अनुगम्य पलायमानं ग्रसितारं आच्छिद्य ग्रसितारं परा बहिः क्षिपेदेवन्तत्। "तस्मादभिमृशेदेव नापास्येदि" (श० ब्रा० ३।३।२।८)त्युपसंहरतीति यजमानस्यैवापासनं दर्शयति, इति हरिस्वामिनः ।

आध्वर्यवप्रकृतिः।

सोमोपनहनं द्विगुणं चतुर्गुणं वा स्तृणाति(१)प्राग्दशमुदग्वा तस्मिन्त्सोमं(२)मिमीते दशकृत्वोऽभित्यमिति सर्वाभिः प्रथममङ्गुष्ठप्रभृति चैकोत्सर्गं द्विः कनिष्ठिकयैकोपचयश्चाञ्जलिना दशममन्यद्वाध्यावापश्रुतेः। तत्रादौ साङ्गुष्ठाभिरङ्गुलीभिः प्रथमम्।

"ॐ अभित्यन्देवꣳ० सवितारमोण्योः कविक्रतुमर्च्चामि सत्यसवꣳ० रत्नधामभि प्रियम्मतिङ्कविम्। ऊर्ध्वायस्यामतिर्भाऽअदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रक्रतु÷ क्रपास्व÷"(४।२५)।

ततोऽङ्गुष्ठरहिताभिश्चतसृभिर्द्वितीयम्।
ततोऽङ्गुष्ठतर्जनीरहिताभिस्तिसृभिस्तृतीयम्।
ततोऽनामिकाकनिष्ठिकाभ्यां चतुर्थम्।
ततः कनिष्ठकया पञ्चमम्।
पुनराप कनिष्ठिकया षष्ठम्।
ततः कनिष्ठिकानामिकाभ्यां सप्तमम्।
ततो मध्यमानामिकाकनिष्ठिकाभिस्तिसृभिरष्टमम्।
तर्जनीमध्यमानामिकाकनिष्ठिकाभिश्चतसृभिर्नवमम्।
अङ्गुष्ठसहिताभिः सर्वाभिरङ्गुलीभिर्दशमम्।
दशसु मन्त्रोऽभित्यमिति। तूष्णीमेकादशं, समस्याञ्जलिनाध्यावपति।
सोमोपनहनस्यान्तान्तसंगृह्योष्णीषेण बध्नाति प्रजाभ्यस्त्वेति।

---

(१) अत्रापस्तम्बः—'क्षौमं वासो द्विगुणं त्रिगुणं वा प्राग्दशमुत्तरदशं चर्मण्यास्तृणाति उदग्दशं वा' (१०।२४।७) इति। मानवे—"प्राग्दशे क्षौमे सोमं राजानं मिमीत" (२।१।४।३) इति।

(२) ज्योतिष्टोमे सोमस्योपावहरणं मानं च यत्र कुत्रापि कार्यमुत वासस्येवेति संशये—उपावहरणं मानं च सम्पादनप्रयत्नेन विना स्वत एव लब्धेन केनापि साधनेन कार्यमिति पूर्वपक्षे—"अथ वासः द्विगुणं वा चतुर्गुणं वा प्राग्दशं वोदग्दशं वोपस्तृणाति तद्राजानं मिमीते" (श० ब्रा० ३।३।२।९) "वाससि मिनोति वाससा चोपावहरती"ति वचनेन वाससो विहितत्वाद्वासस्येव मानं कर्तव्यमिति सिद्धान्तः। तथा हि पूर्वमीमांसा—"वाससि मानोपावहरणे प्रकृतौ सोमस्य वचनात्" (जै० १०।६। सू० ७६) इति।

स्थितं वाससि मानं वाससा चोपावहरणमिति द्वादशाहादावहर्गणे किमुपावहरणार्थं प्रत्यहं वासोभेदः स्यादुत नेति विचारे प्रमाणाभावान्नेति पूर्वः पक्षः।

अर्थाद्वाससो भेदः स्यात्, हविर्धाने शकटेऽवस्थितः सोमः प्रत्यहं भेदेनाभिषवार्थं यावानेकस्याह्नः पर्याप्तस्तावान्सोमो वाससोऽपावहर्तव्यः। अवशिष्टश्च शकट एव वाससोपनद्धोऽवतिष्ठते। तस्मादर्थादहर्भेदे वासोन्तरमुपावहरणार्थमुत्पादयितव्यमिति (जै० १०।६। अ० २१) सिद्धान्तः। तच्चोपावहरणकाले एवोत्पादनीयं न तु मानकाले इत्यपि (१०।६। अ० २२) सिद्धान्तितं पूर्वतन्त्रे।

आध्वर्यवपद्धतिः ।

"ॐ प्रजाभ्यस्त्वा वध्नामि" (४।२५) ।

अङ्गुल्या मध्ये विवृणोति प्रजास्त्वानु प्राणन्तिवति ।

"ॐ प्रजास्त्वानु प्राणन्तु प्रजास्त्वमनु प्राणिहि" (४।२५) । तं विक्रयिणे प्रयच्छति(१) ।

पञ्चकृत्वः सोमं पणते । अध्वर्युराह—सोमविक्रयिन् क्रय्यस्ते सोमा राजा३ (२) इति ।

क्रय्य इत्याह सोमविक्रयी ।

अध्वर्युः—तं वै ते क्रीणानीति ।

क्रीणीहीत्याह सोमविक्रयी ।

अध्वर्युः—कलया ते क्रीणानीति प्रथमं पणनम् ।

भूयो वा अतः सोमो राजार्हतीत्याह सोमविक्रयी ।

अध्वर्युः—भूय एवातः सोमो राजार्हति महाँस्त्वेव गोर्महिमा गौर्वै प्रतिधुक्तस्यै शृतं तस्यै शरस्तस्यै दधि तस्यै मस्तु तस्या आतञ्चनं तस्यै नवनीतं तस्यै घृतं तस्या आमिक्षा तस्यै वाजिनम्(३) ।

शफेन ते(५)क्रीणानीति द्वितीयं पणनम् ।

---

(१) "अनुदात्तं प्रश्नान्ताभिपूजितयो" (पा० ८।२।१००)रिति प्लुतिः । सौत्रामणीयागे "क्रय्यास्ते सुरासोमा ३" इति प्रश्नः । (का० श्रौ० १९।१।१८) ।

(२) अस्ति साद्यस्क्रः । तत्रेदं समामनन्ति "सोमक्रयणस्त्रिवत्सः साण्डः" (तां० ब्रा० १६।१३।९) (का० श्रौ० २२।३।३९) इति। अस्ति तु प्रकृतावत्रैकहायनीक्रयार्था गौः, तत्रेदमाम्नायते, इयं गौस्तया ते क्रीणानि तस्यै शृतं, तस्यै शरस्तस्यै दधि तस्यै मस्तु तस्या आतञ्चनं तस्यै नवनीतं तस्या आमिक्षा तस्यै वाजिनमिति । (आ० श्रौ० १०।२५।९) तदिह साद्यस्क्रे चोदकप्राप्तम् । तत्र सन्देहः किं गोशब्दस्थाने ऊहं कृत्वाऽवशिष्टानां पदानामविकार उत सर्वेषामूह इति। यद्यप्येकहायन्यवस्थायां न विद्यन्ते शृतादयस्तथापि भावित्वेनापि तावत्सम्भवद्भिः स्वगुणैरेकहायन्येव प्रकाश्यते दृष्टार्थत्वात् । त्रिवत्से त्वभावात् 'तस्मै शृतमित्येवं पुल्लिङ्गतया पठनीयमिति पूर्वः पक्षः । कर्माङ्गभूतायामेकहायन्यवस्थायां तावन्न सन्त्येव, भावित्वमपि नैकान्तिकं मरणसम्भवात् । अतो यथाकथञ्चित्प्ररोचनार्थं कीर्त्यन्ते । तावच्च साण्डेऽपि सम्भवति साण्डादपि या गौर्निष्पद्यते तस्या एतेऽवाप्यमानाः साण्डादेवाप्ता भवन्तीति । तस्मान्नास्यूह (जै० ९।१। अ० १४) इति सिद्धान्तः ।

(३) ज्योतिष्टोमेऽत्र याच्ञाक्रयणमाम्नातं "द्वादशाहं दीक्षितो भृतिं वन्वीते" (आ० श्रौ० १०।१८।४)ति याच्ञा । "अरुणया पिङ्गाक्ष्या क्रीणाती" (तै० सं० ६।१।६) ति क्रयः । तत्र सन्देहः । किं यस्य न विद्यते दक्षिणाद्रव्यं भृतिस्तेन वनितव्या, यस्य च न विद्यते सोमस्तेन क्रेतव्यः । उतोभयथापि सति चासतीति ।

तत्र द्रव्यार्थं याच्ञाक्रयणमविद्यमानद्रव्यस्य स्यात् । द्रव्यवतस्त्वनर्थकं तस्मान्न तस्य याच्ञादावधिकार इति प्राप्ते—स्यादेवं यदि द्रव्यमात्रप्रयुक्तं स्यात् । अपूर्वप्रयु-

आध्वर्यवपद्धतिः।

पुनः सोमविक्रयी(१) भूयो वा अतः सोमो राजार्हतीत्याह।

अध्वर्युः--भूय एवेत्यादि।

पदा ते क्रीणानीति तृतीयं पणनम्।

पुन'र्भूयो वा अतः सोमो राजार्हती'त्याह सोमविक्रयी।

अध्वर्युः—'भूय एवातः सोमो राजार्हति महाँस्त्वेव गौर्महिमा गौर्वै प्रतिधुक् तस्यै श्रृतं तस्यै शरस्तस्यै मस्तु तस्या आतञ्चनं तस्यै नवनीतं तस्यै घृतं तस्या आमिक्षा तस्यै वाजिनम्।

अर्द्धेन ते क्रीणानीति चतुर्थं पणनम्।

पुन 'र्भूयो वा अतः सोमो राजार्हती'त्याह सोमविक्रयी।

अध्वर्युः--'भूय एवातः सोमो राजार्हति महाँस्त्वेव गोर्महिमा गौर्वै प्रतिधुक् तस्यै श्रृतं तस्यै शरस्तस्यै मस्तु तस्या आतञ्चनं तस्यै नवनीतं तस्यै घृतं तस्या आमिक्षा तस्य वाजिनम्।

गवा ते क्रीणामीति पञ्चमं पणनम्।

चतुर्षु क्रीणानीति दन्त्यः, पञ्चमे क्रीणामीत्यौष्ठ्यः(२)।

ततः क्रीतः सोमो राजा वयाꣳसि प्रब्रूहीत्याह सोमविक्रयी।

क्तं त्विदम्। अतोऽनेन विनाऽपूर्तमेव वैगुण्यान्नोत्पद्यते। तस्मान्नित्यं याच्ञाक्रयणमिति (पू० मी० ६।८। अ० ७) सिद्धान्तः।

एवं "अग्नीदग्नीन्विहर" (श० ब्रा० ४।२।४।११। का० श्रौ० ९।७।४।) इति प्रैषार्थं पूर्वमेवाऽऽग्नीध्रेण बुद्धेऽपि स प्रैषः कार्यः। वाजपेये सत्यपि वस्त्रान्तरे "दर्भमयं परि (धापय) दधाति" (तं० ब्रा० १।३।७।१) इति विहितमनुष्ठेयम्। पशौ "यत्पशुर्मायुमकृत" (तै० सं० ३।१।४) इति विहितः संज्ञपनहोमो मारणवेलायामकृतेऽपि पशुना शब्दे कृते कर्तव्यः।

(१) अस्ति सोमविक्रयी तत्र सन्देहः। स किमध्वर्व्वादीनामन्यतमः, उतैभ्योऽन्य इति। तेषां सङ्कीर्तनात्तेषामन्यतम इति पूर्वः पक्षः। विक्रयस्याकृत्वर्थत्वात् कृत्वङ्करणार्थमुपात्ता ऋत्विजो न तं कुर्युः। तस्मादन्यो विक्रयी, इति सिद्धान्तः। तदुक्तं जैमिनि—कात्यायनाभ्याम्। "विक्रयी त्वन्यः कर्मणाऽचोदितत्वात्" (३।७।३१)। "विक्रयी त्वन्यः शूद्रसंयोगात्" (६।७।४) इति।

(२) वैश्यराजन्ययोः सोमयागे न्यग्रोधस्य सोमवत्क्रयणमाम्नातम् "क्रयणप्रभृत्यनुसोममावृता समानमासादनं प्रागभिषवात्" (का० श्रौ० १०।९।२९) इति। तस्मिन्पक्षे-विशेषः। सोमनिधानानन्तरं उपरवदेशे न्यग्रोधस्य निधानम्। सोमक्रयणनुमन्त्रणे (४।२०। पूर्वं ४९ पत्रे) स्वस्ति सोमन्यग्रोधसखा पुनरेही'ति। (पूर्वं ४७ पत्रं ११ पङ्क्तौ) सोमन्यग्रोधापनहने आहर। सोमन्यग्रोधपर्णाहने आहर। उष्णीपावाहरेति। अभिषेचनीयदशपयसो (का० श्रौ० १९।३।३३) स्तु बहुवचनेन सोमोपनहनान्याहर। सोमपर्णाहनान्याहरोष्णीपानाहरेति। तथा एष त (शु० य० सं० ४।२४) इति वाचने 'एष वां गायत्रो भाग इति मे सोमन्यग्रोधा-

आध्वर्यवपद्धतिः ।

अध्वर्युराह—चन्द्रं ते वस्त्रं ते छागा ते धेनुस्ते मिथुनौ ते गावौ त्रिसप्तेन्याः(१) ।

शुक्रं त्वेति हिरण्यमालभ्य वाचयति यजमानम् । हिरण्यमालभस्व "ॐ शुक्रन्त्वा शुक्रेण क्रीणामि चन्द्रञ्चन्द्रेणामृतममृतेने"ति ब्रूहि यजमानो हिरण्यमालभ्य—

"ॐ शुक्रन्त्वा शुक्रेण क्रीणामि चन्द्रञ्चन्द्रेणामृतममृतेन" (४।२६) ।

सग्मेत इति सोमविक्रयिणर्ठ० हिरण्येनाभिकम्पयति ।

"ॐ सग्मे ते गोः" (४।२६) ।

अस्मे त इति यजमानसहितं निदधाति हिरण्यम् ।

"ॐ अस्मे ते चन्द्राणि" (४।२६) ।

सोमविक्रय्येतदादत्ते हिरण्यम् ।

अध्वर्युरजां प्रत्यङ्मुखीमालभ्य वाचयति यजमानं तपसस्तनूरिति ।

अजामालभस्व "ॐ तपसस्तनूरसि प्रजापतेर्वर्णः÷परमेण पशुना क्रीयसे सहस्रपोषम्पुषेयम्" इति ब्रूहि । यजमानोऽजामालभ्य—

"ॐ तपसस्तनूरसि प्रजापतेर्वर्णः परमेण पशुना क्रीयसे(२) सहस्रपोषम्पुषेयम्" (४।२६) ।

अध्वर्युः सोमविक्रयिणे सव्येनाजां प्रयच्छन्मित्रो न इति ।

भ्यां ब्रूतादेष वां त्रैष्टुभो भाग इति मे सोमन्यग्रोधाभ्यां ब्रूतादेष वां जागतो भाग इति मे सोमन्यग्रोधाभ्यां ब्रूताच्छन्दोनामानाꣳसाम्राज्यङ्गच्छेति मे सोमन्यग्रोधाभ्यां ब्रूतादि'ति । उभयोरालम्भनम् । आत्मानौ स्थः शुक्रस्ते गृह्य इति । सोमोपनहनमास्तीर्य न्यग्रोधोपनहनस्यास्तरणम् । सोममानानन्तरं तद्वदेव मन्त्रेण मानं उष्णीषेण बन्धनमङ्गुल्या मध्ये विवरणं च, उभयोः सोमविक्रयिणे समर्पणम् । 'सोमविक्रयिन्न क्रय्यौ ते सोमन्यग्रोधौ राजानौ' इति प्रश्नः । 'क्रय्यावि'ति प्रतिवचनम् । तौ वै ते क्रीणानीति । भूयो वा अतः सोमन्यग्रोधौ राजानावर्हतः । भूय एवातः सोमन्यग्रोधौ राजानावर्हतो महास्त्वेवेत्यध्वर्युः । क्रीतौ सोमन्यग्रोधौ राजानौ वयाꣳसि प्रब्रूहीति ।

(१) शाखान्तरे "एकहायन्या अजया क्रीणाति, हिरण्येन क्रीणाति, स्वशाखायां च "स आह ,चन्द्रन्ते वस्त्रं ते छागा ते धेनुस्ते मिथुनौ ते गावौ तिसस्तें ऽन्या" (श० ब्रा० ३।३।३।४) इत्यादिना दश क्रयद्रव्याणि विहितानि। तेषां विकल्पः समुच्चयो वेति विचारः । तत्र ब्राह्मियवन्यायेन (जै० १२।३।४) कार्थत्वाद्विकल्प इति पूर्वपक्षे-बहुभिर्द्रव्यैर्विक्रेतुरानतेः सौलभ्यात् "दशभिः क्रीणाति "तं वै दशभिरेव क्रीणीयान्नादशभि" (श० ब्रा०।३।३।३।१८) रिति सङ्ख्योक्तेश्च समुच्चय इति पूर्वतत्र (१२।४।३) सिद्धान्तः । तथा हि कात्यायनः-"चोदनागुणेषु च प्रकल्प्युपबन्धाभ्याम्" (१।८।२२) इति ।

(२) न्यग्रोधे चास्य मन्त्रस्योहः "परमेण पशुना क्रीयेथे इति । शुक्रन्त्वेति (४।२६) मन्त्रे 'शुक्रौ वां शुक्रेण क्रीणामि चन्द्रौ चन्द्रेणामृतावमृतेने'ति ।

आध्वर्यवपद्धतिः ।

"ॐ मि(१)त्रो नऽएहि सुमित्रधः" (४।२७) ।

तूष्णीं दक्षिणेन सोममादाय सोम आगत उत्तिष्ठति वा यजमानः । अध्वर्युर्दीक्षितोरौ दक्षिणे प्रत्युह्य(२) वासो निदधातीन्द्रस्योरुमिति।

"ॐ इन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तꣳस्योन÷स्योनम्"(४।२७)।

यजमानः स्वानब्भ्राजेति (सस्वरं) (३)जपति सोमविक्रयिणमीक्षमाणः।

"ॐ स्वान भ्राजाङ्घारे वम्भारे हस्त सुहस्त कृशानवे ते वं÷सोमक्रयणास्ताꣳरक्षद्ध्वम्मावोदभन(४)(४।२७) ।

अपोणुते दीक्षितः शिरः स्वकीयं पत्नी च । सोमविक्रयिहस्ता-

---

(१) न्यग्रोधे चोहः । 'मित्रो न एतर्हि० सुमित्रधावि'ति । उपमार्थत्वान्मित्रशब्दस्याविपरिणाम इति कर्कः ।

(२) प्रत्युह्य प्रतिनीयोर्ध्वमुत्थाप्येत्यर्थः । प्रतिपूर्वक ऊह वितर्क (भ्वा० आ० ६८८) इत्येषोऽत्र नयनार्थः । "वस्त्रान्तमुत्कृष्येन्द्रस्योरुमाविशेति दक्षिणस्मिन्नूरावासादयती" (२।१।४।१८) ति मानवे । न्यग्रोधे चोहः । 'इन्द्रस्योरुमाविशतं दक्षिणमुशन्ता उशन्तं स्योनौ स्योन' मिति । उभयोरूरावाधानम् ।

(३) यजमानो जपतीति कर्कः । अध्वर्युरिति याज्ञिकाः ।

(४) अत्र प्रसङ्गान्मन्त्राणां स्वरश्चिन्त्यत । मन्त्रा हि कस्यां चिच्छाखायामुदात्तानुदात्तस्वरित (शु० प्रा० १।१२८) लक्षणैस्त्रिभिः स्वरैः पठ्यन्ते क्वचिच्च प्रचयेन सह चतुर्भिः स्वरैः । तत्र कर्मसु किं त्रैस्वर्यचातुःस्वर्ययोः समुच्चयो विकल्पो वा अथोभयहानैकश्रुत्या (प्रचयेन) प्रयोग इति संशयः । अत्र त्रयः पक्षाः प्रस्फुरन्ति । प्रयोगवचनस्य सर्वाङ्गोपसंहारित्वात् सवशाखाप्रत्ययन्यायेन (पू० मी० २।४।२) त्रैस्वर्यादीनां समुच्चय इत्येकः पूर्वः पक्षः । गौत्युपाय (जै० ९।२।७) वत्त्रैस्वर्यादीनामक्षराभिव्यक्त्यर्थत्वादेकेनैव तत्सिद्धे-(अध्ययनविधेस्तिलक्षणस्य प्रयोजनस्यैकत्वाद्वा) विकल्प इति द्वितीयः पक्षः । नैतौ द्वौ पक्षौ युक्तौ "तानो यज्ञकर्मणो" ति स्मृत्यनुमिताद्वचनात् ऐकश्रुत्यमिति सिद्धान्तः ।

ननु तर्हि किमर्थं स्वराध्ययनम् । अर्थावगमार्थं तु स्वराध्ययनं स्वरविशेषाधीनत्वादर्थविशेषाणां "बहुव्रीहौ प्रकृत्या पूर्वपदमि" (पा० ६।२।१) त्यादिवचनात्तस्मात्तानेन प्रयोगइति जैमिनेः सिद्धान्तः (९।२।८) । तथैव कात्यायनः—"मन्त्रे स्वरक्रियायथाम्नातमविशेषात् । भाषिकस्वरो वोपपन्नमन्त्रोपदेशात्। तानो वा नित्यस्वादि"(का० श्रौ० सू० १।८।१६-१८) ति ।

कर्मणि प्रावचनस्वरेणैव मन्त्रोच्चारणं कर्तव्यं, ब्राह्मणोत्पन्नमन्त्राणां तु भाषिकस्वरेणैवोच्चारणं कर्तव्यमिति (जै० १२।३। सू० २०।२५) सिद्धान्तः ।

अयं चैकश्रुति (तान) विधिर्जपमन्त्रादिव्यतिरिक्तविषयः । "यज्ञकर्मण्यजपन्यूखसाम (१।२।३४) स्वि"ति पाणिनिस्मृतेः । जपादौ तु यथाध्ययनं चातुःस्वर्येण त्रैस्वर्येण वा प्रयोगः । तथैव कात्यायनः-"एकश्रुति दूरात्सम्बुद्धौ यज्ञकर्मणि सुब्रह्मण्यासाम-जप-न्यूङ्ख-याजमानवर्जमि" (१।८।१९) ति । एकश्रुतिर्नाम "उदात्तानुदात्तस्वरितानां परः सन्निकर्ष एकश्रुत्य" (१।२) मित्याश्वलायनश्रौतसूत्रादुदात्तानुदात्त-

आध्वर्यवपद्धतिः ।

द्विरण्यर्ठ० सहसाछिद्य तञ्च पृषता वरत्राकाण्डेनाहन्ति (१)वा ॥८॥

अत्र(२)वा दण्डदानम् ।

यजमानं गृहीतसोमं परिमाग्न इति वाचयत्यध्वर्युः ।

"ॐ परिमाग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भज" इति ब्रूहि ।

यजमानः—

"ॐपरि माग्ने दुश्चरिताद्बाधस्वा मा सुचरिते भज"(४।२८) ।

उत्तरे च कर्म्मणी यजमानकर्तृके । यजमानः उदायुषेत्युत्थानर्ठ शीर्ष्णि सोमं कृत्वा पाणिमन्तर्धाय—

"ॐ उदायुषा स्वायुषोदस्थाममृतांऽ२ अनु" (४।२८) ।

प्रतिपन्थामित्यनोऽभ्येति(३) क्रयस्थानादक्षिणतस्तिष्ठच्छुन्नर्ठ समङ्क्ति धौतं प्रउगाच्चोद्धते फलके ।

"ॐ प्रति पन्थामपद्महि स्वस्तिगामनेहसम् । येन विश्वाः परि द्विषो ब्वृणक्ति विन्दते ब्वसु" (४।२९) ।

ब्रह्मा सोमे क्रीते प्राङतीत्य पूर्वेणानः परीत्यापरेण वा दक्षिणाऽनुगच्छत्या निधानादक्षिणेषामाश्रितः ।

अध्वर्युः कृष्णाजिनमस्मिन्नास्तृणात्यदित्या स्त्वगिति ।

"ॐ अदित्यास्त्वगसि" ।

यजमानाद्गृहीत्वा तस्मिन्सोमं निदधात्यदित्यै सद(४) इति ।

स्वरितस्वराणामभावः । सुब्रह्मण्या-न्यूङ्खादीनां स्वरूपाणि लाट्यायना (१।३।२-१।४।३१) श्वलायन (उ० १।११) श्रौतसूत्रेष्ववगन्तव्यानीति ।

(१) अथवा नाहन्ति शाखान्तरात् । अत्राहापस्तम्बः-"यदि सोमविक्रयी प्रतिविवदेत् पृषतेन वरत्राकाण्डेनावक्षायं नाशयेयुः । लकुटैर्वनन्तीत्येके । नित्यवदेके वधं समामनन्ती" (१०।२७।६-८)ति 'सामविक्रयिणे किञ्चिददद्यादिति' (२।१।४।१२) मानवे।

(२) अस्मिन्नवसरे मंत्रावरुणाय दीक्षितदण्डस्य प्रदानं कर्तव्यं विकल्पेन "क्रीते वे" (का० श्रौ० ६।४।६।) त्युक्तत्वात् । अथवा अग्नीषोमीये एव "अग्निर्ह दैवीना" (का० श्रौ० ६।४।३) मित्येतस्मादनन्तरम् ।

(३) एतच्चानः सामक्रयार्थमागच्छद्भिः सह नेयम् । तथा च मानवे-"सछदिष्केणानसा राजानमच्छयन्ति" (२।१।३।४८) आपस्तम्बसूत्रेऽपि-"अपि पन्थागन्महात्युद्भृतपूर्वफलकेनानसा परिश्रितेन छदिष्मता प्राज्ञः साममच्छ यन्ति । शीर्ष्णा गिरौ क्रीतं हरन्त्यपरेणोत्तरेण वा राजानं प्राडीषमुदङ्शीर्षं वा नद्धयुगं शकट" (१०।२४।२-४) मिति । न्यग्रोधस्य संस्कारपक्षे तस्याप्यादानं शिरसि करणं च भवति ।

(४) न्यग्रोधपक्षे तस्यापि सहैव स्थापनं, 'आदित्यै सद आसीदतमि'त्यूहश्च ।

अभिषेचनीये च "सामं क्रीत्वा द्वैधमुपनह्य पर्युह्ये" (श० ब्रा० ५।४।५।१५) (का० श्रौ० १५।४।३) त्याम्नातत्वात्सोमविक्रयिणः सकाशाद्विरण्यदानानन्तरं सोमस्य

आध्वर्यवप्रकृतिः ।

"ॐ अदित्यै सदऽआसीद" (४।३०) ।

अस्तभ्नाद्यामिति सोममालभ्य वाचयति यजमानम् । (१) सोममालभस्व ।

"ॐअस्तभ्नाद्यां वृषभोऽअन्तरिक्षममिमीत वरिमाणम्पृथिव्याः ।

आसीदद्विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि" (४।३०) इति ब्रूहि ।

यजमानः—सोममालभ्य पठेत् ।

"ॐ अस्तभ्नाद्यां वृषभोऽअन्तरिक्षममिमीत वरिमाणम्पृथिव्याः ।

आसीदद्विश्वा भुवनानि सम्राड् विश्वेत्तानि वरुणस्य व्रतानि" (४।३०) ।

वनेषु व्यन्तरिक्षमिति सोमपर्याणहनेन परित्य(२) ।

"ॐ वनेषु व्यन्तरिक्षन्ततान व्याजमर्वत्सु पयऽउस्रियासु ।

हृत्सुकृतं वरुणो विक्वयन्निन्दिवि सूर्य्यमदधात्सोममद्रौ" (४।३१) ।

कृष्णाजिनं रथस्य पुरस्तादासजति सूर्यस्य चक्षुरित्यासनयोरन्यतरदेकं चेद्ग्रीवा अवकृत्य ।

"ॐ सूर्यस्य चक्षुरारोहाग्नेरक्षणः कनीनकम् ।

यत्रैतशेभिरीयसे भ्राजमानो विपश्चिता" (४।३२) ।

अनड्वाहौ(३)युनक्त्युस्रावेतमिति । युगपत्तद्वचनत्वाद्भेदे मन्त्रावृत्तिः सान्निपातित्वात् ।

"ॐ उस्रावेतन्धूर्षाहौ युज्येथामनश्रूऽअवीरहणौ ब्रह्मचोदनौ ।

स्वस्ति यजमानस्य गृहान् गच्छतम्" (४।३३) ।

ईषान्तरे भूमिष्टः सुब्रह्मण्यः पलाशशाखया प्राजति ।

अध्वर्युः पश्चात्परीत्याऽपालम्बं(४) गृहीत्वा सोमाय क्रीतायानुवाचयति ।

वस्त्रद्वये पृथक् पृथक् बन्धनं। न्यग्रोधस्य च, यजमानः सर्वाञ्छिरसि कृत्वा गच्छति, सर्वपामासादनं, ' अदित्यै सद आसीदते' त्यूहश्च ।

(१) न्यग्रोधे च 'सोमन्यग्रोधावालभस्वे'ति प्रषः ।

'अस्तभ्नीतां द्यां वृषभावन्तरिक्षममिमातां वरिमाणं पृथिव्याः । आसीदतं विश्वा भुवनानि सम्राजौ विश्वेत्ता' नीत्याद्यूहः ।

अभिषेचनीये च 'सोमन्यग्रोधानालभस्वे' ति प्रैषः । 'अस्तभ्ना द्यां वृषभाऽअन्तरिक्षममिमत वरिमाणं पृथिव्याः। आसीदत विश्वा भुवनानि सम्राजो विश्वे' दित्यादि ।

(२) अत्रानसो वाससा वेष्टनमिति केचित् । तथा च मानवे-'वनेषु व्यन्तरिक्षमित्यनो वाससा पर्याणह्यती' (२।१।४।२३) ति ।

(३) अत्र पश्वेकत्वाधिकरणन्यायेन (पू० मी० ४।१।५) द्वित्वस्य विवक्षितत्वं द्रष्टव्यम् ।

(४) अत्र विप्रतिपत्तिः । अपालम्बशब्देन पश्चादावद्धा रज्जुरभिधीयते यया

आध्वर्यवपद्धतिः ।

"ॐ सोमाय क्रीतायाऽनु ब्रूऽहि"(१)सोमाय पर्युह्यमाणायेति वा ।

हौत्रपद्धतिः ।

अथ सोमक्रयः । क्रीत्वा राजानमाधाय शकटे, ततः शकटस्य पश्चाद्-न्तरेण वर्त्मनी तिष्ठन्ननूच्य अध्वर्युणा सोमाय पर्युह्यमाणायानुब्रूऽहो(२) त्युक्ते होताऽऽचम्य ।

ॐ भद्रादभिश्रेयः प्रेहि बृहस्पतिः पुर एता ते अस्तु ।

अथेवमस्यवर आपृथिव्या आ रे शत्रून्कृणुहि सर्ववीरां(३) ३ म् ।

भद्रादभिश्रेयः प्रेहि बृहस्पतिः पुर एता ते अस्तु ।

अथेवमस्य वर आपृथिव्या आ रे शत्रून् कृण्णुहि सर्ववीरोम् ।

भद्रादभिश्रेयः प्रेहि बृहस्पतिः पुर एताते अस्तु ।

अस्यास्तृतीये वचनेऽर्द्धर्चे विरमेत्(४) तत अनुसंयन्नन्तरेण वर्त्म-नी तिष्ठन्ननूच्य ।

अथेमवस्य वर आ पृथिव्या आ रे शत्रून्कृणुहि सर्ववीरो ३ म्(५)

अवतारे अनः प्रवर्तमानं विधीयते इति कर्कः । पश्चाद्भागे वद्धं लम्बायमानं दारु अपा-लम्बशब्देनोच्यते येनोध्वंप्रदेशे प्रचलतः शकटस्य स्तम्भनेन पर्यावर्तनं वार्यते इति हरि-स्वामिनो याज्ञिकाश्च ।

(१) न्यग्रोधश्चेत्सोमन्यग्रोधाभ्यामनुब्रूऽहि । पर्युह्यमाणाभ्यामिति वा ।

अभिषेचनीये च सोमन्यग्रोधेभ्यः पर्युह्यमाणेभ्य इति वा । वाजपेये सोमेन सह सुरा-द्रव्याणां निष्पन्नसुराया वा क्रयणं भवति । तथा हि कात्यायनः-"सोमात् क्रीयमाणात् सहितं दक्षिणतः सीसेन परिस्तृतः क्रयणं केशवा (१४।१।१४) दि"ति ।

(२) शाखान्तरात् 'सोमाय क्रीतायानुब्रूऽहो' ति वा प्रेषितो होताचम्य सोम-वहनार्थशकटस्य पश्चात् शकटद्वयसङ्कर्षणसमुत्पादितवर्त्मप्रवाहिकाद्वयमध्ये यदुच्चं स्थलं तत्र तिष्ठन् भद्रादभिश्रेय इति त्रिराह ।

अत्राश्वलायने-'अनसः पश्चात् त्रिपदमात्रेऽन्तरेण वर्त्मनी तिष्ठे' दिति विशेषः । तथा च सूत्रम् । "तं प्रवक्ष्यत्सु पश्चादनसस्त्रिपदमात्रेऽन्तरेण वर्त्मनी अवस्थाये" (पत्रं १६५) ति ।

(३) सौत्रमन्त्रोऽयम् (आश्व० श्रौ० १६५ पत्रे । शां० श्रौ० ५१ पत्रे च) ।

(४) यावदध्वर्यवो न गच्छति, गच्छत्सु तेषु तिष्ठन्नेव अर्धर्चमुक्त्वा चक्रवर्त्मनी अन्तरेणानुगच्छन्नृगन्तराः—षड्ऋचोऽन्वाह ।

(५) अत्र याजुषैष्टिकपाशुक-सौमिकमात्रशाङ्खायनीयहौत्रप्रकृतिकाग्निष्टोमे सा-मिधेन्याद्यैष्टिकपाशुकानुवचनेषु "उत्तमस्य छन्दोमानस्योर्द्धमादित्यञ्जनात्स्थान ओं-कारः प्लुतस्त्रिमात्रः शुद्धः" (शां० श्रौ० १।१।१९) "स सर्वेषामृगणानां धर्मो ये कर्मसं-योगेन चोद्यन्त" (शां० श्रौ० १।१।२४) इत्यनेन ऋग्गणस्यान्ववसानेषु पारिभाषिक-शाङ्खायनसूत्रे विहितः प्राकृतः शुद्धः प्रणव इति चेन्न, पारिभाषिकत्वेन प्राकृतत्वात्तस्य । कातीयसूत्रे 'महाव्याहृतिरोम्पूर्वाः सामिधेनीः प्रणवेनार्धर्चशः संदध्यादि' (हौ० सूत्र०

हौत्रपद्धतिः ।

इ(१)मां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण संशिशाधि ।
ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेमो ३
वने(२)षु व्यन्तरिक्षं ततान वाजमर्वत्सु पय उस्रियासु ।
हृत्सु क्रतुं वरुणो अप्स्वग्निं दिवि सूर्यमदधात्सोममद्रो ३
(३)सोम यास्ते मयोभुव ऽऊतयः सन्ति दाशुषे । ताभिर्नोऽविता भवो ३
इमं यज्ञमिदं वचो जुजुषाण ऽउपागहि । सोम त्वं नो वृधे भवो ३
सोम गीर्भिष्ट्वा वयं वर्धयामो वचाविदः । सुमृळीको न ऽआविशो ३
गयस्फानोऽअमीवहा वसुवित्पुष्टिवर्द्धनः" ।
अत्रार्धच विरमेत् ।

ततः(४) शालामग्रेण शकटमवस्थाप्य प्रपादयन्ति राजानम् । येन(५) व्रजेयुस्तेनानुसमियात् ।
"सुमित्रः सोम नोभवो ३
या ते (६)धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम्"॥
इत्यनुप्रपद्य विरमेत् । अग्नेणाहवनीयं दक्षिणा तिष्ठन्-
"गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्यो ३
(७)आ गन्देव ऋतुभिर्वर्धतु क्षयं दधातु नः सविता सुप्रजामिषं ।
स नः क्षपाभिरहभिश्च जिन्वतु प्रजावन्तं रयिमस्मे समिन्वतो ३

१।१) ति प्रकृतौ मकारान्तस्यैवोक्तत्वात् 'प्रकृतिवद्विकृतिरि'ति न्यायेन पारिभाषिका आगुवषट्कारप्रणवाद्याः, प्राकृताधर्माः कातीयोक्ता एव । सोमक्रयादिसौमिकानुवचनेषु तु "शुद्ध एव प्रणवः स्याच्छस्त्रानुवचनयोर्मध्य इति ह स्माह कौषीतकिस्तथा संहितं भवति मकारान्तो वसानार्थः' इति शस्त्रानुवचनयोः प्रणवस्य सौमिके पुनर्विधानादिडो-पाह्वानाशासनवच्छस्त्रानुवचन ऋक्सन्ततौ शुद्ध एव प्रणवः । शाङ्खायनसूत्रेऽपि "शोंसावो ३ इत्याहावः शस्त्रादौ प्रातःसवने तेनाहूयोपांशु तूष्णीं शंसम्" (७।९।१) "सोऽअध्वरा करति जातवेदो ३ प्र वो देवायेत्याज्ये" (७।९।३) मित्यत्र पुनर्विधानेन सौमिकत्वाच्च प्रशास्त्रादीनामपि होत्राशंसित्वेन होतृविकारत्वात्तद्याज्यास्वप्यागुवषट्-कारादिकं कातीयधर्मेण होतृवदेव, वषट्कारादीनां प्राकृतत्वादिति ।

(१) ऋ० ८।४२।३। (२) ऋ० ९।८९।२। (३) ऋ० १।१४।९—१२ ॥

(४) शालां पूर्वेणाध्वर्यवः शकटमवस्थाप्य प्रपादयन्ति=प्रवेशयन्तिशालायां सोमम्। दशपेये (श० ब्रा० ९ । ४ । ९।१९। का० श्रौ० १९।४।३ ।) तु ब्रह्मागारं नयन्ति । तत्रापि कथं नाम होतान्वियादित्याध्वर्यवस्य शालामग्रेणेत्यादेरुपदेशः । आश्वलायने विशेषः—शालाया अग्रेणोदङ्मुखे शकटे स्थापिते तस्य दक्षिणपार्श्वेन गत्वा अग्रतो राजानमभिमुखो होताऽवतिष्ठति आ प्रपादनात् । तथा च सूत्रम् । 'अवस्थितेऽनसि दक्षिणात्पक्षादभिक्रम्य राजानमभिमुखोऽवतिष्ठत' (१६९ प०) इति ।

(५) येनाध्वर्व्वादयो व्रजेयुर्यथाहवनीयं पूर्वेण वापरेण वा तेनानुसमियाद्धोता ।

(६) ऋ० १।९१।१९ । (७) ऋ० ४।५३।७ ।

आध्वर्यवपद्धतिः ।

दीक्षितश्चान्वारभते(१) सोमम् ।
त्रिरुक्तायां प्राङ् यात्वा दक्षिणाऽऽवर्त्य शालां गच्छति ।
अध्वर्युर्भद्रो म इति वाचयति यजमानम् ॥

होत्रपद्धतिः ।

आगन्देव ऋतुभिर्वर्द्धतु क्षयं दधातु नः सविता सुप्रजामिषं ।
स नः क्षपाभिरहभिश्च जिन्वतु प्रजावन्तं रयिमस्मे समिन्वतो ३
आगन्देव ऋतुभिर्वर्द्धतु क्षयं तदधातु नः सविता सुप्रजामिषं ।
स नः क्षपाभिरहभिश्च जिन्वतु प्रजावन्तं रयिमस्मे समिन्वतो३म् ।

---

(१) ब्रह्मा च प्राङ् यात्वाऽनः पूर्वणापरेण वा गत्वाऽदक्षिणदिगाश्रितः पृष्ठतोऽनुगच्छत्यासोमनिधानादिति रामवाजपेयिनः। तथा हि कात्यायनः—"हिरण्यवत्यामाहुतायां दक्षिणानुगच्छत्याक्रयात्। क्रीते प्राङतीत्य पूर्वेणानःपरीत्य परेण वा दक्षिणतोऽनुगच्छत्याक्रयात्" (११।१।३-४) इति। अत्र शाङ्खायनकल्पः—दक्षिणतो न्यायं ब्रह्मकर्म (४।६।१।)।

कर्मणः क्रियमाणस्य दक्षिणतः स्थितेन ब्रह्मत्वमनुष्ठीयमानं न्यायवद् भवति। कुतः। सामर्थ्यात्। अथवा न्यायशब्दः प्राये वर्तते। दक्षिणतोन्यायं ब्रह्मकर्म बाहुल्यमेव। तथा च श्रुतिदर्शनानि। "तेन दक्षिणतो ब्रह्मासीत्तस्य दक्षिणतो वर्षीयानुदीचीनप्रवणो यज्ञः सर्तस्य" इति।

शतपथे च "ते होचुः। को नो दक्षिणत आसिष्यतेऽथाऽभयेऽनाद्रा उत्तरतो यज्ञमुपचरिष्याम" (४. ६. ६. १.) इति। अतश्च सोमेऽप्यय न्यायस्तुल्यत्वात्।

अभियुक्ततरैरन्यरुक्ता ये ब्रह्मसंचराः।
न्यायतो वचनाच्चापि श्लोककैस्तान्निबोधत ॥ १ ॥
व्रजेदाहवनीयं तु पूर्वेणाप्यपरेण वा।
इष्टिपश्वोरयं प्रोक्तः संचरो वरणात्सदा ॥ २ ॥
दर्शे च पौर्णमासे च वरणात्प्राङ् न विद्यते।
नचैवोत्सर्जनादूर्ध्वं ब्रह्मकर्म पशौ तथा ॥ ३ ॥
न साक्ष्यं पुरुषार्थेषु यज्ञमित्यधिकारतः।
नातः संध्यावाग्यमने शयने न प्रबोधने ॥ ४ ॥
न विष्णुक्रमवात्सप्रे न कण्डूयनमेहने।
समिद्वनीवाहभृतौ नैव लब्धप्रवाचने ॥ ५ ॥
भस्मोद्वापे तथारूढे प्रतिपत्तिक्रियासु च।
अग्निहोत्रे श्रुतो ब्रह्मा कुण्डपाय्येऽपि तत्तथा ॥ ६ ॥
कर्मणः क्रियमाणस्य प्राय आसनसंचरौ।

आध्वर्यवपद्धतिः।

"ॐभद्रो मेऽसि प्रत्यवस्व भुवस्पते विश्वान्यभि धामानि।
मा त्वा परिपरिणो विदन्मा त्वा परिपन्थिनो विदन्मा त्वा वृकाऽ अघायवो विदन्।
श्येनो भूत्वा परापत यजमानस्य गृहान्गच्छ तन्नौ संस्कृतम्" इति ब्रूहि। यजमानः-

हौत्रपद्धतिः।

इति परिधाय उपस्पृश्योत्सृज्यते। इति सोमक्रयः।
मदन्तीभिरुदकार्थोऽत ऊर्ध्वमग्नीषोमप्रणयनात्।

दक्षिणान्यायतः सूत्रे अग्नीनां चाव्यवायतः॥ ७॥
हुते हिरण्यवद्धोमे अनुगच्छति दक्षिणः।
परीत्यानः क्रये वृत्त आ निधानात्तथा व्रजेत्॥ ८॥
प्रवर्ग्याभिष्टवे पश्चाद्दक्षिणाग्नेरुदङ्मुखः।
आसित्वा चानुसंयाने यायात्प्राग्दक्षिणेन तम्॥ ९॥
आसीतोदङ्मुखो नित्यं वेद्यंसादक्षिणाद् बहिः
वेदिमानप्रभृत्यान्तात्सति साक्ष्यस्य संभवे॥ १०॥
अग्निप्रणयनं साग्नावन्यत्र च यथोदितम्॥
प्रवर्ग्योत्सादने त्वेति दक्षिणेनाविरोधतः॥ ११॥
आग्नीध्रे यदि घर्मः स्याद् दक्षिणेना श्मासनम्॥
खरात्पात्रान्तरेणेत्य आस्तावादेष संचरः॥ १२॥
अनुव्रज्य ततोघर्मं गत्वा तीर्थेन चासनम्॥
यज्ञसंचर एष स्यात्प्रत्यगमनमिच्छतः॥ १३॥
अध्वरं दक्षिणेनैव शालाग्नीनपरेण तु।
मध्यन्दिने चेदाग्नीध्रे घर्मस्तत्रैव सञ्चरः॥ १४॥
प्रविश्य दक्षिणेनैव तत्रैवास्त उदङ्मुखः।
यज्ञसञ्चरमास्थायानुयायात्सदसः पुनः॥ १५॥
तेनैव शीघ्रमागत्य प्राग्घोमात्तत्र चासनम्।
प्रासे तेनैव निः सपेद्घर्मोत्सादकर्मणि॥१६॥
परिस्पन्दमनुव्रज्य प्रत्येयाच्च यथागतम्।
दक्षिणेनैव सदसो हविर्धाने च सञ्चरः॥ १७॥
उत्सादनं चेदग्नौ स्यादव्यवायोऽत्र कारणम्।
प्रणयन्ति यदाग्निं च सोमञ्चाध्वर्यवस्तदा॥ १८॥
होतृवत्सञ्चरो ज्ञेयः स एवापररात्रिकः।
तत आदाय राजानमन्वेत्यग्निं परेच्छया॥ १९॥
हुते वैसर्जने होमे रिक्तको वा यथागतम्।
राजानमग्रहस्ते तु कृत्वाग्नीध्रे सहासनम्॥ २०॥
एवमाहवनीयेऽपि यावद्वैसर्जनाहुतिः।

आध्वर्यवपद्धतिः ।

"ॐभद्रो मेऽसि प्रत्यवस्व भुवस्पते विश्श्वान्यभि धामानि ।
मा त्वा परिपरिणो विदन्मा त्वा परिपन्थिनो विदन्मा त्वा वृका अघायवो विदन् ।
श्येनो भूत्वा परापत यजमानस्य गृहान्गच्छ तन्नौ संस्कृतम्"(१) (४ । ३४) ।

अध्वर्युः-सुब्रह्मण्यां वाचयति (चाह्वयति) (२)सुब्रह्मण्यो ३ॐ सुब्रह्मण्यो ३ मिति त्रिरुक्त्वा सकृन्निगदं यावद्देहं सुत्या भवति तथाऽऽह ।

अग्रेणैव वितानस्य प्रत्येत्य प्रविशेत्ततः ॥ २१ ॥
द्वारा सोमः ससोमो वा हविर्धानं तु पूर्वया ।
इच्छन्ति पश्चिमेमान्ये द्वारेणैव प्रवेशितुम् ॥ २२ ॥
ब्रह्मणोऽपि तथैवात्र सोमहस्तस्य सञ्चरः ।
मार्जालीयं तु पूर्वेण आगच्छेद्रिक्तको यदि ॥ २३ ॥
अनसो दक्षिणस्यैव आस्ते दक्षिणतस्ततः ।
उत्थाय पश्चिमे यामे साक्ष्यमध्वर्युकर्मणः ॥ २४ ॥
कृत्वा होतुस्ततः कुर्यात्पठतः स्वासनस्थितः ।
ततः प्रदक्षिणं यज्ञं परीत्याभिषवेक्षणे ॥ २५ ॥
प्रविशेत्पूर्वया द्वारा सर्पतामनु तद्वशः ।
सदःप्रवेशस्सूत्रोक्तः सञ्चरश्च विसंस्थिते ॥ २६ ॥
बहिः संज्ञस्य सदसि पवमानस्य चेत् क्रिया ।
पूर्वेणैव प्रशास्तारं ब्रह्मणो गतिरागतिः ॥ २७ ॥
मानसे ब्रह्मवद्ये च चक्रारोहण एव च ॥
यज्ञसञ्चर एष स्यात्पर्यत्येवाभिषेचने ॥ २८ ॥
कुर्वता न्यायवचनं व्यवायं प्रतिषेधता ।
उक्तमेव सुयज्ञेन तदेवेदमुदाहृतम् ॥ २९ ॥

(१) न्यग्रोधे विशेषः । भद्रो मे स्थः पृच्यवेथां भुवस्पती विश्वान्यभिधामानि। मा वां परिपरिणो विदन्मा वां परिपन्थिनो विदन्मा वां वृका अघायवो विदन्। श्येनौ भूत्वा परापतन्तं यजमानस्य गृहान् गच्छतं तन्नौ सस्कृतमिति । अभिषेचनीये च—भद्रा मे स्थः प्रत्यवध्वं भुवस्पतयो विश्वान्यभि धामानि । मा वः परि परिणो विदन्मा वः परिपन्थितो विदन्मा वो वृका अघायवो विदन् । श्येना भूत्वा परा पतत यजमानस्य गृहान् गच्छत तन्नौ संस्कृतमिति ।

(२) अध्वर्युरेव वाचनानन्तरं सुब्रह्मण्यामाह्वयेत्, अध्वर्युवेदे एवं विधानात् प्रैषस्य चानुक्तत्वात् सुब्रह्मण्यस्यापि प्रकारान्तरेणाह्वानस्योक्तत्वाच्च सुब्रह्मण्यः पुनः स्वकीयां सुब्रह्मण्यां निगदवर्जितां त्रिः कृत्वः प्राचि प्रवर्तमानेऽनसि षट्कृत्वः प्रतीचीति ।

अध्वर्युः कथमाह्वयतीत्यपेक्षायामाह—सुब्रह्मण्यो ३ॐसुब्रह्मण्यो ३ मित्येवमभ्यस्तं त्रिरुक्त्वा = वारत्रयमुच्चार्य शेषमिन्द्रागच्छेत्यादिनिगदं (श०ब्रा० ३।३।४।१८।१९) सकृदेकवारमुक्त्वा यावद्देहऽतीते सुत्या भवति = अस्मात् क्रयणदिवसादारभ्य यावत्सु दिनेष्व-

आध्वर्यवपद्धतिः ।

तिक्रान्तेषु सुत्या भवति तथा आह । तद्यथा—त्र्युपसत्के त्र्यहे सुत्यामिति, षडुपसत्के षडहे सुत्यामिति, द्वादशोपसत्के द्वादशाहे सुत्यामिति "अथ सुब्रह्मण्यामाह्वयता (श० ब्रा० ३।३।४।१७)ति प्रकृत्य सर्वस्य श्रुतत्वात् । अत्र श्रुतौ "इत्यहे" सुत्यामितीति साभिनयं संख्यां प्रतिनिर्दिशति । इत्यहे एतावदहे—द्व्यहे त्र्यहे षः सुत्यामिति । एवमेतेषां सर्वसङ्ख्याविशेषशब्दानां परिग्रहार्थ इति शब्दः, यावदहे सुत्या भवतीति, तस्मात् वर्तमानसुब्रह्मण्यादिवसादारभ्य यावदहेऽतीते सुत्या भवति तावदह इति वक्तव्यम् । यथा तावद्द्वादशोपसत्के द्वादशाहे सुत्यामिति क्रयकाले वाच्यं त्र्युपसत्के त्र्यह इति । कुत एतत् अतीतेनैव द्वादशाहादिना सुत्योपलक्षणीया न वर्तमानेन, कुत एतत् एकस्याः सुत्यायास्त्र्यहादौ वर्तमाने असम्भवात् । अथान्त्येनाह्ना वर्तमानेन लक्ष्यत इत्युच्यते तथापि इह यावच्छब्दो विहन्यते, तथापि सति 'यावतिथे' इति स्यात् प्रयोगश्च तदैवं स्यात् 'तृतीये' इति । तस्माद्यावदहेऽतीते सुत्या भवति तावदह इति वाच्यमिति देवः ।

सुब्रह्मण्य एव सुब्रह्मण्यामाह्वयतीति हरिस्वामिनः । एतदपि समूलं यता मानव (२।१।४।३०) लौगाक्ष्यापस्तम्ब (१०।२८।४) सूत्रेषु विधानात् ।

अत्र 'सुब्रह्मण्य सुब्रह्मण्यामाह्वयेती'त्येवं प्रयोग उक्तोऽस्ति । वाजपेये च शक्रागच्छ हरिव आगच्छेति विश्वे ब्रह्माण आगच्छेति विशेषः । अग्निष्टुति च सुब्रह्मण्याग्नेयी (का० श्रौ० २२।५।२) भवति ।

अत्र मीमांसा—अस्त्यत्र ज्योतिष्टोमे देवताप्रकाशनार्थः सुब्रह्मण्यानिगदः "इन्द्रागच्छ हरिव आगच्छ मेधातिथेर्मेष वृषणाश्वस्य मेने । गौरावस्कन्दिन्नहल्यायै जार कौशिक ब्राह्मण गौतम ब्रुवाण" (श० ब्रा० ३।३।४।१८) (सा० ष० ब्रा० १।१।२) (तै० आ० १।१२।३-४) (द्रा० श्रौ० १।३।१) (ला० श्रौ० १।३।१) इति । सोऽयं निगदो विकृतावग्निष्टुति चोदकेनातिदिष्टः । तत्र "आग्नेयी सुब्रह्मण्या भवति" (का०श्रौ० २२।५।२) "अग्निष्टुत्स्वाग्नेयो निगदः" (ला० श्रौ० १।४।१ द्रा० श्रौ० १।४।३) इत्यादिवचनचयादिन्द्रपदस्थानेऽग्निपदं निक्षिप्यते "अग्न आगच्छ" इति। निगदेऽस्मिन्यानीन्द्रपदस्य विशेषणानि 'हरिव' इत्यादि सम्बुध्यन्तपदानि तान्यप्यूहनीयानि न वेति संशयः । तानि ऊहितव्यान्येव । कुतः इन्द्रे एव नियमेन समवेतस्यार्थस्याभिधानात । अग्नौ तस्याभावात् । स चार्थस्तत्सम्बुध्यन्तपदमनूद्य व्याचक्षाणेन ब्राह्मणेन स्पष्टीकृतः । तथा च श्रूयते 'हरिव आगच्छेति, पूर्वपक्षापरपक्षौ वा इन्द्रस्य हरी, ताभ्यां ह्येष सर्वं हरतीति । मेधातिथेर्मेषेति, मेधातिथिं काण्वायनिं मेषो भूत्वा जहार । वृषणाश्वस्य मेन हति, वृषणाश्वस्य मेनका नाम दुहिता बभूव, तामिन्द्रश्चकमे। गौरावस्कन्दिन्निति, गौरमृगो भूत्वा राजानं पिबति (प०ब्रा० १।१) (त०आ० १।१२ ३-४ सा०भा०) इति । एतस्यार्थस्य इन्द्रे एवान्वितस्याग्नावसम्भवात्तत्परित्यागेनाग्नेरुचितानि कानिचिद्विशेषणान्यूहनीयानीति पूर्वः पक्षः ।

इन्द्रशब्दस्य कर्मसमवेतदेवताप्रकाशकत्वान्न स्तावकत्वमित्यस्ति तस्योहः । हरिवदादिशब्दा ब्राह्मणव्याख्यातगुणाभिधानद्वारेणेन्द्रं स्तुवन्ति । स्तुतिश्च विद्यमानगुणवद्विद्यमानेनापि गुणेन कर्तुं शक्यते । तस्मात्= अग्निस्तुतसम्भवान्नास्त्यूह इति जैमिनेः (९।१। सू० ४२-४४) सिद्धान्तः ।

तदेतन्न रोचयन्ते याज्ञिकाः, ऊहं कुर्वन्ति । गौतमीये मते—'अग्न आगच्छ रोहिताश्च बृहद्भानो धूमकेतो जातवेदो विचर्षण आङ्गिरस ब्राह्मणाङ्गिरसब्रुवाण" (द्रा० श्रौ०

आध्वर्यवपद्धतिः ।

ॐ सुब्रह्मण्यो ॐसुब्रह्मण्यो ॐसुब्रह्मण्या ३ मिन्द्रागच्छ हरिव आगच्छ मेधातिथेर्मेष वृषणाश्वस्य मेने । गौरावस्कन्दिन्नहल्यायै जार कौशिक ब्राह्मण गौतम ब्रुवाण । त्यहे सुत्यामागच्छ मघवन्देवा ब्राह्मण आगच्छताऽऽगच्छताऽऽगच्छत ।

औद्गात्रपद्धतिः ।

क्रीते सोमे सुब्रह्मण्यं प्रति अध्वर्युप्रैषानन्तरं पूर्वमवृतश्चेदिदानीं वृतः सन् सुब्रह्मण्यः सोमवहनमुत्तरेण गत्वा उत्तरामीषामारुह्य सपत्रां शमीशाखां पलाशशाखां वा दक्षिणहस्ते कृत्वा ईषयोर्मध्ये भूमावधितिष्ठेत ।

ततो वामेन हस्तेन रज्जुद्वयं गृहीत्वा शाखया दक्षिणमनड्वाहं प्रथमं प्रेरयेत् । पश्चादुत्तरम् ।

प्राङ्मुखे नीयमाने शकटे सुब्रह्मण्योमिति त्रिराह्वयेन्मध्यमस्वरेण । अस्य वचनस्यान्त्यमक्षरमुच्चम् । अन्यत्सर्वं नीचम् ।

प्रत्यङ्मुखे नीयमाने सुब्रह्मण्योमिति षट्कृत्व आह्वयेत् । नात्र निगदः ।

पत्नीशालायाः पूर्वे प्रदेशे अनडुहि विमुक्ते शकटस्य छदिषि शाखामवगुह्य पश्चिमामीषामाश्रित्य प्रत्यवरोहेत् ।

१।४।५) (ला० श्रौ० १।४।२) इत्यूहः । धानञ्जय्यार्यमते—"अग्न आगच्छ रोहितावं आगच्छ भरद्वाजस्याज सहसः सूनो वारावस्कन्दिन्नुषसोजार" इति । (ला० श्रौ० १।४।४) एवं उपहव्येषु (का० २२।८।७ द्रा० श्रौ० २४।१।१) शक्रागच्छ विश्वे ब्राह्मण आगच्छत" इत्याद्यूहः ।

ज्योतिष्टोमेऽग्रेऽस्त्युपसत्कालीनं सुब्रह्मण्याह्वानं (का० श्रौ० ८।२।१२) तदहर्गणेषु भिद्यते तन्त्रं वेति संशये—प्रधानभेदाद्भेद इति पूर्वपक्षे—अकर्मकालत्वात्तु तन्त्रम् । नहाद प्रधानकाले उपसत्काले तु सकृदनुष्ठितमेव सर्वेषामुपकरोतीति यूपन्यायेन (११।३।४) तन्त्रमिति सिद्धान्तः ।

तथाहि जैमिनिकात्यायनौ—'सुब्रह्मण्या तु तन्त्रं दीक्षावदन्यकालत्वात्' (११।३।२१) 'अहर्गणे सुब्रह्मण्यायाः सर्वोपलक्षणं प्रकृतिवत् । तन्त्रकालकर्मप्रत्यहमविधानात् (१।७।६-७) इति ।

सुत्याकालिक आह्वाने तन्त्रमावापो वेति सन्देहे प्रथमसुत्याकाले एव कृतं सर्वसुत्यानामुपकारकम्, सत्यप्येकस्य सन्निधिविशेषे यूपाहुतिन्यायेन (११।२।७) सवष्वहः सूपकरोतीति पूर्वः पक्षः । कर्मकालं ह्येतद्यस्य कर्मणः काले कृतं तदर्थमिति विशेषग्रहणात्तदपवर्गे तत्कृतस्य देवतासंस्कारस्यापवर्गादहरन्तरे पुनः कर्तव्यं तस्मान्न तन्त्रम् । किन्तु आह्वानं भिद्यत एवेति (जै० ११।३।११) सिद्धान्तः ।

एष सुब्रह्मण्यानिगदः सुब्रह्मण्यनामसामवेदीयर्त्विजा गीयतेऽतः सुब्रह्मण्यसामेत्युच्यते । वस्तुतो निगदो नाम यजुर्विशेष एवेति सिद्धान्ततो मीमांसायाम् । जै० द० २।१।३८-४५ सूत्राणि द्रष्टव्यानि ।

आध्वर्यवपद्धतिः ।

शालां पूर्वेण प्रतिप्रस्थाताऽग्नीषोमीयं(१) पशुमादाय तिष्ठति कृष्णसारङ्गं मेध्यमभावे लोहितसारङ्गम् ।

अध्वर्युर्नमो मित्रस्येत्येनमालभ्य वाचयति यजमानम् । अग्नीषोमीयं पशुमालभस्व ।

"ॐ नमो मित्रस्य व्वरुणस्य चक्षसे महो देवाय तद्रतर्ठ० सपर्य्यत। दूरे दृशे देवजाताय केतवे दिवस्पुत्राय सूर्य्याय शर्ठ०सत" (४ ३५) इति ब्रूहि।

यजमानः पशुमालभ्य–

"ॐ नमो मित्रस्य व्वरुणस्य चक्षसे महो देवाय तद्रतर्ठ० सपर्य्यत दूरे दृशे देवजाताय केतवे दिवस्पुत्राय सूर्य्याय शर्ठ०सत" (४ । ३५) ।

चरति पशौ वाचनमेव । आहवनीयाच्चोल्मुकमाहृत्यैके(२) वाचयन्ति तदपि सति पशौ न तु चरति ।

शालायाः समीपेऽन उपस्थाप्योत्तम्भनेनोपस्तभ्नाति व्वरुणस्योत्तम्भनमिति ।

"ॐ व्वरुणस्योत्तम्भनमसि" (४ । ३६) ।

युगपच्छम्ये चोदूवृहति व्वरुणस्य स्कम्भसर्जनी स्थ इति । सकृन्मन्त्रः।

सकृन्मन्त्रं समुच्चार्य शम्ययोः क्रमतः सुधीः ।

औद्गात्रपद्धति ।

अथ यजमानो दक्षिणमनड्वाहं सुब्रह्मण्याय दद्यात् । सुब्रह्मण्यो मन्त्रेण प्रतिगृह्य यथार्थं गच्छेत् ।

---

(१) 'अथ प्रतिप्रस्थाताग्नेण शालामग्नीषोमीयेण पशुना प्रत्युपतिष्टत' (श० ब्रा० ३।३।४।२१) इति प्रकृत्य सर्वस्य श्रुतत्वात्। अग्नीषोमीयेणेत्यत्र 'इत्थं भूतलक्षणे' (पा० २।३।२१) इति तृतीया । तेन युक्तः प्रत्युपतिष्ठते । न कश्चिदग्नीषोमीयः पशुरस्ति न च यागमन्तरेणाग्नीषोमीयः शक्यते कर्तुमपि इत्यत एव वचनादग्नीषोमौ पशुना यष्टव्यावितिगम्यते । स चायं यागोऽत्रैव क्रमे प्राप्तो वचनादौपवसथ्येऽहन्युत्कृष्टः ।

शाखान्तरादग्नीषोमीयस्य कर्णग्रहणम् । तथा हि मानवे—'अग्नेण प्राग्वंशं कर्णगृहीतमजमग्नीषोमीयं कलालं पीवानमवस्थापयती"(२।१।४।३३)ति ।

(२) "तद्धैके आहवनीयादुल्मुकमाहरन्त्ययमग्निरयर्ठ० सोमस्ताभ्यां सह सद्भ्यां निष्क्रेष्यामह' (श० ब्रा० ३।३।४।२२) इत्यादि श्रुततत्वात्। अपरे त्वनाहृत्यैवोल्मुकं वाचयति । "तदु तथा न कुर्याद्यत्र वा एतौ क्व च तत्सहैवे" (श० ३।३।४। २२) ति श्रुतेः । अस्यायः–केचिदुल्मुकं पशुस्थाने एवाहरन्ति किमर्थं अयमग्निरुल्मुकात्मकः, अयं सोमोऽसि स्थितः ताभ्यामिति पञ्चमीद्विवचनं ताभ्यामग्नीषोमाभ्यां सह भूताभ्यां पशुनात्मानं निष्क्रेष्यामहे इति ब्रुवन्तः, यत्र वा एताविति सोमलतायामप्यग्निरन्तर्भूतोऽस्तीत्यभिप्रायः ।

आध्वर्यवपद्धतिः।

उद्बृहणं प्रकुर्वन्ति नात्र भेदोऽस्ति कारणम् ॥

"ॐ वरुणस्य स्कम्भसर्जनी स्थः" (४ । ३६)।

औदुम्बरीमासन्दीं नाभिदघ्नामरत्निमात्रार्ङ्गीं मुञ्जरज्वोद्ग्रथितामाहरन्ति चत्वारोऽध्वर्युस्थातृनेष्ट्रयुन्नेतारः (१)।

अध्वर्युरभिमृशत्येनां वरुणस्य ऋतसदन्यसीति ।

"वरुणस्य ऋतसदन्यसि" (४ । ३६)

कृष्णाजिनमस्यामास्तृणाति वरुणस्य ऋतसदनमसीति ।

"ॐ वरुणस्य ऋतसदनमसि" (४ । ३६)।

तस्मिन्त्सोमं निदधाति वरुणस्य ऋतसदनमासीदेति ।

"ॐ वरुणस्य ऋतसदन(२)मासीद" (४ । ३६)।

शालां प्रवेशयन्ति दीक्षितसञ्चरेण सोमम् ।

या त इति वाचयति यजमानम् ।

---

(१) अत्र ऋत्विग्विषये प्रासङ्गिकं किञ्चिदुच्यते। "आरम्भो वरणं यज्ञे इत्यादिवचनाद्वरणेन सर्वेषामारब्धकर्मत्वात् तदनन्तरं सूतकादिपाते नैवाशौचम्। अत एव ब्रह्मपुराणे—

गृहीतमधुपर्कस्य यजमानाच्च ऋत्विजः ।
पश्चादाशौचपतितं न भवेदिति निश्चयः ॥ इति ।

अशौचाभावेऽपि सूतकादिनिमित्तस्नानं भवत्येव । तदुक्तं कारिकायाम्—

वृतानामृत्विजामत्र सत्रिणां ब्रह्मचारिणाम् ।
दीक्षिणीयादीक्षितानां यज्ञियं कर्म कुर्वताम् ॥
यावदेषामुपाधिः स्यात्तावन्नाशौचमत्र हि ।
स्नानं स्यादत्विगादीनामाशौचे स्यात्स्वकर्मसु ॥ इति ।

इदमनशुचित्वं प्रारब्धकर्मविषयमेव, अन्यत्राशुचित्वं भवत्येव, तदाह विष्णुः—

"व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे ।
प्रारब्धे सूतकं नास्ति(न स्याद)अनारब्धे तु सूतकम् ॥ इति ।

एवं पत्न्यां रजस्वलायां सूतकायां वा प्रारब्धं कर्म भवत्येव । यथाह त्रिकाण्डमण्डनः-

रजोदोषे समुत्पन्ने सूतके मृतकेऽपि वा ।
नित्यं नैमित्तिकं कुर्यात काम्यं कर्म न किञ्चन ॥
आधानं पुनराधानं पशुः सौत्रामणी तथा ।
चातुर्मास्यानि सोमश्च तथैवाग्रयणक्रिया ॥
अकाम्यत्वेऽपि नैतासां सूतकादावनुष्ठितिः ।
प्रक्रान्तेष्वपि चैतेषु सूतकादिसमुद्भवे ॥
कर्तव्यान्येव चैतानि वारितान्यप्यशेषत (१।१४०-१४३) इति ।

(२) न्यग्रोधश्चे'दासीदतमि'ति मन्त्र उहः । अभिषेचनीयेऽपीतः प्रभृति द्विवचनान्ता एवोहाः, आसन्त्यभिमर्षनादेः पृथग् विधानात्।

आध्वर्यवपद्धतिः ।

"ॐ या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् । गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्य्यान्" (४ । ३७) इति ब्रूहि । यजमानः—

"ॐ (१)या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम् । गयस्फानः प्रतरणः सुवीरोऽवीरहा प्रचरा सोम दुर्य्यान्" (४।३७) । आहवनीयं दक्षिणेन स्थापयन्ति (२) उदपात्रमुपनिनयन्त्येके । अत्राध्वर्युर्यजमानो वा सोमठं० राजानं मधुपर्केणार्हयेत् । ध्रुर्यद्वययुक्तमनः

---

(१) न्यग्रोधश्चेदग्रोहः "या वान् धामानि हविषा यजन्ति ता वां विश्वा परिभूरस्तु यज्ञम् । गयस्फानौ प्रतरणौ सुवीराववीरहणौ प्रचरतं सोमन्यग्रोधौ दुर्याने"ति ।

(२) अत्र प्रसङ्गाद् वैश्यराजन्ययोः सोमयागे न्यग्रोधस्य सोमवत्क्रयणादिसंस्कारपक्षे ऊहादि प्रयोगसौकर्यार्थं निरूप्यते—सोमनिधानानन्तरं उपरवदेशे न्यग्रोधस्य निधानम् । सोमक्रयण्यनुमन्त्रणे—स्वस्ति सोमन्यग्रोधस्या पुनरेहि(य० सं० ४।२०)ति । प्रैषे—सोमन्यग्रोधोपनहने आहर । सोमन्यग्रोधपर्याणहने आहर । उष्णीषावाहरेति । एष त (य० सं० ४।२४) इति वाचने—'एष वां गायत्रो भाग इति मे सोमन्यग्रोधाभ्यां ब्रूतादेष वां त्रैष्टुभो भाग इति मे सोमन्यग्रोधाभ्यां ब्रूतादेष वां जागतो भाग इति मे सोमन्यग्रोधाभ्यां ब्रूताच्छन्दोनामाना ँ साम्राज्यं गच्छेति मे सोमन्यग्रोधाभ्यां ब्रूतादि'ति । उभयारालम्भनं 'आस्माकौ स्थः शुक्रस्ते गृह्य' (य० सं० ४।२४) इति । सोमोपनहनमास्तीर्य न्यग्रोधोपनहनस्यास्तरणं, सोममानानन्तरं तद्वदेव मन्त्रेण मानं, उष्णीषेण बन्धनं, अङ्गुल्या मध्ये विवरणञ्च, उभयोः सोमावक्रयिणे समर्पणं, सोमविक्रयिन् क्रय्यौ ते सोमन्यग्रोधा राजानौ इति प्रश्नः । क्रय्याविति प्रतिवचनं, तौ वै ते क्रीणानीति। भूयो वा अतः सोमन्यग्रोधौ राजानावर्हतः भूय एवातः सोमन्यग्रोधौ राजानावर्हतो महांस्त्वेवेत्यध्वर्युः क्रीतौ सोमन्यग्रोधौ राजानौ वयांसि प्रब्रूहीति । शुक्रौ वां शुक्रेण क्रीणामि चन्द्रौ चन्द्रेणामृतावमृतेने(४।२६)ति । अजामालम्भ्य वाचने—परमेण पशुना क्रीयेथे (४।२६) इति । सोमादानमन्त्रे—मित्रौ न एतठं० सुमित्रधा (४।२७) विति । उपमार्थत्वादत्र मित्रशब्दस्याविपरिणाम इति कर्कः । यजमानस्योरौ सोमनिधानमन्त्रे—इन्द्रस्योरुमाविशतं दक्षिणमुशन्तावुशन्त ँ स्योनौ स्योन (४।२७) मित्युभयोरुरावाधानम् । 'उदायुषे'ति (४।२८) मन्त्रेण सोमन्यग्रोधयोरादानं शिरसि करणं च । कृष्णाजिनोपरि सोमनिधाने—न्यग्रोधस्यापि सहैव स्थापनं अदित्यै सद आसीदत(४।३०)मित्यूहश्च। सोमालम्भप्रैषे-सोमन्यग्रोधावालभस्वेति प्रैषः, अस्तभ्नीतां द्यामित्यादि (पूर्वं ६५ पत्रेटि०) ऊहश्च । सोमक्रयानुवाचनप्रैषे-सोमन्यग्रोधाभ्यामनुब्रूहि पर्युह्यमाणाभ्यामिति वा । अभिषेचनीये-सोमन्यग्रोधेभ्यः पर्युह्यमाणेभ्य इति वा प्रैषः । भद्रो म (४।३४) इति वाचने भद्रौ मे स्थ (पूर्वं ६० पत्रेटि०) इत्यादि । सोमनिधानमन्त्रे ऋतसदनमासीदतमित्यूहः । या त (४।३७) इति वाचने-या वां धामानी (पूर्व० ६६ टि०) त्यादि ।

आध्वर्यवपद्धतिः ।

सुब्रह्मण्याय तुभ्यमहं स्रुग्प्रदे । इति तस्मै यजमानो दद्यात् । एकं वा (१)धुर्यम् ।

इति सोमक्रयः । सूत्रे सप्तमोऽध्यायः ।

(अथातिथ्येष्टिः ।)

अथातिथ्या । आतिथ्यं निर्वपति वैष्णवं नवकपालं सत्वरमिडान्तम् । (२)षडासनं, वाचस्पतिप्रैषः । प्रणीताप्रणयनम् । आहवनीयदक्षिणाग्न्योः परिस्तरणम् । पात्रासादनम् । शूर्पाग्निहोत्रहवणीस्फ्यो (३)नव कपालानि, शम्या, कृष्णाजिनम्, ऊलूखलं, मुसलं, दृषदुपलम्, पात्री, पवित्रच्छेदनानि, पवित्रे, उपवेषः, आज्यस्थाल्युपसर्जनीपात्रम्, कुशमुष्टिर्वेदितृणम्, अभ्रिर्योक्त्रं पत्ने । स्रुवो, जुहूः, उपभृत्, ध्रुवा, सन्नहनावच्छादनानि, काश्मर्यमयाः परिधयः, ऐक्षव्यौ विधृत्यावाज्यं, पुरोडाशपात्री, होतृपदनम्, स्रुतावदानमौपधं, प्राशित्रहरणे(४) ।

---


(१) दक्षिणमनड्वाहं सुब्रह्मण्याय दद्यात् । उभाविति शाट्यायनकं विज्ञायते कर्मसंयोगात् (ला० श्रौ० १।२।२३-२४) इति । तथा च—

"यस्मिन् कर्मणि यद्द्रव्यं यस्य सन्निहितं भवेत् ।
तत्तस्यैव प्रदातव्यं होतुर्गोत्रपटो यथा" । इति ।

(२) चतुरासनमिति देवः ।

(३) नवकपालेषु चतुर्थकपालोपधानानन्तरमवशिष्टानि पञ्च विभज्य त्रीणि दक्षिणतः द्वे उत्तरतः ।

समन्त्रकं सक्रमं नवकपालोपधानचित्रम् ।



(४) इडान्तर्धानकटपूर्णपात्रकर्मापवर्गाणामभावः । अन्वाहार्यस्य चाभावः । अग्न्यन्वाधान-व्रतग्रहण-व्रतविमोचनानामभावः सूत्रोक्तः । तथा च सूत्रम्—

आध्वर्यवपद्धतिः।

'अग्न्यन्वाधान—व्रतोपायना—रण्यभोजन—दान—ब्रह्मवरणादीनि दीक्षणीयाप्रभृति प्रागुदवसानीयायाः सोमे कृतत्वाद्' (का० श्रौ० ८।१।४)ति।

सोमे दीक्षणीयाप्रभृति=दीक्षणीयात आरभ्य उदवसानीयायाः प्राक् सोमान्तस्तन्त्रभूतास्विष्टिषु पशुषु चाग्न्यन्वाधानादीनि ब्रह्मवरणान्तानि कर्माणि न भवन्ति। कुतः कृतत्वात्=सौमिकैरेवैतेषामर्थस्य साधितत्वात्। तद्यथा येषां तावदग्निधारणार्थमग्न्यन्वाधानं तेषां सोमार्थनैव विहितानामग्नीनां घृतत्वाद्दीक्षणीयादिषु तेनैव धारणेन प्रसङ्गसिद्धकार्यत्वान्न पुनर्धारणं कर्तव्यम्। (जै० १२।१।१०)।

ननु चा क्रतुसमाप्तेः पुनः पुनर्धारयितव्य एवाग्निः, सत्यं तथापि येनाग्न्यन्वाधानं कार्यं तद्विहितस्याग्नेराद्यो यः समिन्धनव्यापारो धारणार्थस्तद्रूपं न हि तत्प्रकृतौ पुनः पुनः कृतं तस्मादत्रापि धार्यमाणस्य धारणाय पुनर्न कर्तव्यम्।

येषां (कर्कादीनां भा० २।१।७) मते देवतापरिग्रहार्थं तेषां दीक्षणीयया देवतानां परिगृहीतत्वात्प्रायणीयादिषु तन्निवर्तते। दीक्षणीयायां तु दीक्षणीयादेवतापरिग्रहार्थं भवति। अस्मिन्पक्षे तदानीं दीक्षणीयाया अनिष्पन्नत्वेन तत्कार्यस्य देवतापरिग्रहरूपस्य कृतत्वाभावात् दीक्षणीयाप्रभृतीति तु भूयस्त्वादुक्तिः। कथं पुनर्दीक्षणीयायाः देवतापरिग्रहार्थत्वम्। "अपः प्रणीयाग्नावैष्णवमेकादशकपालं पुरोडाशं निर्वपती"ति प्रकृत्या "अग्निर्वै यज्ञस्यावरार्ध्यो विष्णुः पराध्यैस्तत्सर्वाभ्येवैतद्देवताः परिगृह्य सर्वं च यज्ञं परिगृह्य दीक्षा इति तस्मादाग्नावैष्णव एकादशकपाल" (श० ब्रा० ३।१।३।१) इत्यादिनाग्नावैष्णवस्य देवतापरिग्रहार्थता गम्यते। यद्यपि "दीक्षा सोमस्ये" (तै० आ० ३।९ गो० ब्रा० उ० २।९) ति वचनात्प्रधानार्था दीक्षणीया प्रधानदेवता एव परिगृह्णाति तथापि वैश्वदेवग्रहे (श० ब्रा० ४।४।१।८--९) सर्वदेवता समवायात्तत्परिग्रहं कुर्वती दीक्षणीया प्रसङ्गादङ्गकर्मदेवता अपि गृह्णाती (जै० १२।१।१२) ति।

एवं व्रतोपायनमपि कर्माङ्गभूतसत्यवदनादिनियमस्याङ्गीकरणं तद्दीक्षणीयायां गृहीतस्याविसृष्टत्वात् सोमार्थनैव सत्यवदनब्रह्मचर्यादिनियमस्याङ्गीकृतत्वाच्च निवर्तते (जै० १२।१।११)।

तदपि दीक्षणीयायां भवत्येव। उद्गादनप्रैषा (अ० प० २७।६ पूर्वं) दूर्ध्वं दीक्षितत्वे सज्ञाते सत्यवदनादिनियमस्याप्रवृत्तेः। तस्मादपि दीक्षितमाहुः "सत्यमेव वदेदि" (श० ब्रा० १४।१।१।३३)ति दण्डान्ते दीक्षितो भवति। अत एव व्रतग्रहणप्रतिषेधाद्दीक्षणीयायां गृहीतस्य विसर्गोऽपि ततः प्राङ् न कर्तव्यः।

आरण्यभोजनमपि प्रायणीयादिषु चोदकप्राप्तमपि व्रतार्थत्वात्प्रधानार्थस्य प्रत्यक्षश्रुतस्य पयोव्रतस्यावजनीयत्वात्सौमिकेनैव पयोव्रतादिना वृत्तिसिद्धेर्निवर्तते। तथा चोक्तं जैमिनिना—

"अन्यविधानादारण्यभोजनं न स्यादुभयं हि वृत्यर्थमि"ति (१२।१।३०)।

अतः "स वा आरण्यमेवाश्नीयात्" (श० ब्रा० १।१।१।१०) 'वृक्षारण्यौषधीनामश्नीयाद्दे' (का० श्रौ० २।१।१४)ति यत्प्रत्यहं सायमरण्याशनं प्राप्नोति तदनेन निषिध्यते।

अन्वाहार्यदक्षिणादाममपि प्रकृतावानत्यर्थं सा चानतिः सौमिकेनैव वरणेन सिद्धेति दीक्षणीयादिषु तदपि निवर्तते। तथा हि जैमिनिः-"भूतत्वाच्च परिक्रयः। (१२।१।३२)इति'

आध्वर्यवपद्धतिः ।

उपकल्पनीयानि—इध्मा, आध्वर्वालप्रस्तरोपसन्नद्धं, बर्हिः, षडवत्तं, द्वे मदन्तीपात्रे, शकलं कुशतरुणे अधरारणिरुत्तरारणिश्चेति मन्थनचतुष्टयं, व्रतपात्रं, समिद्द्वयम्, उदकं, हिरण्यं, सुब्रह्मण्यार्थं पत्रं चेति।

अध्वर्युर्गार्हपत्यस्य पश्चादित्यादि ।

ब्रह्मवरणं चाप्रवृत्तप्रवर्तनार्थं तच्च सौमिकेनैव वरणेन (अ० प० ८ पत्रे) सिद्धमिति दीक्षणीयादिषु तदपि निवर्तते । उदवसनीयायां तु सर्वमन्यन्वाधानादिकं भवति । अन्यन्तरत्वादन्यन्वाधानं उन्मुक्तदीक्षितत्वाद्विसृष्टत्वाच्च व्रतोपायनं दानं च विहितत्वा "चत्वस्रो वै दक्षिणा हिरण्यं गौर्वासोऽश्वे" (श० ब्रा० ४।३।४।७) ति आनत्यन्तरविधानाच्च ब्रह्मवरणं, अतः प्रागुदवसानीयाया इत्युक्तम् ।

अत्र प्रसङ्गादिदं विचार्यते—सोमयागमध्यपातिनीष्विष्टिषु ऋत्विक्कर्तृका इडाप्राशित्रादिभक्षाः निवर्त्यन्ते उत नेति । प्रकृतौ "अन्वाहार्यो दक्षिणा'(श०ब्रा० १।२।३।५) इत्युक्तत्वात् ऋत्विग्भक्षाणां परिक्रियार्थतया ते भवन्ति । अत्र तु "चतस्रो वै दक्षिणा हिरण्यं गौर्वासोऽश्व" (श० ब्रा० ४।३।४।७) इत्यादिनाङ्गप्रधानानां पृथग्दक्षिणाम्नानान्निवर्त्यैरन्निति पूर्वः पक्षः ।

ज्योतिष्टोमे शेषप्रतिपत्त्यर्था भक्षाः न त्वानत्यर्था इति दशम (जै० १०।२।९) एव चानत्यर्थत्वं भक्षाणां निराकृतम् । तस्मानैते परिक्रियार्था किन्तु संस्कारार्थाः । अतस्तदर्थं कर्तव्या एवेति पूर्वमीमांसा (१२।१।१७) सिद्धान्तः ।

दर्शपूर्णमासयोर्होतुवरणमाम्नात "मन्निर्दवो दैव्यो होता देवान्यक्षद् विद्वांश्चिकित्वान् मनुष्वद् भरतव (का० श्रौ० ३।२।७) दि"ति । तत्किमानत्यर्थत्वात्सौमिकेनैव वरणेन प्रसङ्गादानतिसिद्धेर्दीक्षणीयादिषु न कर्तव्यमुताद्दृष्टार्थत्वात्कर्तव्यमिति सन्देहे वरणस्यानत्यर्थत्वान्न कर्तव्यमिति पूर्वः पक्षः । न हि वरणमानत्यर्थं किन्तु धर्मार्थम् । दर्शपूर्णमासेष्टावपि धर्मार्थमेव वरणम् । वरणात्प्रागपि सामिधेनीषु होतुः प्रवृत्तत्वात् । न हि प्रवृत्तस्य पुनरानतिः कर्तव्या । तस्मात्—प्रकृताविवात्रापि धर्मार्थमेव वरणं कार्यम् । न त्वानत्यर्थेन सौमिकवरणेनास्य प्रसङ्गसिद्धिरिति पूर्वमीमांसा (१२।१८।१) सिद्धान्तः ।

अग्नीतिथ्यादौ यजमानकर्तृकाः इडाभक्षणादयः कर्तव्या न वेति संशये "व्रतं ह्येवास्यातोऽशनं भवती" (श० ब्रा० ३।१।२।१)ति श्रुत्या द्रव्यान्तरभक्षणस्य अर्थतः प्रसिद्धत्वात् "पयोव्रतं ब्राह्मणस्य" (तै० आ० २।८) इत्यादिना पय आदेर्वृत्त्यर्थं विधानाच्च, इडाभक्षणादयो निवर्तन्त इति पूर्वः पक्षः ।

सत्यं यदि वृत्त्यर्थास्ते तु शेषभक्षप्रतिपत्त्यर्थाः । "यजमानपञ्चमा इडां भक्षयन्ती"ति शेषस्य द्वितीयानिर्देशात् । इडाप्राशित्रभक्षाणां प्रतिपत्त्यर्थत्वं षष्ठे "होमाभिषवभक्षणं च तद्वत्" (४।२४) इत्यत्र निरूपितम् । तस्मान्न निवर्तन्त इति सिद्धान्तः ।

तथा हि जैमिनिकात्यायनौ—

'शेषभक्षास्तर्थेति चेन्नान्यार्थत्वाद् (१२।१।३१) यजमानभागश्च भक्षप्रतिषेधात् न कुर्मगुणत्वादि' (८।१।६-७)ति ।

ते च शेषभक्षा अङ्गुलिविसर्गानन्तरं न ततः प्राक् । तदुक्तं कात्यायनाचार्यैः-"वृत्त्यनिवृत्तिः । हविःशेषभक्ष" (८।१।८-९) इति ।

आध्वर्यवपद्धतिः ।

पत्न्यन्वारब्धस्तूर्णमेकविमुक्ते वा निर्वपेदग्नेस्तनूरिति पञ्चकृत्वः प्रतिमन्त्रम् । विलालम्भें "देवस्या(१।८)सी"त्युहः । ग्रहणे--

"ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्याम-ग्नेस्तनूरसि विष्णवे त्वा जुष्टं गृह्णामि ।

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्या ँ सोमस्य तनूरसि विष्णवे त्वा जुष्टं गृह्णामि ।

ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्याम्पूष्णो हस्ताभ्यामति-थेरातिथ्यमसि विष्णवे त्वा जुष्टं गृह्णामि ।

ॐ श्येनाय त्वा सोमभृते विष्णवे त्वा गृह्णामि ।

ॐ अग्नये त्वा रायस्पोषदे विष्णवे त्वा गृह्णामि" । (५।१)

चरमयोर्न सावित्रजुष्टशब्दौ प्रधानदेवतापदमुपा ँशु सर्वत्र। 'भूताय त्वे' (१।११) त्यादि ।

प्रोक्षणे-'विष्णवे त्वा जुष्टं प्रोक्षामि' (१।१३) ।

मुसलावधाने-'स इदं देवाये'ति (१।१५) ।

दृषद्यावापे-'धिनुहि देवमि'ति(१) (१।२०) ।

आज्याधिश्रयणमग्नीधः ।

अग्नीत् (२)उपसर्जनीरधिश्रयति मदन्तीश्च व्रतवदुभयत्राध्वर्युः । यजमानपत्न्योरामुष्टिविसर्गादुदकार्थस्ततः । पक्षे पत्नीसन्नहनम् (अयोक्रायाः) । चतुर्गृहीतान्याज्यानि । काशमर्यमयाः परिधयः, (३)आश्ववालः प्रस्तरः, ऐक्षव्यौ विधृत्यौ बर्हिश्च (४)एतदेवाग्नीधो-

(१) अत्र साग्निचित्ये सोमयागे "सोमनिवपनाद्याऽऽतिथ्याहविष्कृतः कृत्वाऽऽह-वनीयपरिश्रितोऽभिमन्त्रयते 'चितः स्थे' (शु० स० १२।४६) ती" (का० श्रौ १।३।१९) त्यारभ्य (का० १।३।१६) क्रियाः कार्या ।

(२) अत्र कठसूत्रे विशेषः—गार्हपत्ये तप्तानां दीक्षितस्योदकार्थो दक्षिणाग्नौ पत्न्या इति । प्राप्तमप्युपसर्जन्यधिश्रयणं मदन्त्यधिश्रयणं मदन्त्यधिश्रयणस्यावसरविधानार्थं पुनरिहोच्यते ।

(३) यद्यप्यत्राश्वस्य वाला इत्यश्ववाला प्रतीयन्ते ऐक्षव्यौ विधृती इत्यत्र इक्षवय-वभूते प्रतीयेते तथाप्यत्र शाखान्तरीयाद्वाक्यशेषात् काशमयः प्रस्तरः काशमूलमयौ च विधृत्यौ गृह्येते इति मीमांसायां प्रथमाध्यायतृतीयपादे साधितम् ।

अत्राहुर्माधवाचार्याः—बर्हिः प्रस्तरयोरन्तराले तिर्यक् प्रसार्यमाणौ दर्भौ विधृती ते इक्षपत्ररूपे स्यातामिति । धूर्तस्वामिनोऽपि ऐक्षव्यौ इक्षुपर्णे इत्याहुः स्वभाष्ये ।

(४) "यदातिथ्यायां बर्हिस्तदुपसदाम्, तदग्नीषोमीयस्य च" अत्रेदं सन्दि-ह्यते किमिदमाच्छिद्य विधानं, उत निर्दिष्टकोपदेशः, अथवा धर्मातिदेश, उत बर्हिः साधारण्यविधिरिति । न तावदाद्यः पक्षः । आतिथ्येष्टौ विहितं यद्बर्हिस्तद्यदि-

आध्वर्यवपद्धतिः ।

मीयोपसत्स्वपि चतुष्टयम् । इध्मप्रोक्षणा(२।१)दि । नोल्मुकोदूहनम् । परिधिपरिधानम् (२।३) । स्पृश्यास्पृश्ययोराधानम् (२।४) ।

तस्या इष्टेराच्छिद्योपसत्स्वग्नीषोमीये च विधीयेत तदानीमातिथ्यायां विधानमनर्थकं स्यात् । न द्वितीयः, यदि वातिथ्यायामुपयुक्तमुपसदादिषु विधीयेत तदा विनियुक्तविनियोगरूपो विरोधः स्यात् । तस्मादातिथ्यबर्हिषो ये धर्मा आश्वत्थादयस्ते धर्मा उपसदादिषु भवन्तीत्यतिदेशपरमेतद्वाक्यमिति तृतीयः पक्षः सोऽपि नोपपद्यते बर्हिशब्दस्य धर्मातिदेशपरत्वे लक्षणा प्रसज्येत । श्रुत्या तु बर्हिष आतिथ्योपसदग्नीषोमीयेष्वेकत्वं प्रतिभाति । अतः साधारण्यमत्र विधेयम् । आतिथ्यार्थं यद्बर्हिरुपादीयते तन्नकेवलमातिथ्यार्थं किन्तूपसदर्थमग्नीषोमीयार्थं चोपादेयमिति वाक्यस्यार्थः । एतद्वाक्योत्तरकालं चाश्वत्थादयो धर्माः पश्यमानाः साधारण्यं प्रतिपद्यन्ते सत्यप्यातिथ्याप्रकरणे बर्हिषः साधारणत्वात् । तस्मादातिथ्योपसदग्नीषोमीयास्त्रयोऽप्यस्य बर्हिषस्तद्धर्माणां च प्रयोजका इति पूर्वतन्त्र (४।२।१३) सिद्धान्तः ।

नन्वपूर्वत्वादुपसदां बर्हिषो भावस्तस्मिन्सति कथं धर्मोपदेशो निरिष्टकोपदेश आच्छिद्यविधिर्बर्हिः साधारण्यं वा सर्वेषां तस्स्वरूपप्राप्त्यपेक्षत्वात्, तेन वाक्यमेवैतत् "यदातिथ्यायां बर्हि" रित्यनुपपन्नमिति । उच्यते—

पूर्वाधारोऽत्र विद्यते "तस्मादन्यतरमेवाधारमाधारयति यद्यश्रुवेणे (श० ब्रा० १।४।४।९)"ति । बर्हिश्चाङ्गप्रधानार्थं तस्मादुपसदङ्गतया प्राप्त्यभावेऽपि तदङ्गभूतपूर्वाधाराङ्गतया प्राप्नोत्येव बर्हिरिति ।

एवं साधारण्ये सिद्धे तत्संस्काराः प्रोक्षणादयः किं प्रतिकर्मावर्तनीया उतातिथ्याकालकृता एवोपसत्स्वग्नीषोमीये च प्रसज्यन्त इति सन्देहे मध्यपातामावान्न प्रसङ्गो नापि तन्त्रमातिथ्याकालत्वेन विशेषग्रहणादिति प्राप्ते—उच्यते । सत्यं न तन्त्रतः प्रसङ्गस्तु भवति यद्यपि ह्यातिथ्याप्रयोगमध्ये तत्प्रयुक्ताः संस्काराः क्रियन्ते तथापि तेषां बर्हिर्द्वारत्वात्तस्य च सर्वार्थत्वादन्यप्रयुक्तैरपि संस्कारः संस्कृतस्य यावत्स्वप्रयोजननमनपवर्गान्न भूयः संस्कारैः कार्यम् ।

अथवा तन्त्रमध्यपातामावेऽपि बर्हिर्द्वारा ये संस्कारास्ते यदर्थं बर्हिरुपात्तं तदर्था विज्ञायमाना बर्हिषः साधारणत्वात्तेऽपि सकृदेव कर्तव्या इत्यवगते सति नान्तरीयकमातिथ्याकालेऽनुष्ठानम् । उपसदादेस्तदानीमप्राप्तत्वात् । न चैतावता आतिथ्यापवर्गेऽपवृज्यन्ते बर्हिषोऽनपवृक्तत्वात्तदर्थत्वाच्च तेषां तस्मान्न भेदेन कर्तव्या इति न्यायतः (पू० मी० १२।१।१९) प्राप्नोति तथाप्यग्नीषोमीये पुनर्वचनसामर्थ्याद्बर्हिषः समर्पणं पुरस्तादूग्रन्थ्यासादनं 'बर्हिरसी' (य०सं० २।१)त्येतत्प्रोक्षणं मूलावसेकश्च भवत्येव । तथा च वचनम्—"प्रोक्षणीरध्वर्युरादत्त" (श० ब्रा० ३।६।३।१४) इत्यादि । अत एव वचनाभावादुपसत्सु च पुनः संस्कारा न भवन्तीत्येवेति युक्तम् ।

तदेव बर्हिर्यदातिथ्यार्थं प्राग्वंशे स्तीर्णं तत आनीयापरेणोत्तरवेदिमग्नीषोमीयार्थं नास्तीर्यते तदा किं "ऊर्णम्रदसन्त्वा स्तृणामी" (य० सं० २।२) ति स्तरणमन्त्रः पूर्वकृत एव प्रसज्यत उतावर्तनीय इति विचारे । पूर्ववद्बर्हिः साधारण्यात्प्रसङ्गप्राप्तिरिति पूर्वः पक्षः ।

"बर्हिषा वेदिं स्तृणाती"ति द्वितीयानिर्दिष्टत्वात्प्रयोजनवत्त्वाच्च वेदिदेशसंस्का-

आध्वर्यवपद्धतिः ।

प्राणदाने—विष्णुं गच्छ (का० श्रौ० २।८।१४-१५) । हविरासाद्या-मालम्भान्ते(१) (२।६) ।

(अथाग्निमन्थनम् ।)

अग्निमन्थनमाहोमात्करोति(१) अग्नेर्जनित्रमिति शकलमादाय ।

"ॐ अग्नेर्जनित्रमसि" (५।२) ।

तूष्णीं वेद्यां करोत्युदग्रम् । वृषणाविति कुशतरुणे प्रागग्रे तस्मिन् ।

"ॐ वृषणौ स्थः" (५।२) ।

उर्वश्यसीत्यधरारणिं (२)तयोः ।

रार्थं स्तरणं, न तु बर्हिरर्थं स्तरणम् । भिन्नौ चेह प्राग्वंशोत्तरवेदिसमीपदेशौ तेन तदर्थं स्तरणं तदङ्गं च मन्त्रोप्यावर्तते । असत्यामावृत्तौ वेदिवैगुण्यादग्नीषोमीयहविषामासादनं विगुणं स्यात् । तस्मान्मन्त्रावृत्तिरिति (पू० मी० १२।१।२०) सिद्धान्तः ।

आतिथ्यादेशे संस्कृतं बर्हिः संनह्याग्नीषोमीयदेशे यदा नीयते तदा संनहने हरणे च शाखान्तरे "इन्द्राण्यै सन्नहनं" "बृहस्पते मूर्ध्नां हरामि" (तै० सं० १।१।२) इति यौ मन्त्रौ तौ आवर्तनीयौ न वेति सन्देहे-स्तरणमन्त्रावृत्त्यधिकरण (पू० मी० १२।१।२०) न्यायेनावर्तनीयाविति प्राप्ते-प्रकृतौ लवनदेशादानयने कार्यं तौ मन्त्रौ दृष्टौ, न तु गार्हपत्यादाहवनीयं प्रत्यानयने । अतोऽत्रापि प्राग्वंशादुत्तरवेदिं प्रत्यानयने तौ मन्त्रौ न चोदकात्प्राप्नुतस्तस्मान्नावर्तनीयाविति (जै० १२।१।२१) सिद्धान्तः ।

(१) एतदग्निमन्थनं "आसाद्य हवी ँ ष्यग्निं मन्थति" (श० ब्रा० ३।४।१।१९) इति श्रुतावत्र विहितं, तच्च कात्यायनाचार्येण चातुर्मास्येषु वैश्वदेवपर्व (का० श्रौ० ५।१।२१-२५।१-६) प्युपनिबद्धय पुनरिहातिदिष्टम्। अतस्तद्वदेव शकलादानादि होमान्तमिहानुष्ठेयम् । "सोऽग्निमन्थनठं० शकलमादत" (श०ब्रा० ३।४।१।२० ।) इत्यादि होमान्तानां (श० ब्रा० ३।४।१।२५) सर्वेषां धर्माणामत्रैव श्रुतत्वात् ।

(२) अरणिलक्षणं चोक्तं यज्ञपार्श्वे सङ्ग्रहकारिकायाम्—

अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः ।
तस्य या प्राङ्मुखी शाखा उदीची वोर्ध्वगापि वा ॥ १ ॥
अरणिस्तन्मयी ज्ञेया तन्मध्येवोत्तरारणिः ।
सारवद्दारवच्चाग्रमोविली च प्रशस्यते ॥ २ ॥
संसक्तमूलोयः शम्याः स शमीगर्भ उच्यते ।
अलाभे त्वशमीगर्भादाहरेदविलम्बितः ॥ ३ ॥
चतुर्विंशाङ्गुला दीर्घा विस्तारेण षडङ्गुला ।
चतुरङ्गुलमुत्सेधा अरणिर्याज्ञिकैः स्मृता ॥ ४ ॥
मूलादष्टाङ्गुलं त्यक्त्वा अग्राच्च द्वादशाङ्गुलम् ।
अन्तरं देवयोनिः स्यात्तत्र मध्यो हुताशनः ॥ ५ ॥

आध्वर्यवप्रकृतिः ।

"ॐ उर्वश्यसि" (५।२)
आयुरसीत्युत्तरयाऽऽज्यस्थाली ॐसंस्पृश्य ।
"ॐ आयुरसि" (५।२)
पुरूरवा इत्यभिनिधानं तया ।
"ॐ पुरूरवा असि" (५।२) ।

मूर्धाक्षिकर्णवक्त्राणि कन्धरा चापि पञ्चमी ।
अङ्गुष्ठमात्राण्येतानि द्व्यङ्गुष्ठं वक्ष उच्यते ॥ ६ ॥
अङ्गुष्ठमात्रं हृदयमङ्गुष्ठमुदरं तथा ।
एकाङ्गुष्ठा कटिर्ज्ञेया द्वौ वस्तिर्द्वौ च गुह्यकौ ॥ ७ ॥
ऊरुजङ्घे च पादौ च चतुस्त्र्येकैर्यथाक्रमम् ।
अरण्यवयवा ह्येते याज्ञिकैः परिकीर्तिताः ॥ ८ ॥
यत्तद्गुह्यमिति प्रोक्तं देवयोनिः स उच्यते ।
तस्यां यो जायते बह्निः स कल्याणकृदुच्यते ॥ ९ ॥
प्रथमे मन्थने ह्येष नियमो नेतरेषु च ।
अष्टाङ्गुलः प्रमन्थः स्याच्चात्रं स्याद्द्वादशाङ्गुलम् ॥ १० ॥
ओबिली द्वादशैव स्यादेतन्मन्थनयन्त्रकम् ।
गोबालैः शणसंमिश्रैस्त्रिवृद्वृत्तमनंशुकम् ॥ ११ ॥
व्यामप्रमाणं नेत्रं स्यात्तेन मथ्योहुताशनः ।
चात्रबुन्धे प्रमन्थाग्रं गाढं कृत्वा विचक्षणः ॥ १२ ॥
(बहुदिने मंथनेन प्रमंथनाशे तत्रैवोक्तम् ।)
उत्तराया अभावाद्धि ग्राह्यो मन्थोऽधरारणेः ॥ १३ ॥
आख्यातं कैश्चिदेवं तन्निर्मूलत्वादुपेक्ष्यते ।
(मानप्रकारो यज्ञपार्श्वे—)
शिरश्चक्षुः कर्णमास्यं प्रथमेंशे प्रकीर्तितम् ॥ १४ ॥
द्वितीये कन्धरा वक्षस्तृतीये ह्युदरं स्मृतम् ।
चतुर्थे चैव योनिः स्यादूरु द्वद्वं च पञ्चमे ॥ १५ ॥
षष्ठे जङ्घे तथा पादौ पूर्वा चारणिरङ्गतः ।
यदि मन्थेच्छिरस्यग्निं शिरो रोगैः प्रमीयते ॥ १६ ॥
यजमानस्तथा कण्ठे ह्यंसे चैव विशेषतः ।
मन्थेद्यो यजमानस्तु पक्षहीनो भवेद्ध्रुवम् ॥ १७ ॥
यो मन्थत्युदरे कर्ता क्षुधया म्रियते तु सः ।
देवयोन्यां तु यो मन्थेद् देवसिद्धिः प्रजायते ॥ १८ ॥
मन्थेदूरुद्वये यस्तु राक्षसङ्गर्म तस्य तत् ।
जङ्घायां यातुधानेभ्यः पादयोः स्यात्पिशाचके ॥१९ ॥
प्रथमे मन्थने ज्ञेयं द्वितीयादौ न शोधयेत् ।
अष्टाङ्गुलः प्रमन्थः स्याद्दीर्घो द्व्यङ्गुलविस्तृतः ॥ २० ॥

आध्वर्यवपद्धतिः ।

अग्नये मथ्यमानायानुवाचयति ।

ॐअग्नये मथ्यमानायाऽनुब्रूऽहि । प्रथमायां त्रिरनूक्तायां मन्थति गायत्रेणेति प्रतिमन्त्रं त्रिः प्रदक्षिणम्" (५।२।२)

"ॐगायत्रेण त्वा छन्दसा मन्थामि,
ॐत्रैष्टुभेन त्वा छन्दसा मन्थामि,
ॐजागतेन त्वा छन्दसा मन्थामि" (५।२) ।

जाते जातयेति ।

हौत्रपद्धतिः ।

अथातिथ्येष्टिः ।

(१)अग्निमन्थनम् ।

आचम्य तीर्थेन प्रविश्य (२)पश्चाद्वेदेरवस्थाय "अग्नये मथ्यमानायाऽनुब्रूऽहीत्युक्ते—

"ॐअभि त्वा देव सवितरीशानं वार्याणां । सदावन्भागमीमहोऽ
अभि त्वा देव सवितरीशानं वार्याणां । सदावन्भागमीमहोऽ
अभि त्वा देव सवितरीशानं वार्याणां । सदावन्भागमीमहोऽ(३)
मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षतां । पिपृतां नो भरीमभोऽ (४)

उत्सेधो द्व्यङ्गुलन्तस्य त्वैशानपूर्व ऊर्ध्वगः ।
एवमष्टादश प्रोक्ताः प्रमन्थ्या ह्युत्तरारणेः ॥ २१ ॥
पादौ तस्याः स्मृतं मूलमग्रस्तु शिर उच्यते ।
अध्वर्युः प्राङ्मुखो मन्थेत्प्रत्यग् दिक्चरणा हि सा ॥ २२ ॥
ओविली यजमानेन धृत्वा गाढं च मन्थयेत् ।
मथ्नीयात्प्रथमं पत्नी यद्वा कश्चिद्दृढो द्विजः ॥ २३ ॥
मूलादष्टाङ्गुलं त्यक्त्वा अग्राच्च द्वादशाङ्गुलम् ।
अन्तरा देवयोनिः स्यात्तत्र मथ्यो हुताशनः ॥ २४ ॥
नान्यवृक्षेण मथ्नीयान्न कुर्याद्योनिसङ्करम् ।
छेदिता स्फटिता चैव सुषिरा ग्रन्थिमत्तका ॥ २५ ॥
चतुर्विधाऽरणिस्त्याज्या श्रेयस्कामैर्द्विजातिभिः ।
कलेदता हरते पुत्रान् स्फाटिता शोकमावहेत् ॥ २६ ॥
ग्रन्थिमूर्द्धा हरेत्पत्नीं सुषिरा पतिमारिणी ॥ इति ।

(१) 'आसन्ने हविष्यातिथ्येऽग्निं मन्थति' (कौ० ब्रा० ८।१) "आसाद्य हवीꣳष्यग्निं मन्थती" (श० ब्रा० ३।४।१।१९)त्यादिश्रुतेर्हविरासादनानन्तरमग्निमन्थनम् ।
(२) शां० श्रौ० ३।१३।१६ (३) ऋ० १।२४।३ (४) ऋ० १।२२।१३

आध्वर्यवपद्धतिः ।

ॐअग्नये जातायाऽनुब्रूऽहि ।

प्रह्रियमाणायेति प्रास्यन् ।

ॐ अग्नये(१) प्रह्रियमाणायानुब्रूऽहि ।

भवतन्न इति प्रास्यति ।

"ॐभवतन्नः समनसौ सचेतसावरेपसौ । मा यज्ञर्ठ० हिर्ठ० सिष्टं मा यज्ञपतिञ्जातवेदसौ शिवौ भवत मद्य नः" (५।३) ।

अग्नावग्निरिति जुहोति स्थाल्याः स्रुवेण ।

"ॐअग्नावग्निश्चरति प्रविष्ट ऋषीणाम्पुत्रो अभिशस्तिपावा ।

हौत्रपद्धतिः ।

त्वामग्ने पुष्करादध्यथर्वा निरमन्थत । मूर्ध्नो विश्वस्य वाघतोऽ(२)

तमुत्वा दध्यङ्ङृषिः पुत्र ईधे अथर्वणः । वृत्रहणं पुरन्दरो(३)

(४)तमु त्वा पाथ्यो वृषा समीधे दस्युहन्तमम्" ।

(५)अत्रावस्येत् । 'जातायानुब्रूऽही'त्युक्ते । "धनञ्जयं रणे रणोऽ

उत ब्रुवन्तु जन्तव उदग्निर्वृत्रहाजनि।धनं जयो रणे रणोऽ(६)

आ यं हस्तेन खादिनं शिशुं जातं न बिभ्रति"(७)

प्रह्रियमाणायानुब्रूऽहीत्युक्ते—

"विशामग्नि स्वध्वरोऽ(८)

प्र देवं देववीतये भरता वसुवित्तमं । (९) (आज्याहुतौ हूयमानायां) आ स्वे योनौ निषीदतोऽ

आ जातं जातवेदसि प्रियं शिशीतातिथिं । स्योन आ गृहपतोऽ(१०)

अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा । हव्यवाड्जुह्वास्योऽ(११)

---

(१) सचयने सोमयागे "ऽग्निभ्यः प्रह्रियमाणेभ्योऽनुब्रूऽही" (श० ब्रा० ७।३।२।९) ति प्रैषः ।

(२) ऋ० ६।१६।१३। (३) ऋ० ६।१६।१४ । (४) ऋ० ६।१६।१५ ।

(५) पञ्चम्या अर्धर्चे उपरमेत् । अजायमाने रक्षोघ्नीमन्वाह । अग्नी रक्षांसि सेधति शुक्रतारिरमर्त्यः । शुचिः पावक ईड्यो ३ (ऋ० ७।१५।१०) मग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः । इति याजुषदात्रे विशेषः । (६) ऋ० १।७४।३

(७) सप्तम्या अर्धर्चे उपरमेत् । आश्वलायनानां तु "अजायमाने स्वेतस्मिन्नेवावसानेऽग्ने हंसि न्यत्रिग (ऋ० १०।११८।१-९) मिति सूक्तमावपेत पुनः पुनराजन्मन" (आश्व० श्रौ० ९४पत्रे) इति विशेषः ।

(८) ऋ० ६।१६।४० ।

(९) कुण्डलिकान्तर्गतः पाठः ख, ग, पुस्तके नास्ति ।

(१०) ऋ० ६।१६।४१-४२ । (११) ऋ० १।१२।६ ।

आध्वर्यवपद्धतिः।

स नः स्योनः सुयजा यजेह देवेभ्यो हव्यर्ठ० सदमप्रयुच्छन्त्स्वाहा" (५।४)। इदमग्निभ्याम्।

हौत्रपद्धतिः।

"त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सता। सखा सख्या समिध्यसोइ। (१)

तं मर्जयन्त सुक्रतुं पुरोयावानमाजिषु। स्वेषु क्षयेषु वाजिनोइ
तं मर्जयन्त सुक्रतुं पुरो यावानमाजिषु। स्वेषु क्षयेषु वाजिनोइ
तं मर्जयन्त सुक्रतुं पुरो यावानमाजिषु। स्वेषु क्षयेषु वाजिनोइम्"(२)।

इत्यग्निमन्थनम्।

पुनराचम्य। कं प्रपद्यादि सप्तदश (३)सामिधेन्यः। उपांशु हविः।

आवाहने-"आवह देवान्यजमानाय अग्निमग्न आ४वह सोममा४वह (उपांशु-)विष्णुं (उच्चैः) आ४वह देवा"नित्यादि समानम्।

उत्तमे प्रयाजे "भूर्भुवर्यें४ यजामहे स्वाहाग्नि स्वाहा सोमं स्वाहा (उपांशु-) विष्णुं (उच्चैः-) स्वाहा देवा" इत्यादिप्रकृतिवत्।

वार्त्रघ्नावाज्यभागौ।

---

(१) ऋ० ८।४३।१४।

(२) ऋ० ८।८४।८। अत्र याजुषप्रकृतिकानां आश्वलायनानां च 'यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः' (ऋ० १०।९०।१६) इति परिधानीया उक्तास्ति। सा च शांखायनानां पाशुक मन्यते श्रूयते। तथाहि श्रुतिः "एतया न्वत्र च चातुर्मास्येषु चाथ यत्र पशुरालभ्यते तदेतां पराचीमनूच्य यज्ञेन यज्ञमयजन्त देवा इति त्रिष्टुभा परिदधाती" (कौ०ब्रा० ८।२)ति। अत एव 'यज्ञेन यज्ञमिति न भवति पश्वङ्गत्वाभावादि'ति क्रतुरत्नमाला।

(३) अत्र प्राकृतीः 'प्र वो वाजा अभिद्यवो' (१)इति त्रिरनूच्य (२-३) 'अग्न आयाहि(४), तन्त्वा समिद्भिः (५), स नः पृथुश्रवा (६), ईडेन्यो नमः (७), वृषो अग्निः (८), वृषणं त्वा (९), अग्निन्दूतं (१०), समिध्यमानाऽध्वरे'(११), इति पठित्वा समिध्यमानवतीसमिद्धवत्योरन्तराले पृथुपाजौ धाय्ये प्रक्षेप्तव्ये। ते च—

'पृथुपाजा अमर्त्यो घृतनिर्णिक् स्वाहुतः। अग्निर्यज्ञस्य हव्यवो (ऋ० ३।२७।५) (१२) तं सबाधो यतः स्रुच इत्था धिया यज्ञवन्तः। आचक्रुरग्निमूतये' (ऋ०३।२७।६) इति। एवं च त्रयोदश सम्पद्यन्ते। ततः 'समिद्धोऽअग्न (१४), आजुहोता दुवस्यत(१५), आजुहोता दुवस्यत (१६) आजुहोता दुवस्यत' (१७), इति प्राकृतीः। एवं सप्तदश सामिधेन्यः।

आध्वर्यवपद्धतिः ।

होतृपदनकरणादि (१)सप्तदशेनः वज्रेणेत्यवबाधानम्

(१) अत्र प्रसङ्गात्किञ्चित्सामिधेनीविचारः प्रस्तूयते । नन्वत्र सामिधेनीविचारस्य कः प्रसङ्ग इति चेत् उच्यते । एवं भगवतः कात्यायनाचार्यस्य तार्तीयं वचनम्, किमिति, "यावत्सामिधेनी वेदेदमहं तावतिथेन वज्रेणे"(२।९)ति । अस्यार्थः–यत्परिमाणमासां सामिधेनीनां ताः यावत्यस्ता अस्मिन् कर्मणि यस्य तद्यावत्सामिधेनी कर्म यस्तद्वेद जानाति स तावतिथेन वज्रेणेति । तत्परिमाणमेषां ते तावन्तस्तावतां पूरणस्तावतिथस्तेन तावतिथेन । अत्र "यत्तदेतेभ्यः परिमाणे वतुप्" (पा० ५।२।३९ ।) एभ्यो वतुप् परिमाणे । "आ सर्वनाम्नः" (पा० ६।३।९१) सर्वनाम्न आकारोऽन्तादेशः स्याद्दग्दृशवतुषु । "तस्य पूरणे डट्" (पा० ५।२।४८) षष्ठ्यन्तात् । "वतोरिथुक्" । (पा० ५।२।५३)वतोरिथुगागमः स्यात्डटि परतः । इति चतुर्भिःसूत्रैस्तावतिथ इति रूपसिद्धिः । अत्रेदमहमित्युत्तरं सामिधेनीनां सङ्ख्यापूरणवाचकप्रत्ययान्तेन वज्रेणावबाध इति प्रयोगः । पञ्चदशानां पूरणः पञ्चदशस्तेन एवं सप्तदशेनेत्यादि तावतां पूरणेन वज्रेणेति प्रयुक्तत्वात् । प्रकृतौ पञ्चदशसामिधेन्यः अत्र तु सामिधेनीविवृद्धिः "सप्तदश सामिधेनीरन्वाह" (कौ० ब्रा० ८।२) ति श्रुतेः ।

तत्र विचारः—किं प्राकृतीभ्य एकादशभ्योऽधिकानामागम उत प्रथमोत्तमयोरेवाभ्यासेन सङ्ख्यापूरणमुत यावदुक्तं त्रिरभ्यासं प्रथमोत्तमयोः कृत्वावशिष्टानामागम इति संशये "बहिष्पवमाने तु ऋगागमः सामैकत्वा" (जै० द० १०।५। २६) दिति न्यायेन सङ्ख्यासामञ्जस्यादेकादशभ्यः प्राकृतीभ्योऽतिरिक्तानां सर्वासामागम इति प्रथमः पूर्वः पक्षः ।

प्रकृतावेकादशभिः पठिताभिः पञ्चदशसङ्ख्याया अपूर्णावृगन्तरागमेन तत्पूरणं न कृतं किन्तु तत्पूरणायाभ्यासो विहितः । "त्रिरेव प्रथमां त्रिरुत्तमामनवानन्ननुब्रूया"दि(श० ब्रा० १।३।५।१३) (श० ब्रा० ११।२।७।७–८) ति । अतः सामिधेनीविवृद्धावभ्यासेन सङ्ख्यापूरणं युक्तम् । अभ्यासपक्षेऽपि यावत्कृत्वोऽभ्यासे सति सप्तदशैकविंशत्यादि संख्याः पूर्यन्ते तावत्कृत्वः प्रथमोत्तमे अभ्यसनीये इति मध्यमः पक्षः ।

न हि त्रित्वं पूरणार्थं विहितं, प्रथमाया द्विरभ्यासेनापि पञ्चदशसंख्यायाः पूरणात् । अतो विवक्षितं त्रित्वम् । तथासति तदबाधाय प्रथमोत्तमे त्रिरभ्यस्यावशिष्टानामृचामागमेन सङ्ख्या पूरणीयेति (मी० १०।५।८) सिद्धान्तः ।

सामिधेनीविवृद्धिश्रुतावागमे कर्तव्ये सत्यागम्यमानानामृचां 'किमन्ते निवेशोऽथवा समिद्धयमानवतीं समिद्धवतां चान्तरा उत या धाय्याशब्दोक्तास्तास्तयोर्मध्येऽन्यास्त्वागन्तवोऽन्ते इति संशयः । 'अन्ते तु बादरायणस्तेषां प्रधानशब्दत्वा' (जै० ५।२।१९) दिति न्यायात्सर्वाः प्राकृतीनामन्ते स्युरिति प्रथमः पक्षः ।

"इयं वै समिध्यमानवती असौ समिद्धवती यदन्तरा तद्धाय्या" इति धाय्यानामाकाशत्वेन स्तवनं द्यावापृथिवीसंस्तुतयोः समिद्धयमानसमिद्धवत्योर्मध्ये तासां निधानमनुमापयति सर्वाश्चागन्तवो निधीयमानतया धाय्या इति सर्वासां तन्मध्ये निवेश इति द्वितीयः पक्षः ।

न निधीयमानमात्रवचनो धाय्याशब्दः स्तुतिशस्त्राद्यर्थतया निधीयमानास्वपि त-

आध्वर्यवपद्धतिः ।

(१) नं,समित्परिशेषणम् ।

उत्तमे प्रयाजे-"इदमग्नये सोमाय विष्णवे देवेभ्य आज्यपेभ्य' इत्यादि ।

उपांशु प्रधानयागः । विष्णवेऽअनु ब्रू३(२)हि । विष्णुं यज ।

च्छाब्दाभावात् । अतो यत्रैव धाय्याशब्दप्रयोगो वेदे दृष्टः "पृथुपाजवत्यौ धाय्ये" इत्यादिस्ता एव धाय्या न त्वागन्तुमात्रमतस्तासामेव तन्मध्येऽन्यासां त्वागन्तूनामन्त एव निवेश इति (जै० ५।३।३) सिद्धान्तः ।

शतपथेऽपि सप्तदशसामिधेनीपक्षे "पृथुपाजा" (ऋ० ३।२८।५) तं सबाध (ऋ० ३।२८।६) इति धाय्याख्ययोः ऋचोः स्थानं पूर्वोत्तरपक्षाभ्यां दर्शितम् । तथा हि—'तद्वैके पुरस्ताद्धाय्ये दधत्यन्न धाय्ये मुखत इदमन्नाद्यं दध्म इति वदन्तस्तदु तथा न कुर्यादनवक्लृप्ता ह तस्यैषा भवति यः पुरस्ताद्धाय्ये दधाति दशमी वा हि तद्भवादशी वा सम्पद्यते तस्यो है वेषावक्लृप्ता भवति यस्यै तामष्टमीमन्वाहुस्तस्मादुपरिष्टादेव धाय्ये दध्यादि' (श० ब्रा० १।४।१।३७)ति । आपस्तम्बोऽप्यसूत्रयत् "समिद्धयमानवर्ती समिद्धवर्ती चान्तरेण पृथुपाजवत्यौ धाय्ये दधाती"ति । तथा चाश्वलायनः— "तृतीयस्यां सामिधेन्यावावपते प्रागुपोत्तमायाः पृथुपाजा अमर्त्य इति द्वे धाय्ये इत्युक्त एते प्रतीयात्" (५० पत्रे) इति ।

एवं च त्रैधातव्या (श० ब्रा० ५।५।५।६ का० श्रौ० १५।१०।२४) वामधाय्याशब्दिकाया "अग्ने त्री ते वाजिने" (ऋ० ३।२०।२) त्येतस्याः त्रिष्टुभोऽन्ते निवेशाच्चिष्टुभा परिदधातीत्यादिदर्शनमुपपन्नं भवति । तस्मादधाय्याशब्दिकानामन्त एव निवेशः ।

(१) इदमातिथ्यं इडान्तं भवति "इडान्तं भवती" (श० ब्रा० ३।४।१।२६)ति श्रुतत्वात् । अत्र च पूर्वयेडया इडान्ततेति प्राङ् (अग्निष्टोमपद्धतिटिप्पण्यां ४३ पत्रे) निरूपितम् । अत्रेडान्ताङ्करीतिविधानम् । अतोऽत्रानुयाजाभावात् तिसृष्वपि स्रुक्षु चतुर्गृहीतान्येवाज्यानि, नोलूमुकोदूहनं, न समित्परिशेषणम्, चतुर्थं प्रयाजे सर्वस्यौपभृते समानयनमिति प्रकृतितो विशेषः ।

(२) इयमिष्टिर्नीवैस्तरां वागन्तेन वा (का० श्रौ० ७।२–२८) । वागन्तपक्षेऽपि "दीक्षणीया-प्रायणीया-ऽऽतिथ्यादेवताः" (का० श्रौ० ४।५।९) इति सूत्रादेवतापदमुपांशु इति रामवाजपेयिनः । मन्द्रतरमातिथ्यायामिति पक्षे देवतापदमात्रमुपांशु, प्रागग्नीषोमीयादुपांशुपक्षे सर्वमुपांशु भवतीति देवयाज्ञिकाः ।

अत्र 'यावत्या वाचा कामयेत तावत्या दीक्षणीयायामनुब्रूयान्मन्द्रं प्रायणीयायां मन्द्रतरमातिथ्यायामुपांशूपसत्सूक्तैः प्रवर्ग्येण' इति श्रुतः स्वरविशेषः किं ज्योतिष्टोमापूर्वप्रयुक्त उत दीक्षणीया पूर्वप्रयुक्त इति विचारः । तत्र ध्वनेरुच्चावचीभावः परमापूर्वप्रयुक्तः तस्य फलवत्वादिति पूर्वः पक्षः । परमापूर्वजननद्वारेण फलसम्बन्धादवान्तरापूर्वेऽपि समानं फलवत्वम् । समाने च फलवत्वे सन्निकृष्टलक्षणया निर्णयः । तथा हि दीक्षणीया प्रायणीयातिथ्यादिशब्दा अङ्गकर्मवाचिनः । न च मन्द्रत्वादिधर्माणां कर्मस्वरूपं प्रयोजकम्, अपूर्वप्रयुक्ते निर्णीतत्वात् । ततो दीक्षणीयादिशब्दैरपूर्वं लक्षणीयम् । तत्र वाक्यगतमवान्तरापूर्वं सन्निकृष्टम् तद्द्वारकं परमापूर्वं विप्रकृष्टम् । तस्मादवान्तरापूर्वप्रयुक्ता एते धर्मा इति पूर्वमीमांसा (९।१।२) सिद्धान्तः ।

आध्वर्यवपद्धतिः ।

निधनवषट्कारसमकालं यागः (त्यागः) इदं विष्णवे ।

औद्गात्रपद्धतिः ।

आतिथ्यायां प्रस्तोता पूर्ववत्पत्नीशालां प्रविश्य गार्हपत्यस्य पश्चादुपविश्य प्रधानयागकाले प्रेष्ठं व इति (१)गायत्यौशनं साम(२)तृचे गायेत् ।

औशनस्य उशनाऋषिः गायत्रीछन्दः अग्निर्देवता आतिथ्यायां गाने विनियोगः ।

१८ २ १ १ २ १८ ८ २ १ २ १
प्रेष्ठंवाः । अता२ ३यिथीम् । स्तौषेमित्रम् । इवप्रा२ ३याम् । अग्ना-
२ २ १ १ २
यिरा ३था३म् । नावा २३ हा ३४३ यिदा २३४ यो ६ हायि ॥
१ २ १ २ १ २ १ ८ २ ८ १
कविमिवा । प्रशꣳसा २३याम् । यां देवासः । इति द्वा २३यिता ।
२१ २ २ १ १ ५ ५
निमार्ती ३ये३ । पूवा २३ हा ३४३यि । दा २३४ धो ६ हायि ॥
१ २ १ २ १८ ६ १ ८ २ १८ २
तुवं यवायि । ष्ठदाशू२३षाः । नृꣳपाहिश्रु । णुहोगा२३यिराः ।
१ २ २ १ २ १ ५ ५
रक्षातो३का३म् । ऊता२३हा २४३यि । त्मा२३४नो ६हायि(३) ॥

हौत्रपद्धतिः ।

(४)'अग्निर्वृत्राणि, त्वं सोमासि सत्पतिरि'ति ।

---

(१) "आतिथ्यायां गायत्रीसामौशनम्" (द्रा० श्रौ० २।२।२४) इत्युक्तेः ।

(२) प्रेष्ठं व इति तृचात्मकं सूक्तम् ।

१ २ ३ १ २ ३ ३ २ ३ १ २ ३ २ २ ३ २ ३ १ २ २
प्रेष्ठं वो अतिथि स्तुषे मित्रमिव प्रियम् । अग्नेरथन्नवेद्यम् । १ ॥
३ १ २ ३ २ ३ १ २ ३ २ १ २ २ २
कविमिव प्रसर्टस्थं यन्देवास इति द्विता निमत्तेष्वादधुः । २ ॥
१ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २ २
त्वं यविष्ठदाशुषो नृꣳपाहि शृणुहोगिरः । रक्षा तोक मुतमत्ना । ३ ॥

(३) उ० आ० ५, १, १८, १–३ ऊ० गा० ५, १, ११, ॥

(४) ॐअग्नयेऽनुब्रू३हीत्युक्ते 'अग्निर्वृत्राणि जङ्घनद्द्रविणस्युर्विपन्यया । समिद्धः शुक्र आहुतोम् (ऋ० ६।१६।३४) ।

सोमायानुब्रू३हीत्युक्ते "त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा । त्वं भद्रो असि क्रतो३म्" (ऋ० १।९१।५) इति पुरोऽनुवाक्यां ब्रूयात् ।

आश्वलायनानां 'समिधाग्निं दुवस्यता (ऋ० ८।४४।१) ऽऽप्यायस्व समेतु त (९।३१।४) इत्यतिथिमन्तावाज्यभागौ भवतः । शाङ्खायनानान्तु 'अतिथिमन्तौ हैके कुर्वन्ति वात्रघ्नौ त्वेव स्थिता (कौ० ब्रा० ८।२।)वि"ति श्रुतेर्वात्रघ्नावेव भवतः ।

आध्वर्यवपद्धतिः ।

स्विष्टकृदन्ते न सञ्चराभ्युक्षणम् ।
प्राशित्रादि(१) पवित्रप्रतिपत्यन्ते—

हौत्रपद्धतिः ।

ततः प्रधानयागे— (उपांशु-) विष्णवे (उच्चैः—) अनुब्रू४· होत्युक्ते—

(उपांशु-) विष्णोर्नु कं वीर्याणि प्र वोचं यः पार्थिवानि विममे रजांसि ।

यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः(२) (उच्चैः—) ओ३म् ॥

(उपांशु-) विष्णुं (उच्चैः-) यज । भूर्भुवर्यें४यजामहे (उपांशु-) विष्णुं प्रतद्विष्णुस्तवते वोर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।

यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा४ (३)

(उच्चैः) वौ४षट् ओजः सहः सह ओजः स्वः ।

अत्र (४)प्रस्तोत्रा निधनेन सह वषट्कुर्यात् ।

अग्नये स्विष्टकृतेऽनुब्रू४हीत्युक्ते—

होतारं चित्ररथमध्वरस्य यज्ञस्य यज्ञस्य केतुं रुशन्तं । प्रत्यर्द्धिं देवस्य देवस्य मन्हा श्रिया त्वग्निमतिथिं जनानोऽ३म्(५) ।

अग्निं स्विष्टकृतं यजेत्युक्ते—

भूर्भुवर्यें४यजामहेऽग्निं स्विष्टकृतमयाडग्निरग्नेः प्रिया धामान्ययाट् सोमस्य प्रिया धामान्ययाट् (उपांशु-) विष्णोः (उच्चैः—)प्रिया धामान्ययाट्देवानाꣳमित्यादि 'जुषतोहविर्यस्त्वा स्वश्वः सुहिरण्यो अग्न उपयाति वसुमता रथेन ।

तस्य त्राता भवसि तस्य सखा यस्त आतिथ्यमानुषग्जुजोषा(६)

---

(१) अत्रायं पदार्थक्रमः-प्राशित्रभागः । इडावदानम् । ब्रह्मयजमानषडवत्तभागाः। एकदेवत्यत्वाच्चतुर्धाकरणम् । प्रस्तर-परिधि-विष्टुति-बर्हिरासादनोपसदग्नीषोमीयार्थं रक्षणम् । पवित्रप्रतिपत्तिरिति ।

(२) इयं पुरोऽनुवाक्या (ऋ० १।१५४।१)।

(३) इयं याज्या (ऋ० १।१५४।२) ।

(४) प्रस्तोतृनिधनहोतृवषट्कारयोः समकालो यथास्यात्तथा वषट्कारः कर्तव्यः । "प्रणवो यज येऽयजामहो वषट्कारः सम्प्रैषाश्चैरुपांशु हविःषु" (शां० श्रौ० १।१।३६) इति कल्पवचनादुपांशु हविःषु सर्वत्र प्रणवादीनामुच्चैष्ट्वं, परिसङ्ख्यानादन्यदुपांशु ।

(५) ऋ० १०।१।५ । (६) ऋ० ४।४।१० ।

आध्वर्यवपद्धतिः ।

(तानूनप्त्रोपक्रमः ।)

अध्वर्युः स्रुवेण ध्रौवं व्रतप्रदाने गृह्णा(१)त्यापतय इति सकृत्सशेषम् ।

"आपतये त्वा परिपतये गृह्णामि तनूनप्त्रे शाक्कराय शक्वन ओजिष्ठाय (५।५) ।

एवं प्रतिप्रस्थातृनेष्टारौ सशेषम् । उन्नेता ध्रुवयैव निःशेषं सर्वेषां द्विश्च स्थाल्याः स्रुवेण तूष्णीं संग्रहणमिति केचित् । नेति कर्कः ।

तानूनप्त्रमेतदक्षिणस्यां वेदिश्रोण्यौ निधाया(२)वमृशन्त्यृत्विजो(३) हिरण्यहस्ता वरणक्रमेण यजमानश्चानाधृष्टमिति ।

हौत्रपद्धतिः ।

द्यौ४षट् ओजःसहः सह ओजः स्वः ।

उदकोपस्पर्शः ।

तत इडोपह्वानम् । उपहूतं बृहदित्यादि तस्मिन्नुपहूत इति पूर्ववत् ।

भक्षः । मार्जनम् । इडान्तातिथ्येष्टिः ।

---

(१) प्रतिपुरुषं चैतद्ध्रौवाज्यग्रहणत्रयं सर्वैर्ब्रह्मादिभिः पुरुषैर्वरणक्रमेण कर्तव्यमित्यर्थः । सर्वैः कुतः "आज्यानि गृह्णाना" (श०ब्रा०३।४।२।९) इति श्रुतेः । आज्यानीति गृह्णाना इति चाज्येषु च ग्रहणकर्तृषु च बहुत्वश्रवणात् । अतो ब्रह्मादिभिः सर्वैः वरणक्रमे"णापतय" (५।५) इति मन्त्रेण ध्रौवस्य व्रतपात्रे ग्रहणं कर्तव्यम् । तूष्णीमेव स्थाल्याः द्विः स्रुवेणेति । यजमानोऽपि गृह्णातीति हरिस्वाम्यभिप्रायः "अथैत आज्यान्येव गृह्णाना" (श०ब्रा०३।४।२।९) इत्यत्रैते ऋत्विग्यजमाना इति व्याख्यातवान् ।

ध्रौवमाज्यं व्रतप्रदानपात्रे प्रथमं ततो द्विराज्यस्थाल्याः स्रुवेण, प्रतिपुरुषं गृह्णीयुरित्येतच्छाखान्तरात् । तानूनप्त्रं गृह्णाति कांस्ये चमसे वा" (२।२।१।१) इति मानवेश्रौतसूत्रे ।

(२) एतदाज्यं सर्वे हत्विग्यजमानाः सम्भूयावमृशन्तीति हरिस्वामिनः । तथा च मानवे—"युगपत्समवमृश्यानाघृष्टमसीति जपन्तो" (२।२।१।४) ति ।

(३) अत्र सोमयागे ब्रह्मादयश्चमसाध्वर्यवश्च बहवः कर्तारः समधिगताः ते सर्व किमृत्विक् शब्दवाच्या उत केचिदेवेति संशयः । कुदन्तस्त ऋत्विकशब्दस्य प्रवृत्तिनिमित्तमृतौ यजनम् । तच्च ब्रह्मादिष्वित्र चमसाध्वर्युष्वप्यस्ति । तस्मात्सर्वे ऋत्विक्शब्दवाच्या इति पूर्वपक्षः । मैवम् । सौम्यस्याध्वरस्य यज्ञक्रतोः सप्तदशर्त्विज" इति सङ्ख्याश्रुतिविरोधात् । तस्मात् योगमनतिक्रम्य शास्त्रीयरूढिमप्याश्रित्य केचिदेव ऋत्विक्शब्दवाच्या इति पूर्वतन्त्र (३।७।१६) सिद्धान्तः ।

सप्तदश ऋत्विज इति समधिगतम् । कतमे ते सप्तदश इति विचारे अज्ञानादनियम इति पूर्वपक्षः । "ऋत्विग्दक्षिणादानप्रकरणे "अग्नीधे हिरण्यं ददाति (श०ब्रा०४।३।४।२०) "अथ ब्रह्मणे, अथोद्गात्रेऽथ होत्रेऽथाऽध्वर्यवे, अथ प्रस्तोत्रेऽथ मैत्रावरुणायाथ ब्राह्मणा-

आध्वर्यवपद्धतिः ।

"ॐ अनाधृष्टमस्यनाधृष्यन्देवानामोजोऽनभिशस्त्यभिशस्तिपाऽअनभिशस्त्येन्यमज्रसा सत्यमुपगेषꣳस्विते मा धाः" (५।५) ।

अतः परं परस्परमद्रोहस्तेभ्यो न(१) सतानूनप्त्रिणे द्रोग्धव्यमिति श्रुतेः" (श० ब्रा० ३।४।२।९ ।) इति ।

ततः पल्यङ्क्य निदधात्यपिधायामृन्मयेन ।

अध्वर्युरपराङ्क् व्रतमिश्रं(२)दीक्षिताय व्रतं प्रयच्छति ।

बहुषु गृहपतये(३) ।

(अवान्तरदीक्षा ।)

अथावान्तरदीक्षा । यजमानः अग्ने व्रतपा इत्याहवनीये समिधमाधाय

"ॐ अग्ने व्रतपास्त्वे व्रतपा या तव तनूरियर्ठ० सा मयि या मम तनूरेषा सा त्वयि ।

च्छꣳसिनेऽथ पोत्रेऽथ नेष्ट्रेऽथाच्छावाकायाथोन्नेत्रेऽथ ग्रावस्तुतेऽथ सुब्रह्मण्यायै प्रतिहर्त्र उत्तमाय ददाती"ति (श० ब्रा० ४।३।४।२२) श्रुतौ ब्रह्मादीनां षोडशानां कीर्तनाद्दीक्षा श्रुतौ (श० ब्रा० १२।१।१।१—१०) नाम कीर्तनाच्च तेषामृत्विक्त्वमिति (पू० मी० ३।७।१७) सिद्धान्तः ।

अत्र स्वशाखायां "षोडशर्त्विजो वृणीत" (का० श्रौ० ७।१।७) इत्यत्र चमसाध्वर्यूणामृत्विगाख्याभावज्ञापनार्थं षोडशग्रहणम् । अतश्चर्त्विक्सम्बन्धिमधुपर्कं (पा० गृ० सू० १।३।४) तानूनप्त्र (श० ब्रा० ३।४।२।९) क्रतुदक्षिणादान (श० ब्रा० ४।३।४।२०–२२ का० श्रौ० १०।२।२१। शु० य० सं० ७।४५) दधिधानाभक्षणादिकं (श० ब्रा० ४।४।३।११ का० श्रौ० १०।८।६॥ य० सं० ८।१२) चमसाध्वर्यूणां न भवति । अथवा शाखान्तरीय (बौ० श्रौ० २।२।३) (आप० श्रौ० १०।१।१०।) (आश्व० गृ० १।२०।५) सदस्यऋत्विग्युदासार्थं षोडशग्रहणम् । "तस्मान्न सप्तदशमृत्विजं कुर्वीत नेदतिरेचयानीति" (श० ब्रा० १०।४।१।१९) स्वशाखायां निषेधात् ।

(१) सतानूनप्त्रिणि प्रेते त्रिरात्रमनध्यायः कार्यः । तथोक्तं पारस्करार्चार्यैः–"सतानूनप्त्रिणि सब्रह्मचारिणि च त्रिरात्र"(पा० गृ० २।११।८)मिति ।

(२) व्रतस्य पुरुषार्थत्वात्तत्करणे यदाऽसामर्थ्यं भवति तथापि तानूनप्त्रंदीयत एव क्रत्वर्थपुरुषसंस्कारकत्वात् । तद्दाने च क्रतोर्वैगुण्यापत्तेः ।

तानूनप्त्रस्य व्रतमिश्रस्य यजमानप्रदानार्थत्वादग्नावधिश्रितस्याज्यस्याब्राह्मणयोः क्षत्रियवैश्ययोर्भक्षप्रतिषेधा (श०ब्रा० २।३।१।३९) त्तयोः सोमे तानूनप्त्राभाव इति सम्प्रदायकारः ।

"यदु दक्षिणावता दीक्षेत यजमानायैव व्रत"मित्यादि (श० ब्रा० ३।४।२।१९) श्रुतेर्दीक्षिताय प्रयच्छतीत्युक्तम् ।

(३) "अथ यास्तद्देवाः जुष्टास्तनूः प्रियाणि धामानि सार्धꣳ समवददिरे तदिन्द्रे संन्यदधते" (श० ब्रा० ३।४।२।१९) त्यादिवाक्यशेषात्तानूनप्त्रस्य दीक्षितसंस्कारार्थत्वं प्रतीयते । तेन नाशदोषादौ कालाहुति (श० ब्रा० १२।६।१।१–३८य० सं० ८।५४–५९

आध्वर्यवपद्धतिः।

सह नौ व्रतपते व्रतान्यनु मे दीक्षान्दीक्षापतिर्मन्यतामनु तपस्तपस्पतिः (५।६)।

मदन्तीरुपस्पृश्य गाढतरं मुष्टिमेखलं कुरुते।

पत्नी च गार्हपत्ये(१) तूष्णीं समिधमाधाय मदन्तीरुपस्पृश्य गाढतरं मुष्टिमेखलं कुरुते। इत्यवान्तरदीक्षा(२)।

औद्गात्रपद्धतिः।

(उद्गातुः कृत्यम्)

(तानूनप्त्रापक्रमः।)

अथ क्रयेऽह्नि तानूनप्त्राभिमर्शनात्पूर्वं स्वयमुद्गाता स्वगृहात्प्रथममुदीचीं दिशं गच्छेत्।

"देवो देवमेतु सोमः सोममेतृतस्य पथे"ति(३)।

अर्द्धाधिकं मार्गं गत्वा जपेत्। "विहाय दोष्कृत्यमि"ति(४)।

देवयजनस्यासाधारणं मार्गं प्राप्य जपेत्।

"वद्धानामासि स्रुतिः सोमसरणी सोमं गमेयमि"ति(५)।

(प्राचीनावीती) पत्नीशालावेदेरुत्तरमन्तमाक्रम्य दक्षिणमन्तमीक्षमाणः "पितरो भूः पितरो भूः पितरो भूः" (६)इति जपेत्।

अथ यजमानः 'प्रतिहर्तारं त्वां वृणे' इति वृणीते पूर्वमृतश्चेत्।

उद्गातारस्तानूनप्त्रमाज्यमवसृज्य जपेयुः। "हविरसि वैश्वानरमना-

हौत्रपद्धतिः।

(तानूनप्त्राज्यग्रहणम्।)

अथ तानूनप्त्राज्यग्रहणम्। "ॐ आपतये त्वा परिपतये गृह्णामि तनूनप्त्रे शाक्राय शक्वन ओजिष्ठाय"।

इति मन्त्रेणाज्यं गृहीत्वा सर्वे ऋत्विजः यजमानश्च मदन्तीभिरुपस्पृश्य तत—

"ॐ अनाधृष्टमस्यनाधृष्यन्देवानामोजोऽनभिशस्तिपाः। अनभिशस्तेन्यमञ्जसा सत्यमुपगेषं सुविते मा धाः"

का० श्रौ० २५।६।१०) माध्वर्यवं (का० श्रौ० २५।१।६) च कृत्वा पुनर्ग्रावमुत्पाद्य पूर्ववदेव वसतीवरीपात्रे ग्रहणाभिमर्शनादिना संस्कृत्य देयम्। अन्यथा संस्कारलोपाद्दैगुण्यं स्यादिति।

(१) सत्रेषु नानागार्हपत्यपक्षे (का० श्रौ० १२।१।१६) स्वस्वगार्हपत्ये पत्न्यः समिदाधानं कुर्वन्ति, एकगार्हपत्ये तु तस्मिन्नेव।

(२) अनेकयजमानके कर्मणि सर्वेषां पत्नीयजमानानामवान्तरदीक्षा भवति क्रमेण।

(३) तां० १।१।२।

(४) तां० १।१।३। (५) तां० १।१।४। (६) तां० १।१।५।

आध्वर्यवपद्धतिः।

(यजमानषष्ठानामब्रह्मादिऋत्विजां सोमालम्भादिकम्)

आद्यर्त्विजां यजमानस्य प्रतिप्रस्थातुः कर्कमतेनाग्नीध्रस्य वा पाणिप्रक्षालनम्। हिरण्यबन्धनम्।

(१)यजमानषष्ठाः (मदन्तीरुपस्पृश्य) सोममाप्याययन्त्यर्ठ० शुरर्ठ० शुरिति। मदन्त्युपस्पर्शनम्। सोमविस्रर्ठ०सनम्।

आज्यमालभ्योपस्पृशेद्पः सोममालिप्समानस्तथा विपर्यस्य। सर्वत्र

औद्गात्रपद्धतिः।

धृष्टमनाधृष्यन्देवानामोजोऽनभिशस्त्यभिशस्तिपाअनभिशस्तेन्यमञ्जसा-सत्यमुपगेषꣳसुविते माधाः"।

(सोमाप्यायनम्।)

उद्गातारोऽप उपस्पृश्य सोमं हिरण्येनान्तर्द्धायाभिमृशेयुः।

"ॐ अर्ठ०शुरर्ठ०शुष्टे देव सोमाप्यायतामिन्द्रायैकधनविदे।

आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्व।

हौत्रपद्धतिः।

इति मन्त्रेण सहिरण्यं ध्रौवमाज्यं पात्रीस्थं वर्हिष्यासन्नं तानूनप्त्रं समवमृश्य पुनर्मदन्तीरुपस्पृश्य—

(सोमाप्यायनम्।)

ततः पूर्वेणाहवनीयं परीत्य दक्षिणेन राजानं(२)परीत्य प्राङ्मुखस्तिष्ठन् राजानमाप्याययन्ते।

---

(१) "ते वं षड्भूत्वाप्याययन्ती" (श० ब्रा० ३।४।३।१७)ति श्रुतौ के पुनस्ते षट्? ये केचिदिति प्राप्ते-"षड्वा ऋतवः ऋतव एवैतद्भूत्वाऽऽप्याययन्ती"(श० ब्रा० ३।४।३।१७)ति वाक्यशेषादृतुसंस्तुतास्त "द्वसन्त आग्नेध्रा, ग्रीष्मोऽध्वर्युर्वर्षा उद्गाता शरद् ब्रह्मा हेमन्तो होता" (श० ब्रा० ११।२।७।३२) इत्येते पञ्चर्त्विजः शाखान्तराच्च षष्ठो यजमानो भवति।

"अथ मदन्तीरुपस्पृश्य राजानमाप्याययन्ती" (श० ब्र० ३।४।३।११)ति श्रुतेर्यावन्त. सोममाप्याययन्ति ते सर्वं प्रथमं मदन्तीः स्पृष्ट्वा ततः सोमं स्पृशेयुः' तथा "त आप्याययन्ती" (श० ब्रा० ३।४।३।१८)ति श्रुतत्वात्। "विस्रंस्य राजानं सहिरण्यैः पाणिभिराप्याययन्ती' (११।१।१) त्यापस्तम्बः। अतो मदन्ती-रुपस्पृश्यानामिकायां हिरण्यबन्धनं कर्तव्यं ततः सोमाप्यायनं विस्रंस्य सोममिति। एव-मन्येषु सूत्रेष्वपि पठितमस्ति।

अनेकयजमानके त्वेक एवाप्यायते परार्थत्वात्। आप्यायनं चाग्नालम्भनमात्रं न सो-मेप्रक्षेपः नियतपरिमाणत्वात्।

(२) अत्र (सर्वत्र वा) राजासन्दीमग्नेर्वामार्गः। तथा च बौधायनः-"मो राजानं चाहवनीयं चान्तरेण कञ्चन सञ्चारा" दिति।

आध्वर्यवपद्धतिः ।

सोमालम्भनमात्रेणैतदाप्यायनम्(१) ।

"ॐ अर्ठ०शुरर्ठ०शुष्टे देव सोमाप्यायतामिन्द्रायैकधनविदे ।
आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्व ।
आप्याययास्मान्त्सखीन्त्सन्या मेधया स्वस्ति ते देव सोम सुत्या-
मशीय"(२) (५।७) ।

औद्गात्रपद्धतिः ।

आप्याययास्मान्त्सखीन्त्सन्या मेधया स्वस्ति ते देव सोम सुत्या-
मुद्गचमशीये"ति ।

(सोमपरिचरणम् ।)

न साक्षात्स्पर्शः। पुनरप उपस्पृश्य उद्गातारः प्रस्तरस्योपरि दक्षिणान् पाणीनुत्तानान्कृत्वा सव्याञ्चीचैः कृत्वा निन्हुवीरन् । 'एष्टा रायः एष्टा-

हौत्रपद्धतिः ।

"ॐ अंशुरंशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविदे । आ तुभ्यमिन्द्रः प्यायतामा त्वमिन्द्राय प्यायस्वाप्याययास्मान्सखीन्सन्या मेधया स्वस्ति ते देव सोम सुत्यामुद्गचमशीय" इत्याप्यायनम् ।

ततः "ॐ यमादित्या अंशुमाप्याययन्ति यमक्षितिमक्षितयः पिबन्ति । तेन नो राजा वरुणो बृहस्पतिराप्याययन्तु भुवनस्य गोपाः"। इत्युरांस्य-भिमृशेयुः । अप उपस्पृश्य—

---

(१) जपा-नुमन्त्रणा-भिमन्त्रणा-प्यायनो-पस्थानलक्षणानि—

जपमुच्चारणं विद्यात्क्रत्वर्थमपि तद्भवेत् ।
अर्थतः कार्यलाभश्चेदर्थ एव क्रतोर्भवेत् ॥
मन्त्रमुच्चारयन्नेव मन्त्रार्थत्वेन संस्मरेत् ।
शेषिणं तन्मना भूत्वा स्यादेतदनुमन्त्रणम् ॥
एतदेवाभिमन्त्रस्य लक्षणं चेक्षणाधिकम् ।
अद्भिः संस्पर्शनाधिक्यात्तदेवाप्यायनं स्मृतम् ॥
उपस्थानं तदेव स्यात्प्रणतिस्थानसंयुत"मिति ।

(२) अग्निष्टुदादिषु (तां० ब्रा०।१७।७।५ का० श्रौ० २२।४।३१) चास्य मन्त्रस्य विनियोगाः—"अर्ठ० शुरर्ठ०शुष्टे देव सोमाप्यायतामग्नय एकधनविदे । आ तुभ्यमग्निः प्यायतामा त्वमग्नये प्यायस्वे"ति । इन्द्रस्तुति (का० श्रौ० २२।५।३) यथाश्रुत एव । सूर्यस्तुति "सूर्यायैकधनविदे । आ तुभ्यं सूर्यः प्यायतामा त्वं सूर्याय प्यायस्वे"ति । वैश्वदेवस्तुति "विश्वेभ्यो देवेभ्य एकधनविद्भ्यः।आ तुभ्यं विश्वेदेवाः प्यायन्तामा त्वं विश्वेभ्यो देवेभ्यः प्यायस्वे"ति ।

सुत्यानेकत्वे "सुत्ये अशीय सुत्या अशीये"त्येवमूह इति शाङ्खायनभाष्ये(शां०श्रौ० ६।८।३।२३२ पत्रं) ।

आप्यायनपद्धतिः ।

(निह्नवविधिः ।)

उदकोपस्पर्शः(१) । प्रत्येत्य प्रस्तरे निह्नुवत उत्तानहस्ता दक्षिणोत्ताना वेष्टा राय इति ।

"ॐ एष्टा रायः प्रेषे भगाय ऋतमृतवादिभ्यो नमो द्यावापृथिवीभ्याम्" (५।७) ।

अत्र यजमानः स्वसञ्चरेण उत्तरतः प्रत्येत्य पूर्वेणाहवनीयं दक्षिणं गत्वा सोममाप्याय्य प्रत्येत्य अपः स्पृष्ट्वा प्रस्तरे निह्नवं कृत्वा स्वसञ्चरेण स्वस्थानं गच्छेत् ।

एवमेव ब्रह्मणोऽप्याहवनीयं परेण सञ्चर इति पक्षे, पूर्वेणेति पक्षे—पूर्वेणैवोत्तरतो गत्वा प्रत्येत्याप्याय्य पुनः प्रत्येत्य निह्नवं कृत्वा तथैव स्वस्थानं गच्छेत् ।

इतरेषां पूर्वेणाग्निं दक्षिणतो गत्वाप्याय्य प्रत्येत्य निह्नवः ।

(२)व्यूहनपरिष्यञ्जने कृत्वैके तानूनप्त्रादि कुर्वन्ति ।

औद्गात्रपद्धतिः ।

वामानि प्रेषे भगायर्त्तमृतवादिभ्यो नमो दिवे नमः पृथिव्या'इति। निह्नवनं नाम द्यावापृथिव्योर्नमस्कारः ।

हौत्रपद्धतिः ।

(निह्नवविधिः ।)

ततः दक्षिणोत्तानान्पाणीन्प्रस्तरे निधाय निन्हुवते(३) सव्योत्ताना नपराह्णे ।

"ॐ एष्टा रायः प्रेषे भगाय ऋतमृतवादिभ्यो नमो द्यावापृथिवीभ्याम्" । इति । आप्यायनप्रभृत्युपद्युपसदि संस्थितायाम् ।

न्यग्रोधश्चेत्तदा तस्याप्याप्यायनमात्रं तूष्णीं तस्यानिन्द्रार्थत्वेन मन्त्रस्याप्राप्तेः।अथवा फलचमसस्य यजमानचमससाध्ययागसाधन (जै०३।६।४७-५१) त्वात्सोपीन्द्रार्थो भवति सोमवत्। अस्मिन्पक्षे-"आर्ठ० शुरर्ठ०शुर्वो देवौ सोमन्यग्रोधावाप्यायतामा युवाभ्यामिन्द्रः प्ययतामा युवामिन्द्राय प्यायेथाम्। आप्यायतमस्मान्स्सखीन्स्सख्या मेधया स्वस्ति वां देवौ सोमन्यग्रोधौ सुत्या" मित्यूहो भवति । युक्तोऽयं पक्षः ।

(१) शाखान्तरात् । तथाहि मानवे—"यत्राज्येभ्योऽधिराजानमुपचरेयुः प्रक्षाल्येन् पाणीन् राज्ञो वाभ्याज्यानी" (२।२।१।१०)ति ।

(२) आतिथ्याया इडान्तत्वेऽपि व्यूहनपरिष्यञ्जनानीति संस्कारकर्माणि प्रवर्तन्त एव संस्कारत्वात् । प्रतिपत्तिकर्माण्यापे प्रणीताविमोक—राक्षसभागादीनि प्रवर्तन्त एव ।

(३) राजानं दक्षिणेन परीत्याहवनीयं पूर्वेणागत्य वेद्यामासन्ने प्रस्तरे वामहस्त-

आध्वर्यवपद्धतिः ।

ब्रह्मोद्गातृहोत्रध्वर्युप्रतिप्रस्थातृयजमानाः क्रमेणेति सम्प्रदायः । अग्नीत्पञ्चम इति कर्कः ।

(आतिथ्यापरिसमापनम् ।)

तत आतिथ्या(परि)समापनम् । भागपरिहरणम् । अग्निसम्मार्गप्रैषाग्निसम्मार्गौ ।

व्यूहने—विष्णोरुज्जितिम्० (२।१५) विष्णुस्तमपनुदन्तु (२।१५) । अभ्युद्य जुह्वा परिध्यञ्जनम् । सूक्तवाकप्रैषः(१) ।

(प्रस्तराञ्जनादिकम् ।)

समुल्लुप्य (२)प्रस्तरमङ्कृत्वा विधृत्यौ परिधींश्चादायाह 'अग्नीन्मदन्त्यापा३' इति 'मदन्तीत्यग्नीत् ।

अध्वर्युर्मरुतामिति नीचैर्हृत्वा ताभिरेहीति ध्रुवन्नध्वर्याहवनीयं प्रस्तरपरिधिविधृतीर्हृत्वा अग्नीदानीताभिः मदन्तीभिरभ्युद्याग्नीध्र प्रयच्छति निधानाय (३)स सुगुप्ते स्थापयति ।

अध्वर्योश्चक्षुष्पा इत्यात्मालम्भः (आत्मसंस्कारत्वात्) । उदकोप-

---

म्युब्जं दक्षिणं चोत्तानं कृत्वा ब्रह्मादयो निहनुवते। ब्रह्मयजमानौ दक्षिणस्थितावेव न सोमाप्यायनानिह्नवौ कुरुतः किन्तु यथासञ्चरमागत्याहवनीयं पूर्वेण परीत्य सोमाप्यायनसत्वात्तथैव प्रत्यागत्य प्रस्तरे निह्नवं कृत्वा ततो यथागतं गत्वा स्वस्थाने उपविशतः ।

(१) प्रस्तरप्रक्षेपाभावान्न तत्प्रथः । सूक्तवाकोऽप्यत्र न मीमांसायां तृतीयद्वितीये विचारितत्वादिति रामवाजपायनः ।

(२) प्रस्तरं समुद्गृह्य "सञ्जानाथा" (शु० य० सं० २।१६) मित्यनेन प्रकृतिवदादाय जुह्वादिषु प्रकृतिवदे (२।१६) वाकृत्वा परिधींश्च चकारादिध्रुती चादाय तूष्णीमेव सर्वान् परिधीन् विध्रुती च हस्तेन गृहीत्वा" अग्नीन्मदन्त्यापा३"इत्यग्नीधं ब्रूयात् ।

अत्र "अनुदात्तं प्रश्नान्ताभिपूजितया" (पा० ८।२।१००)रिति प्लुतिः ।

(३) ततोऽग्नीदेव प्रेषितस्तत्प्रस्तरादित्रिकं सुगुप्ते स्थाने स्थापयेद्यत्नेन । अग्नीषोमीयपर्यन्तं तस्य प्रयोजनत्वात् । "ताभिरेहीत्युपर्युपर्यग्निमतिहरति स यन्नानुप्रहरत्येतेन ह्यत ऊर्ध्वान्यहानि प्रचरिष्यन्भवत्यथ यदुपर्युपर्यग्निमतिहरति तदेवास्यानुप्रहृतभाजनं भवति तमग्नीधे प्रयच्छति तमग्नीन्धीदधाती" (श० ब्रा० ३।४।३।२२) त्यादि श्रुतेः ।

शाखान्तरे "यदातिथ्यायां बर्हिस्तृणाति तदुपसदां तदग्नीषोमीयस्यचे" ति बर्हिः साधारण्येन प्रस्तरसाधारण्यमनुवदति "तदेवास्यानुप्रहृतभाजनं भवती"त्यर्थान्तरेणानुप्रहरणमनुगृह्यन्नग्नीधः प्रदानार्थानां प्रतिपत्तिरन्तापच्छिन्नेष्वपि भवत्येवेति दर्शयति । तं प्रस्तरमग्नीधे प्रयच्छति तं प्रस्तरमर्थान्निदधात्युपसदर्थम् ।

आथर्वणसूत्रे—आग्नीध्रस्ता कुशैरुदानयति ता उपस्पृश्य सोममाप्याययन्तीति ।

आध्वर्यवपद्धतिः ।

स्पर्शः । सर्रुवाहुतिः । धुरि निधानम् । पिष्टलेपाहुतिः । वेदविमोकः । पत्ने योक्त्रस्य । आवेदेस्तरणम् । न बर्हिर्होमः (स्तृतैव वेदिः स्यात्) । प्रणीताविमोकः । राक्षसभागः । भागावेक्षणप्राशने । (१)इत्यातिथ्या ।

(सुब्रह्मण्याह्वानादिकम् ।)

ततः सुब्रह्मण्याह्वानम् । अध्वर्युः शालायाः पूर्वद्वारे उपविश्य सुब्रह्मण्यां च (२)प्रेष्यति सुब्रह्मण्ये सुब्रह्मण्यामाह्वयेति ।

सुब्रह्मण्यः पूर्वद्वारस्य दक्षिणद्वारबाहोः पुरस्तादन्तर्वेदिदेशे तिष्ठन्नाह्वयति, तं पत्नीयजमानावन्वारभेयाताम् ।

औद्गात्रपद्धतिः ।

(सुब्रह्मण्याह्वानम् ।)

अथ सुब्रह्मण्याह्वानम् । तत्राध्वर्युप्रैषानन्तरं सुब्रह्मण्यः पत्नीशालायाः पूर्वद्वारस्य दक्षिणस्थूणायाः पुरस्तात्सौमिकवेद्यन्तःप्रदेशे प्राङ्मुखस्तिष्ठन् यजमानेन पत्न्या चान्वारब्धो मध्यमस्वरेण सुब्रह्मण्याह्वानं कुर्यात् । ब्रह्मा च दक्षिणतस्तिष्ठेत् । सुब्रह्मण्य आह—सुब्रह्मण्योमिति ब्रह्मश्रीसाम्नः आदित्य ऋषिः सम्पात् छन्दः इन्द्रो देवता 'ब्रह्म च वा इदमग्रे सुब्रह्मचास्ता'मिति विधायकब्राह्मणं ज्योतिष्टोमे विनियोगः ।

---

(१) दीक्षणीया-प्रायणीया-तिथ्या-र्नीषोमीयादीनिश्पशुयागान्सोमयागं च प्रकृत्याम्नायते—"स्वर्गकामो ज्योतिष्टोमेन यजेत"(आ०श्रौ०१०।२।१)ति। तत्र चिन्त्यते किं सर्वयागानां फलसम्बन्धेन प्राधान्यमुत सोमयागस्यैवेतरेषां तदङ्गत्वमिति। तत्र आग्नेयादिपक्षगतिदर्शपूर्णमासनामवज्योतिष्टोमनाम्नः सोमरक्षपाते हेत्वभावेन राजसूयनामवत्प्रकृतसर्वयागसाधारणत्वात्, सोमसमानानां दाक्षणीयातिथ्याग्नीषोमीयानामप्यस्ति मुख्यत्वमिति पूर्वः पक्षः । सोमयागपक्षपाते हेतुपद्भावान्न दीक्षणीयादीनां मुख्यत्वम् । "ज्योतींषि स्तोमा यस्य यज्ञस्य सोऽयं ज्योतिष्टोमः" इति तद्व्युत्पत्तिः । अत एव ब्राह्मणम् "त्रिवृत्पञ्चदशः, सप्तदशः, एकविंशः, एतानि वाव तानि ज्योतींषि य एतस्य स्तोमाः" (तै० ब्रा० १।८।११) इति । स्तोमानां ज्योतिष्ट्वं यज्ञप्रकाशकत्वम् । न चेष्टयः पशवो वा त्रिवृदादिस्तोमयुक्ताः प्रतिभासन्ते । तस्मात्-ज्योतिष्टोमनाम्ना सोमयागानामेव फलसम्बन्धावगमादफला इष्टिपशवो न मुख्या इति सोमयागानामेव प्राधान्यमितरेषामङ्गत्वमिति (पू० मी० ४।४।१२) सिद्धान्तः ।

तथा च कात्यायनः "तदङ्गमितरत्सममिव्याहारप्रकरणाभ्यां यजतयश्चफलयुक्तास्तदङ्ग" (१।२।३-४) मिति ।

(२) अत्र सुब्रह्मण्याप्रैषः आगन्तुत्वात् "प्राकृतं च विकृता" (का० श्रौ० १।९।४) विति न्यायाच्च । एतच्च सुब्रह्मण्याह्वानं शालायाः पुरस्तादन्तर्वेदिदेशे पत्नीयजमानयोरन्वारब्धयोभवतीति छन्दोगसूत्रे लाट्यायनः १, ३, १, ।

अ[illegible]तः ।

(यजमानस्य मन्त्रवाचनम् ।)

ब्राह्मणानन्तरं यजमानं मन्त्रान्वाचयति ते च यथा ।

"सासि सुब्रह्मण्ये तस्यास्ते पृथिवी पादः ।
सासि सुब्रह्मण्ये तस्यास्तेऽन्तरिक्षं पादः ।
सासि सुब्रह्मण्ये तस्यास्ते द्यौः पादः ।
सासि सुब्रह्मण्ये तस्यास्ते दिशः पादः ।
परोरजास्ते पञ्चमः पादः ।
सा न इषमूर्जं धुक्ष्व । वीर्यमन्नाद्यं धेहि" ।

"सुब्रह्मण्योपह्वयस्वेति" दम्पती उक्त्वा यथागतं गच्छेताम् । इति सुब्रह्मण्याह्वानं सर्वत्र ।

औदुम्बरपद्धतिः ।

२ १ २ १ २ १ ८ २ १ २ १८ २
सुब्रह्मण्योम् । सुब्रह्मण्योम् । सुब्रह्मण्योमिन्द्रागच्छ, हरिव आगच्छ,
१८८ २८ ८ १ २ ८८
मेधातिथेर्मेष, वृषणस्वस्य मेने ।
१८ ८ २८८ ८ १८ २ ८ १८ २ ८
गौरावस्कन्दिने(,न्न)हल्यायै जार, कौशिक|ब्राह्मण, गौतम ब्रुवाण ।
८ १८ ८ २ १८२८ १ २८ १८ २ १८ २ १८
त्यहे सुत्यामागच्छ मघवन्,देवा ब्रह्माण आगच्छतागच्छतागच्छत॥५॥

(यजमानस्य मन्त्रवाचनम् ।)

एवं त्रिराहूय यजमानं वाचयति । सासि सुब्रह्मण्ये तस्यास्ते पृथिवी|पाद इति ब्रूहि । सासि सुब्रह्मण्ये तस्यास्तेऽन्तरिक्षं पाद इति ब्रूहि,सासि सुब्रह्मण्ये तस्यास्ते द्यौः पाद इति ब्रूहि । सासि सुब्रह्मण्ये तस्यास्ते दिशः पाद इति ब्रूहि । परोरजस्ते पञ्चमः पाद इति ब्रूहि । सा न इषमूर्जन्धुक्ष्वेति ब्रूहि । वीर्यमन्नाद्यं धेहीति ब्रूहीति ब्रूहि । एवं सप्तपद्यानि यजमानं वाचयित्वा अप उपस्पृशेत् । ततो यजमानः 'सुब्रह्मण्योपह्वयस्वे'त्युक्त 'उपह्वत' इत्यनुज्ञां दद्यात् । पत्न्यपि 'सुब्रह्मण्योपह्वयस्वे'त्युक्त 'उपह्वते'त्यनुज्ञां दद्यात् । एतस्मिन् काले यजमानः सुब्रह्मण्याय नारिकेलाद्युपहारं दद्यात् ।

(सुब्रह्मण्यायाः स्वरनिरूपणम् ।)

अथ सुब्रह्मण्यायाः स्वर उच्यते । वचनान्येकादश सुब्रह्मण्यायास्तत्राद्यमद्वितीये चतुरक्षरे पञ्चमषष्ठे सप्तपञ्चेति दशमैकादशे(दश) नवेति षड् शेषाणि तस्याः स्वरे नियम उच्चस्यादेशो नीचमनादिष्टं प्रथमस्य वचनस्यान्त्यमुच्चं द्वितीयेऽन्त्यवर्ज्यं तृतीयान्त्यवर्ज्यं तृतीये चतुर्थात्प्र-

आध्वर्यवपद्धतिः ।

(प्रवर्ग्यप्रयोगः ।)

प्रवर्ग्योपसदावतः। तत्र प्रवर्ग्यो विकल्पेन (१) प्रथमयज्ञे। करणपक्षे इत्थं

(१) "न प्रथमयज्ञ" (का०श्रौ० २६।७।५३) इत्युक्तत्वात्प्रथमयज्ञोऽप्रवर्ग्यः । प्रथमयज्ञशब्देन प्रथमाहार उच्यते । तेनायमर्थः-अप्रवर्ग्यं प्रथमाहारे उपसदेव वा भवति वा तत्रापि प्रवर्ग्यः। "ग्रीवा वै यज्ञस्योपसदः शिरः प्रवर्ग्यस्तस्माद्यदि प्रवर्ग्यवान् भवति प्रवर्ग्येण प्रचर्यार्थोपसद्भि प्रचरन्ती" (श० ब्रा० ३।४।४।१) त्यादिश्रुतेः। "तस्माद्यदि प्रवर्ग्यवान्" = प्रवर्ग्यार्हः क्रतुः स्यादिति । द्वितीयादिप्रयोगेऽवकाश्यस्य भवति । ततः प्रवर्ग्येण प्रचर्यार्थानन्तरं उपसद्भिश्चरन्ति । यदि त्वप्रवर्ग्यार्हः क्रतुः स्यात्प्रथमाहारो वा, अनवकाश्यस्य वा, ततः पाठक्रमादेवातिथ्यानन्तरमुपसद्भिश्चरन्तीति लभ्यते, किमर्थं पुनरिदमुच्यते "प्रवर्ग्येण प्रचर्यार्थोपसद्भिः प्रचरन्ती" (श० ब्रा० ३।४।४।१) ति । उत्पत्त्यर्थं तावन्न भवति "तस्मादुपसद्भिर्यजत" (श० ब्रा० ३।४।४।५) इत्यस्योत्पत्तिवाक्यस्योत्पत्तिवाक्यत्वात् । नापि क्रमार्थं "स यदैतदातिथ्येन प्रचरत्यथ प्रवर्ग्येण चरिष्यन्पुरोपसद" (श० ब्रा० १४।१।३।१) इति क्रमस्य सिद्धत्वात् । एवं तर्ह्यनाम्नाधीतस्य प्रवर्ग्यस्य ज्योतिष्टोमप्रकरणेऽयं पुनः पाठः कथं नाम प्रकरणेन ज्योतिष्टोमाङ्गं विज्ञायेतेति ।

ननु च 'सयदैतदातिथ्येने'त्यनेनैव वाक्येनान्तः क्रतवनुष्ठाने सिद्धे क्रमाज्ज्योतिष्टोमाङ्गं भविष्यति नार्थः पुनः पाठेन । नैतदेवम् । असति ह्यस्मिन्पुनः पाठे सहस्रदक्षिणादिष्वेव क्रतुषु विशेषविहितः सन् प्रवर्ग्यः पुरोपसदः क्रियते न ज्योतिष्टोमे, एतस्मात्तु केवलज्योतिष्टोमप्रकरणे पुनः पाठादुपपन्नः प्रकृतेरप्यङ्गभावः । "प्रवर्ग्योपसदावत" (का० श्रौ० ८।२।१४) इति सूत्रस्याप्येतदेव प्रयोजनं "उपसदा चरिष्यँश्चरिष्यन्नित्यने"नैवावसरविधानसिद्धेः प्रथमाहारश्च विकल्पेनाग्निष्टोमस्य भवति विकल्पेनातिरात्रस्यापि । तत्राप्यग्निष्टोमस्य प्रथमाहारपक्षे प्रवर्ग्यस्य विकल्पः । 'तैत्तिरीयादोना''मग्निष्टोमे प्रवृणक्ती" (आप०श्रौ०१८।१२।१०)ति पुनर्विधानमस्ति तद्यदि तावद्द्वितीयादिप्रयोगविषयं कल्प्यते ततः प्रतिषेधाभावात्पूर्ववचनेनैव सिद्धेर्विधानानर्थक्यं भवति तस्मादाद्यप्रयोगविषयमेवैतत्प्रतिषिद्धप्रतिप्रसवार्थं तेनाग्निष्टोमप्रथमप्रयोगे विकल्पः स च व्यवस्थितो वचनान्तरवशात् । तथा हि श्रूयते "कामं तु योऽनूचानः श्रोत्रियः स्यात्तस्य प्रवृञ्ज्यादि" (गो० ब्रा० उ० २।६) (कौ० ब्रा० ८।३) (आप० श्रौ० ११।२।१०) ति । तेनाग्निष्टोमप्रथमप्रयोगेऽनूचानस्य नित्यं प्रयोगः । अन्येषां नित्यमप्रयोगः । अतिरात्रप्रथमाहारे तु सर्वेषामप्रयोग एव प्रतिप्रसवाभावात् । विहितश्चातिरात्रस्यापि पाक्षिकः प्रथमाहारः शाखान्तरे । "तस्मात्प्रथमं यजमानोऽतिरात्रेण यजेत" (आप० श्रौ० १०।२।४) ति। केचित्त्वतिरात्रे निषेधः प्रतिप्रसवाभावादग्निष्टोमे विधिरित्येवं विकल्पमाहुः । शाङ्खायनेऽपि—"अप्रवर्ग्यः प्रथमयज्ञो विकल्पः श्रोत्रियस्ये" (९।१।९।१—२)ति । तथा—"सहस्रे प्रवृञ्ज्यात्, सर्ववेदसे प्रवृञ्ज्यात्, विश्वजिति सर्वपृष्ठे प्रवृञ्ज्यात्, वाजपेये राजसूये प्रवृञ्ज्यात्, सत्रे प्रवृञ्ज्यात्सर्वं वै सत्रꣳ सर्वमेष एतान्यस्य प्रवर्जनान्यतो नान्यत्रे" (श० ब्रा० १४।२।२।४७) ति श्रूयते । अंशुग्रहे प्येवंविधैव श्रुतिरस्ति "स वा एष न सर्वस्यैव गृहीतव्यः, सहस्रे गृहीतव्य" (श० ब्रा० ४।६।१।१४-१५) इत्यादि । तत्र हि सूत्रितम्—"सत्र-सहस्र-सर्ववेदस-वाजपेय-राजसूय-विश्वजित्-सर्वपृष्ठेषु ग्रहणमवकाश्यश्चेत्" (का० श्रौ० १२।५।१३) इति । एवमत्रापि वक्तव्यं सत्रसहस्रादिषु

आध्वर्यवपद्धतिः ।

प्रयोगः । उपसदा चरिष्यंश्चरिष्यन्प्रवर्ग्येण चरति सप्रवर्ग्ये(१)ऽपिहितद्वारे प्रवर्ग्यचरणम् । पत्न्यदर्शनमननूक्तिभिश्च यावदुक्तम् । शान्तिकरणमाद्यन्तयोः । तच्च ऋचं वाचमित्यध्यायपाठः ।

औद्गात्रपद्धतिः ।

भूति वचनादादावुच्चे द्वे प्राग्दशमाद्दशमे चतुर्थपञ्चमषष्ठानि प्रथमतृतीये षष्ठसप्तमे चैकादशे वचनानामादावन्ते च त्रिरुक्तमागच्छतेत्येतावदन्ते तत्रान्त्यस्य पूर्वयोरेकीभावित्वान्नीचमुच्चौ भवतीति ।

(अथ प्रवर्ग्यः ।)

अथ प्रवर्ग्यकर्मोच्यते । तत्र प्रस्तोता अध्वर्युणा प्रेषितः पूर्ववत्पश्चाद्गार्हपत्यस्योपविश्य प्रवर्ग्यसामानि गायेत् ।

हौत्रपद्धतिः ।

(अथ घर्मः)

अप्रवर्ग्यः प्रथमयज्ञो विकल्पः श्रोत्रियस्य । ततो होताध्वर्युवेदोक्तं (य० सं० ३६।१-२४) ऋचं वाचमित्यध्यायं शान्त्यर्थं पठति ।

प्रवृञ्ज्यादवकाश्यश्चेदिति । तेनायमर्थः—अवकाश्यश्चेद्यजमानस्तदा सत्रादिषु प्रवर्ग्यं कुर्यान्नान्यत्रेति । श्री अनन्तयाज्ञिकास्त्वेवमाहुः—अवकाश्यस्य क्रतुमात्रे प्रथमप्रयोगवर्जिते प्रवर्ग्यः अनवकाश्यस्य पुनः सत्र-सहस्रादावेव नान्यक्रताविति । आपस्तम्बः—"अग्निष्टोमे प्रवृणक्ति, नोक्थ्ये प्रवृञ्ज्यात्, विश्वजिति सर्वपृष्ठे प्रवृणक्ती" (१९।१२।१०-१२) ति । तथा च प्रवर्ग्यण प्रचर्योपसदा चरत्येतद्वा विपरीतं न प्रथमयज्ञे प्रवृञ्ज्यात्प्रवृञ्ज्याद्दुर्ब्राह्मणस्य ब्रह्मवर्चसकामस्येत्येके । योऽनूचानः श्रोत्रियस्तस्य प्रवृञ्ज्यादि"ति बह्वृचब्राह्मणम् (कौ० ब्रा० ८।३)"मिति । प्रथमयज्ञेऽतिरात्रप्रतिषेधः "अग्निष्टोमे प्रवृणक्ती"ति श्रुतेः । दुर्ब्राह्मणस्तु—

वेदो वेदिश्च विच्छिन्नावुभौ यस्य त्रिपूरुषम् ।
दुर्ब्राह्मणः स विज्ञेयः पुनर्भूतनयोऽपि च ॥
न सोमं पीतवान्यस्य पिता वापि पितामहः ।
दुर्ब्राह्मणं समाचष्टे कर्कः शाखान्तरश्रुतेः ॥
पक्षमङ्गीकरोत्येनं मन्त्रब्राह्मणभाष्यकृत् ।

(त्रि० मं० १।१३४-१३६) इति । अनूचानः प्रवचने साङ्गेऽधीती (अ० को० २।७।१०) ति कोषः ।

अत्र मीमांसा—न प्रवृञ्ज्यादाधयज्ञे क्रता सोऽनुष्ठितावुत ।
प्रतिषेधः क्रतौ युक्त उक्ताङ्गस्याऽऽधयज्ञता ।
प्रवृणक्त्युपसद्भ्यः प्रागिति वाक्यात्क्रतौ विधेः ॥
आद्यप्रयोगे प्राथम्यान्निषेधः क्वचिदेव सः ।

(न्या० मा० ३।३।१७) इति । विस्तृतिस्त्वत्र शाबरभाष्यशास्त्रदीपिकादौ द्रष्टव्या ।

(१) "अपिहितद्वारे" इति शाखान्तरात् ।

आध्वर्यवपद्धतिः ।

(शान्तिपाठः ।)

ॐ ऋचं वाचम्प्रपद्ये मनो यजुः प्रपद्ये सामप्राणम्प्रपद्ये चक्षुः श्रोत्रम्प्रपद्ये ।

वागोज॰ सहौजो मयि प्राणापानौ (३६।१) ॥
यन्मे छिद्रञ्चक्षुषा हृदयस्य मनसो वाति तृणम्बृहस्पतिर्म्मे तद्दधातु।
शन्नो भवतु भुवनस्य यस्पतिः (३६।२) ॥
भूर्भुवः स्वः तत्सवितुर्व्वरेण्यम्भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् (३६।३) ॥
कया नश्चित्रऽआभुवदूती सदावृधः सखा ।
कया शचिष्ठयाऽवृता (३६।४) ॥
कस्त्वा सत्यो मदानां मर्ठ॰हिष्ठो मत्सदन्धसः ।
दृढा चिदारुजे वसु (३६।५) ॥
अभी षु णः सखीनामविता जरितॄणाम् ।
शतम्भवा स्यूतिभिः (३६।६) ॥
कया त्वन्नऽऊत्याभिप्रमन्दसे वृषन् ।
कया स्तोतृभ्य आभर (३६।७) ॥
इन्द्रो विश्वस्य राजति ।
शन्नोऽअस्तु द्विपदे शञ्चतुष्पदे (३८।८) ॥
शन्नो मित्रः शं वरुणः शन्नो भवत्वर्य्यमा ।
शन्नऽइन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः (३६।९) ॥
शन्नो वातः पवताँ शन्नस्तपतु सूर्य्यः ।
शन्नः कनिक्रदद्देवः पर्जन्यो अभिवर्षतु (३६।१०) ॥
अहानि शम्भवन्तु नः शर्ठ॰ रात्रीः प्रतिधीयताम् ।
शन्नऽइन्द्राग्नी भवतामवोभिः शन्नऽइन्द्रावरुणा रातहव्या ।
शन्नऽइन्द्रापूषणा वाजसातौ शमिन्द्रासोमा सुविताय शंय्योः(३६।११)
शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये ।
शंय्योरभिस्रवन्तु नः (३६।१२) ॥
स्योना पृथिवि नो भवानृक्षरा निवेशनी ।
यच्छा नः शर्म्म सप्रथाः (३६।१३) ॥
आपो हि ष्ठा मयोभुवस्तानऽऊर्ज्जे दधातन ।
महे रणाय चक्षसे (३६।१४) ॥

आध्वर्यवप्रकृतिः ।

यो वः शिवतमो रसस्तस्य भाजयतेह नः ।
उशतीरिव मातरः (३६।१५) ॥
तस्माऽअरङ्गमामवो यस्य क्षयाय जिन्वथ ।
आपो जनयथा च नः (३६।१६) ॥

द्यौः शान्तिरन्तरिक्षꣳ० शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः ।

वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्व्वꣳ० शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि (३६।१७) ॥

दृते दृꣳ० ह मा मित्रस्य मा चक्षुषा सर्व्वाणि भूतानि समीक्षन्ताम् ।
मित्रस्याहꣳचक्षुषा सर्व्वाणि भूतानि समीक्षे ।
मित्रस्य चक्षुषा समीक्षामहे (३६।१८) ॥

दृते दृꣳह० मा ज्योक्ते सन्दृशि जाव्यासꣳज्योक्ते सन्दृशि जाव्यासम् (३६।१९) ॥

नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्च्चिषे ।
अन्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यꣳ० शिवो भव(३६।२०)
नमस्तेऽअस्तु विद्युते नमस्ते स्तनयित्नवे ।
नमस्ते भगवन्नस्तु यतः स्वः समीहसे (३६।२१) ॥
यतो यतः समीहसे ततो नोऽअभयङ्कुरु ।
शन्नः कुरु प्रजाभ्यो भयन्नः पशुभ्यः (३६।२२) ॥
सुमित्रिया नऽआपऽओषधयः सन्तु ।
दुर्म्मित्रियास्तस्मै सन्तु योऽस्मान्द्वेष्टि यञ्च वयन्द्विष्मः (३६।२३)॥
तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ।
पश्येम शरदः शतञ्जीवेम शरदः शतꣳ० शृणुयाम शरदः शतम्प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतम्भूयश्च शरदः शतात्(३६।२४)॥

(ब्रह्मोपवेशनपरिस्तरणे)

ब्रह्मा दक्षिणेन दक्षिणाग्निं वापरेण धर्मं (१)समन्त्रमास्ते ।

---

(१) अत्र शाङ्खायनश्रौतकल्पे विशेषः । "कर्मादौ देशपृथक्त्वे च" (४।७।७) इति । अस्यार्थः-इष्टिपशुबन्धेषु सोमे च यो यः कर्मादिर्यच्च देशपृथक्त्वमेकस्यैव कर्मणो देशभेदेनानुष्ठानं तत्र आसनसंस्कार उपवेशनं जपश्चेति भवति । अत्र कारिकाः—

आसनस्य च संस्कार आसनं च यथोदितम् ।
कर्मादौ देशभेदे च तदेवेदं प्रपञ्च्यते ॥ १ ॥
साक्ष्यं चेति च शब्देन साक्ष्यस्याप्यासनस्य च ।
साहचर्यं सुयज्ञेन सर्वत्र प्रतिपादितम् ॥ २ ॥

आध्वर्यवपद्धतिः ।

आवृत्तेनैव मन्त्रेण होमे याज्यान्तवर्जिते ।
सर्वत्रासनसंस्कारः कात्यायनमतं यथा ॥ ३ ॥
इष्टितन्त्रे पशोस्तन्त्रे यास्तासां नैतदिष्यते ।
युक्तमन्यत्र सर्वत्र श्रुत्यन्तरनिदर्शनात् ॥ ४ ॥
न कुर्याद् गार्हपत्यस्य आधानेऽथेतरस्य तु ।
इध्मेनैव सहासीत दक्षिणाग्नेर्न विद्यते ॥ ५ ॥
पूर्वेद्युः पुनराधेये कालभेदात्प्रकीर्त्तितः ।
शेषमाधानवज् ज्ञेयं विशेषो नानयोर्यतः ॥ ६ ॥
चातुर्मास्येषु यो वाच्यो विशेषः स इहोच्यते ।
प्राकृतेपूच्यमानस्तु वैकृतेष्वातिदेशिकः ॥ ७ ॥
आ विमोकात्प्रणीतानां कृतः सान्तपनोयकः ।
न कार्यो गृहमेधीये पूर्णदर्वे तथैव च ॥ ८ ॥
पित्र्यायामादितो वेदेः क्रियायामग्निसंचरे ।
विपर्यये च कर्तव्यस्त्र्यम्बकेष्वपरस्तथा ॥ ९ ॥
उखासम्भरणे स्रुवभ्रे करणे धूपपाकयोः ।
अच्छदने सहोद्वापे महावीरा उखासमाः ॥ १० ॥
निर्ऋतिस्तम्बयजुषोः सीरस्य च नियोजने ।
सोमक्रयादावासीत पदे देशे क्रयस्य च ॥ ११ ॥
परिधाने च शालायां तूष्णीमेव कृतो यतः ।
चयने गार्हपत्यस्य चितिप्रणयने तथा ॥ १२ ॥
चयनादौ पुरीषादौ कुम्भक्षेपे तु वेक्षते ।
प्रवर्ग्यादौ च सर्वत्र अनुव्रज्यासनं ततः ॥ १३ ॥
अनिमित्तेऽपि कर्तव्यो यत्र रात्रिव्यवायिका ।
आदौ तन्तमनुव्रज्य घर्मोत्सादे समुक्षणे ॥ १४ ॥
अग्निप्रणयने चैवमुक्तोऽप्रतिरथे यथा ।
वैश्वानरस्य शालायां मारुतानां च तन्त्रतः ॥ १५ ॥
पुनरन्वेत्य होमादौ देशभेदादिहासनम् ।
स्वासनस्थो हविर्धाने नभ्यस्थे चेदनावृते ॥ १६ ॥
आदौ नोपरवाणां तु प्रविष्टो यदि नभ्ययोः ।
आगारमासनस्यैक्यात्तूष्णीमेव सकृत्क्रिया ॥ १७ ॥
औदुम्बर्यास्तु संमाने संस्कारः स्यात्समन्त्रकः ।
आग्नीध्रीये धिष्ण्यकारे सदस्यपि सकृत्क्रिया ॥ १८ ॥
स्वस्थान एव संस्कारो मार्जालीयेऽथ तच्चये ।
एष एव विधिर्दृष्टस्तुल्यत्वाद्देशभेदयोः ॥ १९ ॥
कृतो यद्यपि वेद्यर्थे व्यवधानात्पुनः क्रिया ।
अग्नेः सोमस्य नयने अग्नीधः शरणे पुनः ॥ २० ॥
स्वासने चासनं कृत्वा पशोरादौ पुनः क्रिया ।

आध्वर्यवपद्धतिः ।

आहवनीयस्यैव वा परिस्तरणम् ।

(पात्रासादनम् ।)

परिधर्म्यमौदुम्बरम् । मौञ्जं त्रिवृद्ब्रह्मण्यम् । बाल्वजं विवानमास-न्द्यौ(१)दुम्बर्या स्कन्धमाद्यायाः (२)पूर्वेण गार्हपत्यं प्राचः कुशानास्तीर्य तेषु पात्रासादनं द्वन्द्वम्। उपयमनीं महावीरं परीशासौ पिन्वने रौहिणक-पाले, रौहिणहवन्यौ च स्रुचावनुत्कीर्णे, (३)स्थूणामयूखं, धृष्टी, शतमाने मुञ्जप्रलवान्विकङ्कतशकलान्विर्ढ०शति प्रादेशमात्रान्, स्रुवं, मुञ्ज-वेदं, धवित्राणि, परिधींश्च, (४)रज्जुसन्दानमासन्दीं कृष्णाजिनमभ्रिर्ढ-सिकताः खरार्थास्त्रिषु शरावेष्वर्थवच्च पात्री पवित्रच्छेदनानि, पवित्रे उपवेषश्च, अग्निहोत्रहवणीꣳशूर्पं उपसर्जनीपात्रमुदकं पिष्टान्युपशया महावीरावौदुम्बरी समिच्च । वज्रो मौञ्जः, कूर्चः (इतरौ महावीरौ) आज्यस्थाली प्रभूतमाज्यं चेति ।

अहतश्चेद्बर्हिस्तन्त्रे योऽपि तन्त्रात्र वा यदि ॥ २१ ॥
ततः पशुपुरोडाशश्रपणे संनिधानतः ।
कुर्यात्पश्चिमरात्रे च शालायामेव चासनम् ॥ २२ ॥
आज्यग्रहण आग्नीध्रे स्वदेशे च पुनस्ततः ।
कार्यो निवापः सोमस्य हविर्धाने तथास्तवे ॥ २३ ॥
सदः प्रविश्य कर्तव्यः सर्वत्रैव प्रसर्पणे ।
होमे साक्ष्यं सदा कुर्यादूबाहृच्यस्याविरोधतः ॥ २४ ॥
मानसादौ च कर्तव्यो रथचक्रे तृणं विना ।
इष्ट्यादौ सर्वहोमादौ पश्वादौ च प्रकीर्तितः ॥ २५ ॥

(१) आसन्दीं प्रकृत्य "औदुम्बरी भवति । अठ० सदश्ना भवति बाल्वजीभी रज्जु-भिर्युता भवती" (श० ब्रा० १४। १।३।९।११) ति श्रुतेः । 'परिधर्म्यमौदुम्बरमि' (का० श्रौ० २६।२।६)त्यनेनासन्द्या अप्यौदुम्बरात्वे सिद्धे अरत्निमात्राङ्गीत्वलाभाय पुनरौदुम्बर्या इत्युक्तम् ।

(२) गार्हपत्यं पूर्वेण = गार्हपत्यात्पूर्वस्यां दिश्यदूरे प्राचः = प्रागग्रान्कुशानास्तीर्य द्वंद्वं पात्रासादनं = द्वाभ्यां द्वाभ्यां पात्राभ्यापात्राणामासादनं कर्तव्यमित्यर्थः । "अग्नेण गार्हपत्यं प्राचः कुशान्त्सꣳस्तीर्य द्वंद्वं पात्राण्युपसादयत्युपयमनीं महावीरमि" (श० ब्रा० १४।१।३।१)त्यादि श्रुतेः ।

(३) गोबन्धनार्था स्थूणा । अजाबन्धनार्थः शङ्कुः कीलको मयूखः । वत्सबर्करब-न्धनार्थौ च द्वौ मयूखौ शंकू भवत (१९।६।१४-१६) इत्यापस्तम्बः ।

(४) केचिदजाया अपि सन्दानमिच्छन्ति । एवं प्रतिप्रस्थाताऽजामि(का० श्रौ० २६।५।८)त्येव शब्देन तस्यापि लाभात् । अपरे तु प्रयोजनाभावान्नेच्छन्ति ।

आध्वर्यवपद्धतिः ।

तूष्णीं पवित्रकरणम् । समन्तं प्रोक्षणीः सꣳस्कृत्यो(१)द्यम्योत्था याह ब्रह्मन्प्रचरिष्यामो होतर्धर्ममभिष्टुहि, प्रस्तोतः (२)सामानि गायेति ।

(महावीरप्रोक्षणं त्रिः ।)

ॐ प्रचरेति ब्रह्मानुज्ञातो यमाय त्वेति महावीरं प्रोक्षति ।

हौत्रपद्धतिः ।

ततो होताऽऽचम्य पूर्वया द्वारा शालां प्रपद्य आसाद्यमानेषु महावीरपात्रेषु उत्तरेण गत्वा खरस्य पश्चादुपविश्य "होतरभिष्टुही"ति प्रेषितः "ॐप्रचरे"ति ब्रह्मणोक्ते (३)मकारान्तप्रणवामेकैकामनवानमभिष्टौति मध्यमया वाचा ।

"ॐ ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वो३म् ।

ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो वेन आवः स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवो३म् ।

ब्रह्म यज्ञानं प्रथमं पुरस्ताद्विसीमतः सुरुचो व्वेन आवः स बुध्न्या उपमा अस्य व्विष्ठाः सतश्च योनिमसतश्च व्विवो३म्(४) ।

इयं पित्रे राष्ट्र्येत्यग्रे प्रथमाय जनुषे भूम नेष्टास्त्स्या एतं सुरुचं ह्वारमह्यं घर्मं श्रीणन्ति प्रथमस्य धासो३म् ।

अभित्यं देवं सवितारमोण्योः कविक्रतुमर्चामि सत्यसवं रत्नधामभि प्रियं मति कविम् ।

---

(१) संस्कृत्येत्युपदेशात्कुशैः कुशौ छित्वाऽग्निहोत्रहवण्यामपः कृत्वा सव्यहस्ते कृत्वा तासामुदिगनं प्रोक्षणं च कृत्वेत्येतावल्भ्यते ।

(२) प्रस्तोतुः प्रैषः शाखान्तरात् ।

(३) होता ब्रह्मणानुज्ञातो ब्रह्मयज्ञानमित्याद्या एकोत्तरशतसङ्ख्याका ऋच अभिष्टौति मध्यमस्वरेणैकस्वयेंण । तास्वृक्षु पूर्वार्धचैस्यान्तिमाक्षरेण सहोत्तरार्धचैस्यादिमवर्णस्य यथान्यायं (सन्ध्यक्षराणां तालुस्थाने आ३ इकारो भवतः, ओष्ठस्थाने आ३ उकारो भवतः, अन्यानि प्रकृत्याक्षराणि, एकारौकारौ च प्रगृह्यौ, याज्यान्ते, विसर्जनीयो रिफितो रेफमापद्यते, लुप्यतेऽरिफितः, अनुस्वारं मकारः, अन्यानि प्रकृत्या व्यञ्जनानि औकारो वषट्कारे चतुर्मात्रः, षकाराच्चोत्तरोऽकारः, प्रकृत्या वोभौ, पूर्वो वा प्रकृत्या, प्रकृत्याकार इति जातूकर्ण्यः, वार्हतराथन्तरं वषट् कुर्यात्पुरस्ताद्दीर्घमुपरिष्टाद्ध्रस्वम्, उपरिष्टाच्च ये यजामहादेवतादेशनं सपुरोऽनुवाक्ये, सप्रैषे तु न विद्यते । शां० श्रौ० सूत्र १।२।४-२०) सन्धिं कृत्वावसानं विनैकैकामृचं पठेत् । ऋगन्ते ऋगन्ते मकारान्तं प्रणवं कृत्वाऽवसानं कुर्यात् ।

(४) "त्रिप्रभृतिष्वृग्गणेषु प्रथमोत्तमयोस्त्रिर्वचनमन्यत्र जपेम्य (शां०श्रौ० १।१।१८) युक्तेरत्र ब्रह्मयज्ञानमित्यस्यास्त्रिरावृत्तिः ।

आध्वर्यवपद्धतिः ।

(१)प्रतिमन्त्रं वा वाक्यभेदादुपविश्य "ॐ यमाय त्वा प्रोक्षामि" "ॐ मखाय त्वा प्रोक्षामि" "ॐ सूर्यस्य त्वा तपसे प्रोक्षामि" (शु० य० सं० ३७।१०) ।

(स्थूणानिखननं खरयोर्निवपनं च)

परिधिम्यं च तूष्णीं प्रोक्षति । नर्यशंस्ययोरन्तरा सपवित्रास्ता निदधाति। प्रतिप्रस्थाता पूर्वया द्वारा स्थूणामयूखं निर्हृत्य दक्षिणतो दक्षिणद्वारस्य पूर्वद्वार्यायाः स्थूणां तदुत्तरतो मयूखं निखनति होतुः सन्दर्शने(२) गार्हपत्याहवनीयौ उत्तरेण खरौ (३)निवपति तत्र पश्चिमखरे पञ्च भूसंकारान् कृत्वा प्रथमशरावस्थाः सिकताः निवपति पूर्वस्मिन्खरे तूष्णिख्याभ्युद्य द्वितीयशरावस्थाः सिकता निवपति दक्षिणतोऽनुमित्युच्छिष्टखरम् । अत्राप्युल्लिख्याभ्युद्य तृतीयशरावस्थाः सिकता निवपति पूर्वेणाहवनीयठं सम्राडासन्दीं पर्याहृत्य दक्षिणतः प्राचीमासादयति राजासन्द्या उत्तरतः, कृष्णाजिनमस्यामास्तृणाति तस्मिन्नभ्युपशये निदधाति महावीरौ चावच्छादयेद्वा, अन्यो वा परिधिम्यर्योजनमध्वर्या कालसम्मतेः ।

हौत्रपद्धतिः ।

ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः (४)क्रपास्वो३म् ।

---

(१) भिन्नानि खेतानि यमाय त्वेत्यादीनि त्रीणि वाक्यानि नैकमतो वाक्यभेदात्प्रतिवाक्यं प्रोक्षणं युक्तम् । तथोक्तं शाङ्खायने "मन्त्रपृथक्त्वात्कर्मपृथक्त्व" (१।२।३४) मिति ।

(२) अत्राहापस्तम्बः—दक्षिणेन दक्षिणं द्वारं मेथीं निहन्ति होतुः समीक्षाण एतस्यैव द्वारस्य पूर्वस्यै द्वार्यायै दक्षिणतो वत्साय शङ्कुमेतस्यैवापरस्यै द्वार्यायै दक्षिणतोऽजाया अभ्यन्तरमुत्तरतो वर्करायेति । (१५।६।१३—१६) अतस्स्थूणां गोबन्धनार्थां द्वारं दक्षिणतो निखनति तस्यैव द्वारस्यापरद्वार्यां दक्षिणतोऽजाबन्धनार्थं मयूखमिति । तदुत्तरतो वर्कराय शङ्कुं पूर्वद्वार्यां दक्षिणतो वत्सस्य शङ्कुमिति ।

(३) एको गार्हपत्यस्योत्तरतोऽरत्निमात्रात्परतः, अपर आहवनीयस्योत्तरतः । तत्र च गार्हपत्यसमीपवर्तिनि खरेऽग्निसंयोगात्पञ्च भूसंस्कारान्कृत्वा सिकतोपकिरणं कर्तव्यम्। अन्यत्र उद्धतावोक्षिते सिकतोपकिरणमित्येतावदेव । 'अथोत्तरतः सिकता उपकीर्णा भवन्ती' (श० ब्रा० १४।१।३।१४) ति । 'अथ खरे सादयत्यमेन्यस्म' (श० ब्रा० १४।२।२।३०) इत्यादिषु सिद्धवच्छ्रुतत्वादत्र खरनिवापः सूत्रितः ।

(४) स्तृपास्वरिति वा (शां० श्रौ० ५।९।११) पाठः ।

८० (१) पाणिनिव्याकरणे वादरत्नम् । न्यायव्याकरणाचार्य मीमांसक शिरोमणि पं० सूर्यनारायणशुक्लेन विरचितम् । (तत्र च न्यास परिष्कारपरिशिष्ट भेदेन प्रकरण त्रयम् यत्र पञ्चन्यून सार्धशतसूत्रेषु १४५ महताटोपेन न्यासाविचारिताः तत्र प्रथमं प्रकरणं मुद्रितं प्रथमो भागः । [व्या० वि १०] रु० १—८

८० (२) पाणिनीव्याकरणे वादरत्नम् । द्वितीयोभागः रु० १—४

८१ गणितकौमुदी । [हिन्दीभाषाटीकासहिता] प्रथमापरीक्षापाठ्यनिर्द्धारितगणित-संग्रहपुस्तकम् । [गणित विभागे १] रु० ०—६

८२ छन्दः कौमुदी । [हिन्दीभाषाटीकासहिता] प्रथमापरीक्षापाठ्यनिर्द्धारितछन्द-संग्रहपुस्तकम् । [छन्दोविभागे ३] रु० ०—६

८३ योगदर्शनम् । महर्षिप्रवरपतञ्जलिप्रणीतम् । तत्र (१) भोजवृत्तिः, [२] भावा-गणेशवृत्तिः, [३] नागोजीभट्टवृत्तिः, [४] मणिप्रभा, [५] रागचन्द्रिका, [६] योगसुधाकराख्य टीका षट्कसमेतम् । सटिप्पण । [योग० विभागे १] रु० २—०

८४ रघुवंशमहाकाव्यम् । श्रीकालिदासविरचितम् । म० म० मल्लिनाथकृत सञ्जीविनीटीका तथा परीक्षोपयोगि सुधाऽऽख्यव्याख्या सहितः । १ से ४ सर्गः मूल्यम् रु० १-४-० तथा १ से ९ सर्गः रु० १—८ तथा ६ से १० सर्गः । रु० १—८

८५ योगदर्शनम् । पं० श्रीबलदेवमिश्रकृत योगसूत्रप्रदीपिकाख्यव्याख्यया सहितम् । सटिप्पण । [योग वि० २] १—०

८६ काव्यमीमांसा । राजशेखरविरचिता । साहित्याचार्य पं० श्रीनारायणशास्त्रि खिस्ते कृत काव्यमीमांसा—चन्द्रिका टीका सहित [१ से ५ अध्याय] प्रथमो-भागः । [काव्यविभाग १३] रु० ०—८

८७ नागानन्दनाटकम् । श्रीहर्षदेवप्रणीतम् । काशीविश्वविद्यालयाध्यापकेन एम० ए० साहित्याचार्य पण्डित श्री बलदेव उपाध्यायेन स्वप्रणीतया भावार्थदीपिकाख्यया व्याख्यया समलङ्कृत्य बृहत् भूमिका हिन्दीभाषानुवादादिभिः सनाथीकृत्य सम्पादितम् । [नाटक विभागे १] रु० १—४

८८ मेघदूतकाव्यम् । महाकवि श्रीकालीदास विरचितम् । मल्लिनाथकृत सञ्जीविन्या, चारित्रवर्द्धनाचार्य विरचित चारित्रवर्द्धिन्या तथा साहित्याचार्य पं० श्री नारायण-शास्त्री खिस्तेकृत भावप्रबोधिनीव्याख्या टिप्पण्या च सहितम् । [काव्य०४] रु० १—८

८९ जागदीशीव्यधिकरणम् । न्यायाचार्यश्रीशिवदत्तमिश्रविरचित गंगाख्यव्याख्या टिप्पणी सहितम् । (न्यायविभागे २) रु० २—०

९० काव्यकल्पलतावृत्तिः । श्रीअमरचन्द्रयतिनिर्मिता अरिसिंहकृतसूत्रसहिता । (अलङ्कारविभागे ४) रु० १—४

९१ वैयाकरणसिद्धान्तचन्द्रिका । श्रीरामाश्रमणीता । श्रीसदानन्दकृत-सुबोधिन्या, श्रीलोकेशकरकृत-तत्त्वदीपिकया व्याख्यया च सहिता । पं० श्रीनवकिशोरशास्त्रिणा-निर्मितया चक्रधराख्य महत्या टिप्पण्या अव्ययार्थमालया लिङ्गानुशासनप्रक्रियया उणादिकोषेण च सहिता । (व्या० वि० ११) पूर्वार्द्धम् । रु० २—८ उत्तरार्द्धं । रु० २—८

९२ त्रिपुरारहस्यम् (महात्म्यखण्डम्) साङ्ख्ययोगशास्त्राचार्य श्रीमुकुन्दलाल शास्त्रिणा संशोधितम् । साहित्याचार्य खिस्ते-इत्युपाख्य पं० श्रीनारायणशास्त्रिणा लिखिताभ्यां भूमिकाऽध्यायानुक्रमणिकाभ्यां च सहितम् । (पुराणेतिहास वि०१) रु० ५—०

९३ आपस्तम्बधर्मसूत्रम् । श्रीमद्धरदत्तमिश्र विरचितया उज्ज्वलाख्यया वृत्त्या संवलितम् । (कर्मकाण्डविभागे ७) रु० ४—०

९४ अवच्छेदकत्वनिरुक्तिः । श्रीजगदीशतर्कालङ्कारकृताः । न्यायाचार्य श्रीशिवदत्त-मिश्र विरचित गंगाख्यव्याख्या टिप्पणी सहितः । (न्याय वि० १३) रु० १—४

९५ संस्कारदीपकः । म० म० पण्डित श्रीनित्यानन्दपन्त पर्वतीयविरचितः । संपूर्णः ।
(कर्मकाण्ड वि० ८) रु० ८—०

९६ वर्षकृत्यदीपकः । कालनिर्णयव्रतोद्यापनसहितः । म० म० पं० नित्यानन्दपन्त-पर्वतीय विरचितः । (कर्मकाण्ड वि० ९) रु० ३—८

९७ श्रौतसूत्रम् । श्रीमन्महर्षि-लाट्यायनप्रणीतमग्निष्टोमान्तम् । (कर्म० वि० १०) रु० २—०

९८ नलचम्पूः अथवा दमयन्तीकथा । महाकविश्रीत्रिविक्रमभट्टविरचिता । विषमपद-प्रकाशाख्यव्याख्यया सहिता । भावबोधिनी टिप्पणी सहिता । (का० वि०१८) रु० १-४

९९ श्रीब्रह्मसूत्रम् । श्रीभगवन्निम्बार्क महामुनीन्द्रविरचित वेदान्तपारिजात सौरभाख्यसूत्रवाक्यार्थेन श्रीश्रीनिवासाचार्यचरणप्रणीत श्रीवेदान्तकौस्तुभभाष्येन च सनाथीकृतम् । (श्रीनिम्बार्कभाष्यम्) (वेदान्त वि० १०) रु० ३—०

१०० वाग्वल्लभः । सर्वथाऽपि नवीनोऽपूर्वः प्रौढः परमोपयोगितया नियतमुपादेयतमश्छन्दोनिबन्धः, श्रीमता देवज्ञाग्रेसरेणागममार्मिकेण कविपुङ्गवेन दुःखभञ्जनविदुषा विरचितः, तत्सुतेन बहुशास्त्रपारगेण कविचक्रवर्त्तिना महामहोपाध्यायेन देवीप्रसाद पण्डितप्रवरेण कृतया वरवर्णिन्या टीकयोपस्कृतः । (छन्दः शास्त्र वि० ४) रु० २ —८

१०१ सिद्धान्तलक्षणम् । श्रीजगदीशतर्कालङ्कारकृतम् । न्यायाचार्य श्रीशिवदत्तमिश्र-विरचित गंगाख्यव्याख्या टिप्पणी सहितम् । (न्याय विभागे ४)) रु० १—८

१०२ वेदभाष्यभूमिकासंग्रहः । (सायणाचार्यविरचितानां स्ववेदभाष्यभूमिकानां संग्रहः) । [वेद० वि० ५] रु० २-८

१०३ माधवीयधातुवृत्तिः । श्रीमत्सायणाचार्यविरचिता । (व्या० वि० १२) रु० ५—०

१०४ बौधायनधर्मसूत्रम् । श्रीगोविन्दस्वामिप्रणीतविवरणसमेतम् । [कर्म०वि० ११] रु० ४—०

१०५ ताण्ड्यमहाब्राह्मणम् । सायणाचार्यविरचितभाष्यसहितम् । (प्रथमोभागः)
(वेद वि० ६) रु० ५—०

१०६ न्यायमञ्जरी । जयन्तभट्टकृता । न्याय-व्याकरणाचार्येण पं० सूर्यनारायणशास्त्रिणा कृतया टिप्पण्या समेता । द्वितीयोभागः । [न्या० वि० १५] रु० ३—०

१०७ शारदातिलकम् । श्रीमद्राघवभट्टकृतपदार्थादर्शटीकासहितम् ।
(तन्त्रशा० वि० १) रु० ५—०

१०८ मन्त्रार्थदीपिका । म० म० श्रीशङ्कुजनविरचिता । (वेद० वि० ७) रु० २—०

१०९ शब्दशक्तिप्रकाशिका । श्रीमज्जगदीशतर्कालङ्कारविनिर्मिता । श्रीकृष्णकान्त-विद्यावागीशकृतया कृष्णकान्तीटीकया श्रीमद्रामभद्रसिद्धान्तवागीशविरचितया रामभद्रटीकया च समलङ्कृता । न्यायाचार्य काव्यतीर्थ पं० ढुण्ढिराजशास्त्रि-कृतया छात्रोपयुक्तया विषमस्थलटिप्पण्या मूलकारिकार्थेन च सहिता ।
(न्या वि० १६) रु० ४—८

११० योगदर्शनम् (पातञ्जलदर्शनम्) भगवत्पतञ्जलिरचितं, राघवानन्दसरस्वतीकृत-"पातञ्जलरहस्याख्य"टिप्पनीयुक्तया द्वादशदर्शनेकाननपद्मानन्दवाचस्पतिमिश्रवि-रचितया "तत्त्ववैशारद्या"व्याख्यया भूषितेन विज्ञानभिक्षुनिर्मित"योगवार्त्तिक"-समुद्भासितेन मधुपुरीयकापिलमठस्थस्वामिहरिहरानन्दारण्यकृतभास्वतीवृत्त्या सहितेन भगवच्छ्रीकृष्णद्वैपायनव्यासदेवोपज्ञ-"सांख्यप्रवचन" भाष्येणादृतोति-तम्, प्रदेशविशेषेषु श्रीमन्माध्वसम्प्रदायाचार्य-दार्शनिकसार्वभौम-साहित्य दर्शनाद्याचार्य-तर्करत्न-न्यायरत्न-गोस्वामिदामोदरशास्त्रिणा विहितया टिप्पन्या "पातञ्जलप्रभा"नामिकया भूमिकया च संवलितम्, एतदीयसंशोधनसम्पादन-कर्मीकृतं च । (योगशास्त्रविभागे ३) रु० ५—०